अद्वैतसिद्धौ तार्किकप्रमेयविमर्शः

(A Critical Analysis of Tarkika Theories as Found in Advaita Siddhi)

कर्नाटकसंस्कृविश्वविद्यालयस्य विद्यावारिधिः (Ph.D) इत्युपाधिप्राप्तये प्रस्तुतोऽयं शोधप्रबन्धः

Thesis submitted to Karnataka Samskrit University in Partial fulfilment for the degree of
Doctor of Philosophy

मार्गदर्शकः / Guide

प्रो॥ वीरनारायणः एन् के पाण्डुरङ्गि /

Prof. Veeranarayana N K Pandurangi

कर्नाटकसंस्कृतविश्वविद्यालयः

अनुसन्धाता /Researcher

सत्यनारायणः सि टि /

Sathyanarayana C T

कर्नाटकसंस्कृतविश्वविद्यालयः

कर्नाटक-संस्कृत-विश्वविद्यालयः

पम्पमहाकविमुख्यमार्गः, चामराजपेटे, बेङ्गलूरु – ५६००१८

२०२२

प्रथमः अध्यायः

सम्पर्कः

(अस्मिन् शोधप्रबन्धे प्रवेशार्थं ये अत्यन्तम् अनुकूलाः विषयाः तेषां निरूपणम्)

वेदान्तः

वेदान्तदर्शनम् अथवा उत्तरमीमांसा मुख्यतः उपनिषदां तत्त्वज्ञानं प्रतिपादयति । जगत्प्रतिक्षणं परिवर्तनशीलम् अस्ति । तस्य आधारभूतं यथार्थतत्त्वं ब्रह्मास्ति । ब्रह्म अखण्डम् एकरसम् अद्वैतं च वर्तते । प्रत्येकस्य प्राणिनः अन्तरात्मनि तस्य निवासोऽस्ति । तदेव विश्वस्य निमित्तकारणम् उपादानकारणं च वर्तते । एनं मुख्यं सिद्धान्तम् आधारीकृत्य महर्षिणा बादरायणेन ब्रह्मसूत्रस्य रचना कृता । ब्रह्मसूत्राणि उपनिषदां वाक्यार्थानां संगत्या सह उदात्तदार्शनिकविचारान् प्रस्तुवन्ति ।

वेदान्तमतानुसारं मोक्षः परं प्रयोजनमस्ति । एतत्कृते आत्मज्ञानं परमावश्यकम् अस्ति । अयमेव प्रवृत्तिलक्षणो धर्मः कथितः । यस्य ज्ञानं शुद्धमस्ति स एव निःश्रेयसः सान्निध्यं प्राप्नोति । अनेन सकलपुरुषार्थानां प्राप्तिर्भवति । संसारे यत्किमपि वर्तते तद् ब्रह्म परमात्मा वा एव अस्ति, तदेव चैतन्यरूपे एकमात्रं ज्ञानमस्ति ।

ब्रह्म निर्गुणमस्ति, किन्तु ज्ञानं तस्य स्वरूपं वर्तते । माया एव जगदुत्पत्तेः कार्यं करोति । माया न सत् अस्ति, न चासत् एव वर्तते । इयं सदसद्विलक्षणा । । माया परिणामतः नामरूपात्मकताया उदयो भवति । अनेन संसारः उत्पद्यते । माययैव वस्तुनः उपाधिः गृह्यते । यद्यपि ब्रह्म सर्वत्र व्याप्तमस्ति तथापि माययैव सर्वेषु पदार्थेषु ब्रह्मणः पृथक्

पृथक् प्रतीतिर्जायते । जीवानाम् अनेकताया अपि इदमेव रहस्यमस्ति । प्रत्येकं जीवे ब्रह्मैव सत्यमस्ति, यः भेदोऽस्ति सः मायाया एव परिणामो विद्यते ।

सांसारिकरुपे जीवाः बहवः सन्ति, किन्तु तेषु अवस्थितं ब्रह्म एकमेवास्ति । अज्ञानी जीवो मायायारूपम् आवरणम् उच्छिद्य तद् स्प्रष्टुम् असमर्थो भवति, अतः ब्रह्मणोऽदर्शनम् । जीवो मायाकृते उपाधौ मनसा रमते । शरीरे च सत् अन्विषति । मायाया आवरणप्रभावात् आत्मा सीमितः प्रतीयते । तस्य शक्तिज्ञानादीनि सर्वाणि कार्यजातानि सीमितानि भवन्ति । सः पापपुण्याभ्यां आबद्धो भवति तत्फलभोगाय च विवशो जायते । पूर्वजन्मनः कृत्यानां फलोपभोगं कुर्वाणो जीवः ईश्वरेच्छया कर्मफलान्यपि भुङ्क्ते । इदं अनन्तम् अनादिचक्रम् अनवरतं सक्रियं भवति ।

उपनिषदां प्रतिपाद्यं वेदान्तमते विविधप्रकारेण समालोचितम् । अद्वैतवादः – अयं सिद्धान्तः आचार्यशङ्करेण प्रतिष्ठापितः । तन्मतेन जीवो ब्रह्मैवास्ति न च ब्रह्मातिरिक्तः । अत एव उभयोः द्वैतभावः स्वीकार्यो नास्ति । जीवः जगत् आत्मा च इति शांकरवेदान्ते त्रीणि प्रमुखानि तत्त्वानि स्वीकृतानि सन्ति । आत्मन एवापरा संज्ञा ब्रह्मेत्यस्ति । " ब्रह्म सत्यं जगन्मिथ्या" इति सिद्धान्तः शाङ्करमायावादस्य मूलाधारो वर्तते । वेदान्ते ब्रह्मणः त्रीणि स्वरुपाणि स्वीकृतानि निर्गुणं ब्रह्म, सगुणं ब्रह्म, जीवशरीरस्थं ब्रह्म चेति । यद्यपि ब्रह्मणः किमपि स्वरूपं नास्ति, तथापि उपाधिभेदात् तस्य त्रैविध्यं वर्तते । तत् सत्स्वरुपं चित्स्वरुपम् आनन्दस्वरुपं चास्ति ।

दृश्यादृश्यजगतः कारणमात्रमपि ब्रह्मैवास्ति । तत् परिवर्तनशीलं चास्ति । मायया युक्तं ब्रह्मैव जगतः मूलकारणमस्ति । सृष्टेः सर्वेषु पदार्थेषु स्वसत्तां उपस्थाप्य अपि ब्रह्म तेभ्यः परे तिष्ठति । सृष्टिः मायायाः उपादानमस्ति । मायया आबद्धो जीवः ब्रह्मसाक्षात्कारं कर्तुं न क्षमते । रज्जौ सर्पस्य भ्रान्तिरत्रैव भवति । यथा रज्जुं विना सर्पस्य भ्रान्तेः सम्भवः नास्ति, तथा ब्रह्म विना जगतो भ्रान्तिरपि नैव सम्भवति । अतो ब्रह्मणः सत्ता अवश्यमेव स्वीकार्या । जीवब्रह्मणोर्मध्ये यद् अज्ञानं विद्यते तदेव 'अविद्या' इति संज्ञां लभते । ब्रह्म जीवजगतोरपेक्षया परे वर्तते, तदेव जगतः एकमात्रं कारणम् अस्ति ।

अस्या अद्भुतसृष्टेरधिष्ठानं ब्रह्मैवास्ति । यतो हि सृष्टेः सत्ता तस्याः स्वकारणात् नास्ति । कारणन्तु ब्रह्मैवास्ति । तत् सदस्ति , ज्ञानमस्ति, श्रेयोऽस्ति , अद्वैतम् अखण्डश्चास्ति । तत् सूक्ष्मातिसूक्ष्मं तत्त्वं च विद्यते । तदेव सच्चिदानन्दमित्युच्यते । सर्वेषां सत्तात्मकपदार्थानां मूलाधारतया तद् ब्रह्मापि सत् अस्ति । चेतनमयत्वात् चित् अस्ति । आनन्दमयत्वात् आनन्दोऽस्ति । तत् समभावेन सर्वत्र व्याप्तमस्ति । तद् अमृतम् अक्षरम् अध्यात्मं च वर्तते । संपूर्णं जगत् तेनैव भासते ।

माया ईश्वरस्य शक्तिविशेषो वर्तते । सा त्रिगुणात्मिका प्रकृतिरेवास्ति । तस्याः शुद्धं सत्त्वं च रुपं ईश्वरोऽस्ति । जीवो मलिनसत्त्वप्रधानो भवति । अनयोरुभयोः सम्बन्धात् जगतः प्रादुर्भावः सम्भवति । माया अनिर्वचनीया शक्तिरस्ति । स्वस्वरुपे माया उपाधिपूर्णा भवति । ईश्वरेण सह सा सृष्टिकर्त्री अस्ति, किन्तु आवरण-विक्षेप-शक्तिभ्यां

साऽपि ब्रह्मवत् सर्वत्र व्याप्ता वर्तते । माया स्वयं स्वतन्त्रा नास्ति । किन्तु सा दृश्यरुपेण असद् रुपा विद्यते । चिदाभासेन सा अविद्यमानमपि विद्यमानमिव भासयति । तस्यां दुर्घटत्वशक्तिर्भवति । जगत् तस्या इन्द्रजालमस्ति । सा वस्तुतः अचिन्त्यस्वरुपा वर्तते । ईश्वरोऽपि मायायाः सम्बन्धात् एव प्रकटीभवति । माया वस्तुतः एकं दीर्घस्वप्नमस्ति ।

अद्वैतमते ज्ञानं द्विधा विभाजितं वर्तते – अनात्मजडम् आत्मचेतनं च । ज्ञानस्य कृते ज्ञाता ज्ञेयश्च परमावश्कौ स्तः । अनात्मा आत्मा चैव उपनिषत्सु उच्च-निम्नं संज्ञया व्यवह्रियते । तत्रोल्लेखोऽस्ति । यत् ब्रह्ममूलम् उर्ध्वमस्ति तच्छाखाप्रशाखाश्च अधस्तिष्ठन्ति । अद्वैतमतानुसारं जगदपि द्विधा वर्गीक्रियते-जडजगत्, चेतनजगत् चेति । यद्यपि जगत् असत् अस्ति, तथापि व्यावहारिकसत्ताया तद् विद्यमानमस्ति । ब्रह्मजिज्ञासार्थं विवेक-विराग-षट्क सम्पत्ति–शम-दम-उपरति-तितिक्षा–श्रद्धा–समाधीनाम् क्रमेणावश्यकता विनिर्दिष्टा । एभिरेवात्मज्ञानं भवति शरीरे चिदाभासयुक्तम् अन्तःकरणं कूटस्थचैतन्यं आवरणशक्तिश्च विद्यन्ते । अहङ्कारवशात् जीवः आत्मानं कर्ता भोक्ता चावगच्छति । अहन्ता, ममता, परता च तस्मिन् प्रविष्टा भवति । मनुष्या अपि त्रिधा वर्गीकृताः पामराः, विषयिणो, मुमुक्षवश्चेति । कर्मणा मुक्तिर्जायते । सम्यग् दर्शनेन जीवजन्तूनां परमार्थं सत् विज्ञायते ।

जीवः चैतन्यस्वरुपः अधिष्ठानभूतः लिङ्गशरीरम् चिच्छायायाः एकत्रिकरणमात्रमस्ति । प्रत्यगात्मा आत्मनः आलोके एव दीप्तो भवति । आत्मनः प्रकाशेन प्रतिबिम्बितम् अन्तरिन्द्रियं अन्तः करणमित्युच्यते । अत्रैव अहं भावस्य अवस्थानं भवति । जीवस्य पूर्णरुपता देहेन्द्रियमनोबुद्धीनां संघाते दृश्यते । शरीराणि त्रीणि सन्ति – स्थूलशरीराणि, सूक्ष्मशरीराणि कारणशरीराणि चेति । तुरीया सुषुप्त्याख्या अवस्था अज्ञानेन जीवं विपरीतं भासयति । परिणामस्वरुपं अज्ञानी जीवः परमात्मानमेव लिङ्गं देहमात्रं वाऽवगच्छति । किन्तु वस्तुतः ईश्वरः आत्मा वा तस्मात् लिङ्गदेहात् नितान्तं पृथग्भूतो भवति । अस्य कृते विवेकस्य आवश्यकता वर्तते । विवेके सति जीवो ब्रह्माणं आत्मनोऽभेदताया ज्ञानं कर्त्तुं पार्यते । विवेकप्राप्त्यै उपायद्वयमाचष्टे – निदिध्यासनं समाधिश्च । विवेकादेव दुःखानाम् आत्यन्तिकी निवृत्तिर्जायते । तत्त्वमसीत्याकारकोऽनुभवोऽपि सम्भवति । यथोक्तमाचार्यशङ्करेण - दृष्टिं ज्ञानमयीं कृत्वा पश्येद् ब्रह्ममयं जगत् ।

अद्वैतवेदान्तः

अयं दर्शनेषु अन्यतमः। न द्वैतम् अद्वैतम् । ज्ञानस्य चरमस्थितिरेव अद्वैतमित्युच्यते । शङ्कराचार्याणाम् आगमनात् प्रागपि अद्वैतसिद्धान्तः आसीत् । परन्तु शङ्कराचार्याणाम् आगमनानन्तरं प्रसिद्धिं गतम् एतत् दर्शनम् । अस्य मतस्य प्रवर्तकाः शङ्कराचार्याः । अद्वैतदर्शनं शङ्कराचार्याः प्रस्थानत्रयेण श्रुतिस्मृति सूत्रैः समर्थितवन्तः सन्ति । अतः अस्य दर्शनस्य "शाङ्करदर्शनम्" इत्यपि प्रसिद्धिः अस्ति । अस्मिन् दर्शने जीवब्रह्मणोः ऐक्यं प्रतिपादयन्ति । प्रपञ्चे जीवभावङ्गतस्य विवेकिनः प्रत्येकपुरुषस्य धर्मार्थकाममोक्षाख्याः चत्वारः पुरुषार्थाः सन्ति । चतुर्षु एतेषु आद्यास्त्रयः पाञ्चभौतिकेऽस्मिन् प्रपञ्चे भौतिकस्य जीवस्य कृते इहफलभोगत्वेन विहिताः भवन्ति ।

अन्तिमः मोक्षः परमसुखात्मकः इति कथनात् अयं परमपुरुषार्थः भवति । चतुर्णामेतेषां चतुर्वर्गत्वेन व्यवहारः । वर्गचतुष्टये आद्यास्त्रयः तत्तत्पुरुषमत्यनुसारम् उत्पन्नत्वात् एतेषाम् अनित्यत्वम् उच्यते । अन्तिमत्वेन निर्विशेषात्मकं सुखं प्राप्यते इत्यतः मोक्षः नित्यः इति शास्त्रेषु गीयते । नित्यभूतस्यास्य मोक्षस्वरूपस्य प्राप्त्यर्थं विभिन्नाः दर्शनकाराः भिन्नभिन्नप्रकारेण स्वमतं व्याचक्षुः। आस्तिकदर्शनं नास्तिकदर्शनं च इति दर्शनेषु द्वैविध्यम् अस्ति । षट् आस्तिकदर्शनानि सन्ति ।

आस्तिकदर्शनानि

साङ्ख्यदर्शनम्

योगदर्शनम्

न्यायदर्शनम्

पूर्वमीमांसादर्शनम्

उत्तरमीमांसादर्शनम्

नास्तिकदर्शनानि

जैनदर्शनम्

बौद्धदर्शनम्

चार्वाकदर्शनम्

वेदान्तदर्शने अद्वैतवेदान्तदर्शनं प्राधान्यं भजते । मम शोधग्रन्थे प्रवेशसौकर्यार्थम् आदौ अद्वैतवेदन्तस्य विषये किञ्चित् उपपादयामि । अस्य ग्रन्थस्य अधिकारी [1]विधिवदधीतवेदवेदाङ्गत्वेन आपाततः अधिगताखिलवेदार्थः, अस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता अधिकारी इति उक्तम् ।

---

[1] वेदान्तसारः पृ सं ३ (सुबोधिन्या विद्वन्मनोरञ्जन्या च सहितः)

सम्बन्धः –[2] जीवब्रम्हैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत् प्रमाणस्य च बोद्ध्यबोधकभावः

विषयः - [3]जीवब्रम्हैक्यं शुद्धचैतन्यम् । समग्रवेदान्ते अयमेव तात्पर्यविषयः । परन्तु अत्र कश्चन प्रश्नः उदेति यत् संसारस्य भोगेषु निमग्नस्य जीवस्य समग्रजगतः सृष्ट्यादिकर्तुः परमात्मनः च कथम् ऐक्यं सम्भवति इति । तत्र उत्तरम् एवं चिन्तनीयम् – ईश्वरः मायया अवच्छिन्नः वर्तते , जीवः अन्तःकरणावच्छिन्नः अस्ति । एवञ्च अवच्छेदकाशं परित्यज्य पश्यामः चेत् शुद्धं चैतन्यं केवलम् अवशिष्यते । इदमेव जीवब्रह्मणोः एक्यं नाम । सर्वेषु दर्शनेषु द्वैतम् एव प्रतिपाद्यते , अतः जनैः श्रृत्युक्तम् अद्वैतं ज्ञातव्यम् इति अस्मिन् शास्त्रे प्रयतितं विद्वद्भिः ।

प्रयोजनं – [4]जीवब्रह्मणोः ऐक्यविषयक-अज्ञानस्य निवृत्तिः, स्वस्वरूप-आनन्दावाप्तिश्च इति । अत्र श्रुतयः – तरति शोकम् आत्मवित्[5], ब्रह्मवित् ब्रम्हैव भवति [6]

ऐक्यविषयकेन अज्ञानेन अस्माकं कृते तस्य अनुभवः न भवति । साधनचतुष्टयसम्पत्याद्यनन्तरं श्रवणाद्यनुष्ठानानन्तरं अज्ञानस्य नाशानन्तरम् अस्य अनुभवः भविष्यति । आत्मानुभवपर्यन्तं शोकः भवति । ततः परं शोकः नष्टः भवति इत्यत्र काचित् श्रुतिः प्रमाणी भूता अस्ति “[7] सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित्,

---

[2] वेदान्तसारः पृ सं ६ (सुबोधिन्या विद्वन्मनोरञ्जन्या च सहितः)

[3] वेदान्तसारः पृ सं ६ (सुबोधिन्या विद्वन्मनोरञ्जन्या च सहितः)

[4] वेदान्तसारः (सुबोधिन्या विद्वन्मनोरञ्जन्या च सहितः) पृ सं ६

[5] च्छान्दोग्य उपनिषत् ७.१.३

[6] मुण्डकोपनिषत् ३.२.९

[7] मुण्डकोपनिषत् ७.१.३

श्रुतं ह्येव मे भगवद्दृशेभ्यः तरति शोकम् आत्मवित् इति, सोऽहं भगवः शोचामि, तं मा भगवन् शोकस्य पारं तारयतु इति” इदमेव वेदान्तस्य अनुबन्धचतुष्टयम् ।

वेदान्तशास्त्रे केवलमात्मस्वरूपं प्रतिपाद्यते इति हेतोः मुमुक्षुः वेदान्तशास्त्रपठनश्रवणमननादिषु प्रवृत्तो भवति । तस्मात् एतत् शास्त्रं सर्वेषां शास्त्राणां शिरोमणिभूतं भवति । अस्मिन्नपि शास्त्रे आत्मनः स्वरूपप्रतिपादनं महता विस्तरेण प्रतिपादितमस्ति । यत्र समस्तवेदमन्त्राणां लक्ष्यत्वेन अन्तिमं तत्त्वमेकं वर्णितं भवति तत् वेदान्तशास्त्रमित्युच्यते । उपनिषन्मन्त्रसमूहस्यापि वेदान्तः इति संज्ञा, यतः समस्तवेदानां परमलक्ष्यात्मकं तत्त्वमुपनिषन्मन्त्रेषु निगदितमस्ति । परिदृश्यमानस्य चराचरात्मकस्य सकलप्रपञ्चस्य सृष्टिकर्तृत्वेन मूलकारणं यद् ब्रह्म, तस्य सम्पूर्णं विवेचनात्मकं ज्ञानमुपनिषत्स्वेव लभ्यते, एवमन्यत्र न प्राप्यते । अतः वेदानामन्तिमं रहस्यमुपनिषदि कथितत्वात् उपनिषत् वेदान्तत्वेन आद्रियते । उक्तं च वेदान्तो नाम उपनिषत्प्रमाणम् इति । परन्तु उपनिषत्सु अत्यन्तरहस्यत्वेन गूढतमभावाः सन्तीति कृत्वा उपनिषदर्थः सर्वैः ज्ञातुं न शक्यते । सर्वेषां सम्यगवबोधनाय परमकारुणिकः वेदव्यासः उपनिषत्सारभूतान् अर्थान् एकीकृत्य सूत्ररूपेण प्रणिनाय । यानि इदानीं गीयन्ते ब्रह्मसूत्राणि अथवा वेदान्तसूत्राणि इति । ब्रह्मसूत्रात्मकः भागः अत्यल्पः, अथापि महत्वपूर्णः इति कृत्वा एतेषां सूत्राणां व्याख्याने आहत्य एकादशजनाः स्वजन्म समर्पितवन्तः ।

प्रमाणानि

अद्वैतवेदान्ते ६ प्रमाणानि सन्ति। तानि,

- प्रत्यक्षप्रमाणम्
- अनुमानप्रमाणम्
- उपमानप्रमाणम्
- आगमप्रमाणम्
- अर्थापत्तिप्रमाणम्
- अनुपलब्धिप्रमाणम्

मुख्यांशाः

- निरपेक्षज्ञानं नाम शुद्धचैतन्यम्, अतः इदं शुद्धबुद्धमुक्तस्वभावयुक्तं भवति।
- आत्मप्रकाशात् अन्तःकरणस्य विकारः एव वृत्तिज्ञानं भवति । अस्य व्यावहारिकवस्तूनां ग्रहणयोग्यता भवति । इदं पारमार्थिकसत्यं न भवति।
- ज्ञानं स्वयं प्रकाशः भवति । परप्रकाशः न भवति । अतः ज्ञानं स्वतःप्रमाणं भवति ।
- अद्वैते प्रत्यक्षादीनि ६ प्रमाणानि सन्ति ।
- नानात्वभावनया संसारी भवति । ब्रह्मात्मैक्यज्ञानेन मुक्तः भवति ।
- ब्रह्मसाक्षात्कारः एव मोक्षः । मोक्षः कर्मणः असाध्यः । कर्म उत्पाद्यम्, आप्यम्, विकार्यम् च भवति । मोक्षस्तु अनुत्पाद्यः, अनाप्यः, अविकार्यश्च भवति ।

- निष्कामकर्म चित्तशुद्धिकरणे सहायकं भवति । निष्कामकर्मणि कर्मबन्धः न भवति ।
- ज्ञानसम्पादनमेव लक्ष्यं भवति ।
- शमदमोपरतितितिक्षासमाधानश्रद्धादयाः "शमादिषट्केन व्यवह्रियते" ।
- साधकाय श्रवणमनननिदिध्यासनानि अपेक्ष्यन्ते । एतैः क्रमेण मुक्तः भवति । आत्मानन्दः उत ब्रह्मानन्दः एव मुक्तिः भवति ।

तत्त्वानि

अद्वैतवेदान्तस्य तत्त्वानां निरूपणे वैशिष्ट्यम् अस्ति । ब्रह्मतत्त्वमेव परमार्थः । अस्य परमार्थस्य भिन्नः परमार्थः नास्तीत्यतः एव अद्वैतसिद्धान्तः इति विख्यातः अस्ति । **ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः** इति अस्य सिद्धान्तः । तर्हि जगत्, जीवः नास्ति किम् ? एतौ न परमार्थौ ।

केवलम् अध्यासेन भासेते । अतस्मिन् तद्बुद्धिः अध्यासः इति । वेदान्तनये अपि तत्त्वानि भविष्यन्ति । तद्यथा- ब्रह्म, सगुणब्रह्म, निर्गुणब्रह्म, सोपाधिकः, सर्वज्ञः, परमेश्वरः, जीवः, जीवस्वरूपम्, आत्मनः स्वयंज्योतिष्ट्वम्, जीवात्म-परमात्मनोः ऐक्यम्, तयोः जीवात्मपरमात्मनोः अभेदप्रतिपादनम्, मायोपाधिना ईश्वरः, अविद्योपाधिना जीवः इति प्रतिपादनम्, अविद्या, माया उपाधिः, संसारस्य अनादित्वम्, सृष्टिः, जगत्, सृष्टिविषये ब्रह्मणः उपादानकारणत्वम्, निमित्तकारणत्वम्,

प्रपञ्चमिथ्यात्वम्, जाग्रत्स्वप्नसुषुप्त्याद्यवस्थानां प्रतिपादनम्, स्वप्नदृष्टान्तः, पञ्चमहाभूतानां विवेचनम्, पञ्चज्ञानेन्द्रियाणि, एवमन्तःकरणस्योत्पत्तिः, पञ्चकर्मेन्द्रियाणि, तथा प्राणस्योत्पत्तिः, स्थूलशरीरम्, लिङ्गशरीरम्, कारणशरीरम्, सत्तात्रैविध्यम्, ब्रह्मणि पञ्चभूतानां लयः, सृष्टेः पूर्वं ब्रह्मणः स्वरूपप्रतिपादनमित्यादीनि तत्त्वानि प्रतिपादितानि, एवं तेषां तत्त्वानां स्वरूपविवेचनमपि सम्यक् प्रसाधितम् ।

मुख्यविषयाः

सृष्टिप्रक्रिया कारणवादः च

ब्रह्म मायोपाधिना सहितः ईश्वरो भूत्वा जगतः सृष्टेः कारणीभूतः अस्ति । जगतः सृष्टिः इच्छापूर्विका । अस्यां सृष्टिप्रक्रियायां ईश्वरः निमित्तकारणम् भवति । ईश्वरस्य सङ्कल्पेनैव आदौ आकाशस्य समनन्तरं क्रमशः वायोः, तेजसः, जलस्य, पृथिव्याः च पञ्चभूतानां सृष्टिः अभवत् । एतेषु आकाशे शब्दगुणः, वायौ शब्दः स्पर्शश्च, तेजसि शब्दः, स्पर्शः रूपश्च, जले शब्दः, स्पर्शः रूपम् रसश्च, पृथिव्यां शब्दः, स्पर्शः, रूपम्, गन्धः च गुणाः भवन्ति । एतानि पञ्चभूतानि मायया सहितानि ।

सत्यत्वं ख्यातिवादः च

ज्ञानानां विषये दार्शनिकाः विवेचितवन्तः । पञ्चविधख्यातयः निरूपिताः सन्ति । आख्यातिः, असत्ख्यातिः, आत्मख्यातिः, अन्यथाख्यातिः, अनिर्वचनीयख्यातिः च । मीमांसकानाम् आख्यातिवादः, माध्यमिकबौद्धानाम् असत्ख्यातिवादः, योगाचारबौद्धानाम् आत्मख्यातिवादः, तार्किकानाम् अन्यथाख्यातिवादः, अद्वैतिनाम् अनिर्वचनीयख्यातिवादः च । माया सत्, असत्, सदसत्, इति निर्वचनं न शक्यते । अतः अनिर्वचनीयम् अस्ति माया । मायायाः स्वरूपं शङ्कराचार्यः विवेकचूडामणौ वर्णितवान् अस्ति ।

सन्नप्यसन्नप्युभयात्मिका नो

भिन्नाप्यभिन्नाप्युभयात्मिका नो ।

साङ्गाप्यनङ्गाप्युभयात्मिका नो

महाद्भुताऽनिर्वचनीयरूपा ॥ इति

मोक्षस्वरूपम् -

चतुर्विधपुरुषार्थेषु मोक्षाख्यः अन्यतमः । मोक्षः आत्मनः सहजस्वरूपम् । स्वाभाविकतया जीवः नित्यशुद्धबुद्धमुक्तः । मोक्षः प्राप्यः उत्पाद्यः वा न । बृहदारण्यकोपनिषदः शाङ्करभाष्यस्य सुरेश्वराचार्यः व्याख्यानं कृतवान् । तस्मिन् मुक्तेः स्वरूपम् निरूपितवान्, कश्चित् राजकुमारः बाल्ये व्याधकुले प्रवृद्धः । कालान्तरे नाहं व्याधः राजकुमारोऽहम् इति ज्ञातवान् । तथैव, जीवी **तत्त्वमसि** इत्यादिभिः महावाक्यैः अज्ञाननिवृत्तिं सम्प्राप्य, जीवब्रह्मणोः अभेदं ज्ञात्वा च स्वस्वरूपं अनुभवति चेत् सः मोक्षः ।

सहजस्वरूपस्य अज्ञानावरणनिवृत्तिः एव वेदान्तस्य लक्ष्यम् इति शङ्कराचार्यः प्रतिपादितवान् अस्ति । ब्रह्मणः अपरोक्षज्ञानमेव मोक्षसाधनम् । ब्रह्मज्ञानं श्रवणात् अनुभवे पर्यवसन्नं भवति । ब्रह्मणः विषये श्रुत्याद्याः, अनुभवाः च प्रमणभूताः । ब्रह्मज्ञानं मोक्षसाधनम् न तु शाब्दज्ञानम् इति शङ्कराचार्यः उल्लिखति । तत् एवम्,

न गच्छति विनापानं व्याधिताषधिशब्दतः ।

विनाऽपरोक्षानुभवं ब्रह्मशब्दैर्न मुच्यते ॥

माया

अविद्या, अनिर्वचनीया च या सा माया । या मा सा माया इत्यपि कथयन्ति । मा नाम त्रिकालेश्वपि न विद्यते किन्तु अस्ति इति भाति । यद्यपि आत्मनः एकत्वे अन्यत् सर्वं मिथ्या इति सिध्यति तथापि संक्षेपेण तस्य मिथ्यास्वरूपस्यापि उपवर्णनं भवति । तथा हि - दृश्यप्रपञ्चः बुद्ध्यादयश्च मिथ्याभूताः इति अस्मिन् वेदान्तशास्त्रे प्रतिपाद्यते । अद्वितीयः सः परमात्मा स्वशक्त्या विचित्ररूपेण परिदृश्यमानम् अमुं प्रपञ्चं सृजति, अनन्तरं च सृष्टं सर्वं जगत् स्वात्मनि विलीनं करोति । प्रपञ्चस्य जन्मनाशौ भवतः इति श्रुतिस्मृतिभ्याम् अभ्युपगतत्वात् दृश्यमानः प्रपञ्चः मिथ्या भवति ।

अविद्या -

अविद्यायाः अस्तित्वे किं प्रमाणम् ? समाधानत्वेन "अहमज्ञः, मामन्यं च न जानामि" इत्यादि सव्यवहारिकं वचनमेव अविद्यायाः सत्त्वे प्रमाणं भवति इत्युच्यते ।

ब्रह्म -

जीवब्रह्मणोः एकता उच्यते, जीवस्तु ज्ञातः ब्रह्म तु न ज्ञातम्, अज्ञाते ब्रह्मणि कथमेकता? यदि ब्रह्म ज्ञातमित्युच्यते तर्हि किं प्रमाणम् ? इति विचारे पूर्वपक्षी वदति, ननु ब्रह्मज्ञाने प्रत्यक्षं न प्रमाणम् । यतः ब्रह्मणः अतीन्द्रियत्वात् । अतीन्द्रियं न कदापि प्रत्यक्षीक्रियते

। प्रत्यक्षानुमानोपमानानां प्रमाणानां ब्रह्म विषयत्वाभावात् इमानि ब्रह्मणि ब्रह्मसाधने न क्षमन्ते । अन्तिममागमप्रमाणमस्त्येव । तेन ब्रह्मणः अस्तित्वे ब्रह्मस्वरूपज्ञाने प्रमाणत्त्वमस्त्येव । श्रुतिभिः ब्रह्म आगमगम्यत्वेनोक्तम्।

अध्यासः -

अध्यासो नाम "अतस्मिंस्तद्बुद्धिः" इति भाष्यकारस्य वचनम् । तद्यथा- पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वेति बाह्यधर्मान् अध्यस्यति । स्थूलोऽहम्, कृशोऽहम्, गौरोऽहम्, तिष्ठामि इत्यादि देहधर्मान् स्वात्मनि अध्यस्यति ।

अवस्थाः -

जीवस्य जाग्रत्, स्वप्नः, सुषुप्तिः इति तिस्रः अवस्थाः सन्ति । एवमेव व्यवहारावस्था, विचारावस्था, विज्ञानावस्था इति दशाभेदेन भिद्यन्ते अवस्थाः ।

- "व्यवहारावस्था"- जाग्रदवस्था एव व्यवहारावस्था भवति । अस्यां प्रमाणप्रमेयान् अनुसृत्य कार्यकारणपुण्यपापस्वर्गदुःखगुरुशिष्यबन्धमोक्षादिविषयाः निरूपिताः दृश्यन्ते ।
- "विचारावस्था"-विचारावस्था चित्तशुद्धिम्, वैराग्यम्, विवेकञ्च सम्पादयति । विवर्तमार्गाय अर्हताप्राप्तये अस्याः विचारावस्थायाः आवश्यकता अस्ति । एषा

स्वप्नसदृशावस्था भवति । साधकः व्यवहारं सर्वमपि स्वप्नसदृशम् इति भावयति । साधकस्य उपयुक्ता श्रेष्ठावस्था भवति । कुतः चेत् प्रपञ्चः मायामयः इति दृढं भवति अस्याम् अवस्थायाम् ।

- "विज्ञानावस्था"- एषा अवस्था सुषुप्तावस्थायाः सदृशी भवति । गाढनिद्रायां प्रपञ्चस्वप्नौ न भवतः एव सर्वमपि मिथ्यारूपेण भवन्ति । केवलम् आत्मानुभवः भवति । अमुं विषयं गौडपादाचार्यः एव निरूपितवान् अस्ति,

न निरोधो न चोत्पत्तिः न बद्धो न च साधकः।

न मुमुक्षुः न वै मुक्तः इत्येषा परमार्थता॥

वेदान्तो नाम वेदस्य अन्तः निर्णयात्मकः भागः सारतमः । तथा च वेदस्य अन्ते विद्यमानाः ज्ञानकाण्डात्मकाः सारवत्यः उपनिषदः वेदान्तत्वेन कीर्त्यन्ते । तस्य शास्त्रं वेदान्तशास्त्रम् । वेदान्ताश्च अद्वैतभावं प्रतिपादयन्ति । वेदान्तानां इमं विचारं अन्येभ्यः जनेभ्यः दर्शयितुं दार्शनिकाः सूत्र-भाष्य-वार्त्तिककारादयः स्वकृतिभिः प्रदर्शितवन्तः । उपनिषदश्च अर्थवत्तां प्रकटयन्ति शङ्कराचार्याः स्व-उपनिषद्भाष्येषु विशेषेण कठोपनिषद्भाष्ये ।

साक्षात् परमेश्वरावताराः जगद्गुरुवः श्रीमच्छङ्करभगवत्पादाः प्रस्थानत्रयभाष्याणि विरचय्य अद्वैतात्मज्ञानमेव कैवल्यसाधनमिति सुस्पष्टं प्रत्यपीपदन् । तदनन्तरकालिकाः अद्वैताचार्याः विद्यारण्य-सदाशिवब्रह्मेन्द्रादयः अपि इमामेव प्रक्रियाम् अन्वसरन् ।

अपि तु जिज्ञासूनां संवित्प्रावीण्यसम्पादनायैव । हृत्तोषकरी, प्रत्यक्प्रकाशजननी वर्तत इत्यत्र न कस्यापि सन्देशलेशोऽपि विद्यते ।

बृहदारण्यकवार्तिके सुरेश्वराचार्यैः –

यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।

सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता ॥

यद्यपि अद्वैतवेदान्तः न वादविवादसागरे निम्मज्ञितुं विद्यामानः शास्त्रमार्गः । अथापि अध्येतृणामन्तेवासिनां स्वशास्त्रसिद्धान्तेषु श्रद्धां दृढयितुं, स्वशास्त्रं प्रत्याक्षिप्तानां पूर्वपक्षाणां निवारणार्थमिदम् अत्यन्तम् आवश्यकम् । अनया दृष्ट्या शास्त्रं वर्धनीयमिति मनीषयैव शङ्कराचार्यादयः सुधीधीकुशाग्रकारिणीं ग्रन्थराशिमेव रचयामासुः ।

राष्ट्रेऽस्मिन् नैके तत्त्वज्ञानिनः दार्शनिकाः स्वकीयं तत्त्वविचारं जनानां पुरतः प्रास्तुवन् । श्रीमच्छङ्करभगवत्पादेभ्यः प्रागपि सिद्धान्ताननेकान् बहवः कुशलमतयः आचार्याः उपपादितवन्तः । तेषु केचन विचाराः अदृश्यतां जग्मुः । अन्ये केचन उपयुक्ताः विचाराः अनुपयुक्ताः इत्येवं रूपेण तस्थुः । किञ्च कैरपि विचारैः जनाः परमप्रयोजनफलकं साधनं न अवापुः । परन्तु यदा शङ्करभगवत्पादैः प्रतिपादितः यः अद्वैतसिद्धान्तः लब्धः तत आरभ्य बहुभ्यः साधकेभ्यः इदानीमपि सहस्रशः प्रजाभ्यः अध्यात्ममार्गे परमं प्रमुखं साधनं भवति । स सिद्धान्तः प्रस्थानत्रयमाधारीकृत्य प्रत्यपादि । तस्य च अन्वयः सार्वकालिकः सार्वदेशिको वर्तते – यतः आचार्यैः प्रतिपादितः

वेदान्तविचारः अत्यन्तं विशेषरूपः कालदेशादिभ्यः अतीतः सांसारिकसकलसीमालङ्घितः सन् अखिलस्य जगतः सारभूतं परं ब्रह्म बोधयति अतः एवेति मन्तव्यम् । एतच्च परं ब्रह्म सकलस्यापि कालस्य सर्वस्यापि देशस्य निखिलानां मनुष्यपशुपक्ष्यादीनाम् आत्मभूतं स्वरूपम् । एतादृशं परमार्थतत्त्वं, विकारं विनैव सार्वत्रिकानामनुभवानाम् आधारेणैव बोधितवन्तः इत्येतत् श्रीमच्छङ्करभगवत्पादानाम् अद्वैतवेदान्तोपदेशक्रमस्य एकः अत्यन्तम् असाधारणः धर्मः ।

आचार्याः श्रुतिस्मृतिसूत्राणि आदृत्य तेभ्यः प्रसन्नगम्भीरभूतं स्वभाष्यं विरचय्य जनान् उपकृतवन्तः । प्रामुख्येन अत्र वेदान्तसिद्धान्तस्य मूलत्वेन उपनिषदः परिगृह्यन्ते । एतासां वेदे अन्तर्भावात् श्रुतिप्रस्थानमिति विवेकः । ततश्च वेदस्यैव गूढमर्थं विशदयितुं मुनिना वेदव्यासेन विरचितः महाभारतान्तर्भूतः भगवद्गीताख्यः स्मृतिग्रन्थः वेदितव्यः । श्रुत्यर्थस्मारणात् अस्य स्मृतित्वम् । एवमेव उपनिषदां वाक्यैः वेदान्तसिद्धान्तं भगवद्गीतायाः प्रामाण्यपूर्वकं युक्तिभिः निर्णयपुरःसरम् उपपादयितुं भगवता बादरायणेन (वेदव्यासेन) सूत्ररूपग्रन्थः "ब्रह्मसूत्रं" व्यरचि । अयमेव न्यायात्मकः उपपादनक्रमः । एवं तिस्रः अपि श्रुतिस्मृतियुक्तयः एकैकस्मात् स्थानात् स्ववैशिष्ट्यपूर्वकं वेदान्तसिद्धान्तं बोधयन्तीत्यतः एतत्त्रयं मिलित्वा प्रस्थानत्रयमित्युच्यते ।

शङ्कराचार्याः एतेषां त्रयाणामपि भाष्यं विरचयामासुः । एतदवसरे अनर्थं द्वैतं प्रतिपादयतः अन्यानि साङ्ख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसादर्शनानि यद्यपि खण्डितवन्तः । तथापि अन्येषु दर्शनेषु प्रतिपादितान् अद्वैतसिद्धान्ताविरुद्धान् मार्गान्

अङ्गीकृतवन्तः सन्ति । अत एव वदन्त्यपि स्वसूत्रभाष्ये – **“परमतम् अप्रतिषिद्धम् अनुमतं भवतीति”** (२-४-१२)

अद्वैतसिद्धिः

अद्वैतसिद्धिग्रन्थस्य कर्तारः विद्वांसः मधुसूदनसरस्वतीस्वामिनः। एतेषां स्थानं बङ्गालम् । फरीदपुर् मण्डलान्तर्गत कोटालीपाडा परगना प्रदेशे एतेषां जन्म जातम् । [8]एतेषां पिता श्री प्रमोददत्तपुरन्दरः। प्रमोददत्तपुरन्दरस्य चत्वारः पुत्राः आसन् । ते च

- श्रीनाथचूडामणिः
- यादवानन्द न्यायाचार्यः
- कमलजनयनः
- वागीश गोस्वामी

अत्र तृतीयः पुत्रः कमलजनयनः तस्य विषये चिन्त्यते । अयं कमलजनयनः तत्काले प्रसिद्धानां विदुषां न्यायाचार्याणां श्रीमतां मथुरानाथतर्कवागीशानाम् अन्तिके अध्ययनं कृतवान् । ततः परं वाराणसीम् आगत्य श्रीमतां विश्वेश्वरसरस्वतीस्वामिनाम् अन्तिके वेदान्तस्य अध्ययनं कृतवान्। ततः परं विश्वेश्वरसरस्वतीस्वामिनां सकाशात् एव सन्यासदीक्षां स्वीकृतवन्तः एते । सन्यासदीक्षायाः परम् एते मधुसूदनसरस्वतीनाम्ना भूषिताः अभूवन् । एते अद्वैततत्त्वनिर्णये अग्रगण्याः आसन् । मधुसूदनसरस्वतीस्वामिनाम् अनेके शिष्याः आसन् । परन्तु तत्र त्रयः प्रसिद्धाः आसन् ।

१. बलभद्रभट्टाचार्यः

---

[8] न्यायामृताद्वैतसिद्धेः हिन्दीव्याख्यानस्य उपोद्घाते अयं विषयः वर्तते ।

एतैः अद्वैतसिद्धेः “सिद्धिव्याख्या” इति व्याख्यानं लिखितम् । अत्र सरलभाषया अद्वैतसिद्धेः हृदयं प्रकटितम् ।

२. श्री शेषगोविन्दः

एतैः श्रीमत्छङ्कराचार्यकृतसर्वसिद्धान्तसङ्ग्रहः इति ग्रन्थस्य टीका रचिता । अस्मिन्ग्रन्थे स्वस्य गुरुचरणानाम् उपरि अत्यन्तं श्रद्धा दर्शिता ।

३. श्री पुरुषोत्तमसरस्वती

एतैः श्रीमधुसूदनसरस्वतीकृत - “सिद्धान्तबिन्दु” ग्रन्थस्य व्याख्यानं लिखितम् । स्वस्य ग्रन्थस्य अन्ते एवं कथितं यत्

“श्रीधरं श्रीगुरुं नत्वा नौमि श्रीपादमादरात् ।
विद्यागुरुं गुरुमिव सुराणां मधुसूदनम् ॥”

श्री मधुसूदनसरस्वतीस्वामिभिः अनेके ग्रन्थाः रचिताः । तेषु केचन अत्र उल्लिख्यन्ते -

- महिम्नस्तोत्रव्याख्या
- वेदान्तकल्पलतिका
- सिद्धान्तबिन्दुः
- अद्वैतसिद्धिः
- गूढार्थदीपिका
- भक्तिरसायनम्
- अद्वैतरत्नरक्षणम्

- सारसंग्रहः
- वेदस्तुतिटीका
- हरिलीलाविवेकः
- परमहंसप्रिया
- कृष्णकुतूहलनाटकम्
- आत्मबोधटीका
- ईश्वरप्रतिपत्तिप्रकाशः
- शाण्डिल्यसूत्रटीका
- शास्त्रसिद्धान्तलेशटीका
- अष्टविकृतिविवरणम्
- प्रस्थानभेदः
- भक्तिसामान्यनिरूपणम्
- राज्ञां प्रतिबोध

इत्येते ग्रन्थाः श्री मधुसूदनसरस्वतीस्वामिभिः रचिताः इति श्रूयते । परन्तु मधुसूदनसरस्वती नाम्ना बहवः आसन् इति श्रूयते, अतः एतैः एव इमे ग्रन्थाः लिखिताः इत्यत्र प्रमाणं न लभ्यते । एते तुलसीदासवर्याणां समकालीनाः इति श्रूयते ।

रामायणं हिन्दी भाषायां लेखनीयं इति यदा सङ्कल्पितं तदा सर्वैः विद्वद्भिः विरोधः प्रकटितः । तदा तुलसीदासवर्यैः मधुसूदनसरस्वतीस्वामिभ्यः हिन्दी अनुवादविषये पत्रं

लिखितम् । तत् दृष्ट्वा मधुसूदनसरस्वती स्वामिनः विदुषां मण्डल्यां तुलसीदासवर्याणां ग्रन्थविषये उपस्थापितवन्तः । तदा एतेषां विषये श्रद्धान्विताः विद्वांसः अङ्गीकारं कृतवन्तः । ततः परं तुलसीदासवर्यैः हिन्दी अनुवादः कृतः इति वदन्ति । तुलसीदासवर्याणां मधुसूदनसरस्वतीस्वामिनां च अत्यन्तं आत्मीयता आसीत् इति वदन्ति । मधुसूदनसरस्वतीस्वामिनः अक्बर् महोदयस्य समकालीनाः इति श्रूयते । अक्बरस्य कालः तु १५५६ तः १६०७ पर्यन्तम् इति इतिहासकाराः वदन्ति । अक्बरस्य आस्थाने वर्तमानः प्रसिद्धः विद्वान् आईने अक्बरी इति ग्रन्थं लिखितवान् । तत्र मधुसूदनसरस्वतीस्वामिनां विषये उल्लिखति।

अक्बरस्य आस्थाने वर्तमानेन अर्थसचिवेन समम् अत्यन्तम् आत्मीयता आसीत् इति वदन्ति । एकदा अक्बर् महोदयेन एका विद्वत् सभा आयोजिता । तत्र सभायां सभापतित्वेन श्रीमधुसूदनसरस्वती स्वामिनः आसन् । तेषां तत्र सभायां भाषणकाले विद्वत्पूर्णवचनेन अक्बरः अत्यन्तं प्रभावितः इति केचन वदन्ति । तत्र सभायां ऐकमत्येन सर्वैः एवं स्वीकृतं यत् -

“वेत्ति पारं सरस्वत्याः मधुसूदनसरस्वती ।

मधुसूदनसरस्वत्याः पारं वेत्ति सरस्वरी ॥ इति

सर्वम् आकलय्य इदं निर्णेतुं शक्यते यत् एतेषां जीवनकालः तु षोडषशतमानम् इति ।

पञ्चदशे शतमाने शङ्करमिश्रः इति नाम्ना भूषितः कश्चन विद्वान् आसीत् । सः एकः महान् नैयायिकः आसीत् । तेन भेदरत्नः इति एकः ग्रन्थः लिखितः । तत्र अद्वैतवेदान्तस्य खण्डनं कृतम् । तत्र ग्रन्थे अद्वैतवेदान्तस्य विषये एवम् उक्तम् –

"भेदरत्नपरित्राणे तार्किकाः एव यामिकाः ।

अतो वेदान्तिनः स्तेयान् निरस्यत्येव शाङ्करः॥"

अस्य ग्रन्थस्य निराकरणं मधुसूदनसरस्वती स्वामिभिः कृतम् । भेदरत्नग्रन्थस्य निराकरणं "अद्वैतरत्नरक्षणम्" इति ग्रन्थेन कृतम् । न्यायामृतस्य निराकरणं यथा मर्मस्पर्शित्वेन तलस्पर्शित्वेन च वर्तते, तथा भेदरत्नस्य निराकरणम् अपि मर्मस्पर्शित्वेन तलस्पर्शित्वेन च वर्तते । अद्वैतरत्नरक्षणग्रन्थम् आधारीकृत्य तेषां जीवनकालस्तु षोडशशतमानम् इति निर्णीयते । भेदरत्नग्रन्थे यथा वेदान्तिनां निन्दापरः श्लोकः वर्तते, तद्वत् तार्किकानां निराकरणपरोऽपि श्लोकः अद्वैतरत्नरक्षणग्रन्थे वर्तते -

अद्वैतरत्नरक्षायां तात्विकाः एव यामिकाः

अतो न्यायविदः स्तेयान् निरस्यामः स्वयुक्तिभिः॥ इति

मधुसूदनसरस्वतीस्वामिभिः भगवद्गीतायाः व्याख्यानम् अपि कृतम् । तत् व्याख्यानम् अत्यन्तं रमणीयम् अस्ति ।

अयं ग्रन्थः नव्यवेदान्तप्रस्थाने मूर्धन्यभूतः सन् विराजते । तत्र कैश्चित् विद्वद्भिः उच्यते "[9] यदि नाम केनचित् बाह्यवस्तुना अयं महान् ग्रन्थः उपमीयते , तर्हि शैलाधिराजस्य उत्तुङ्गतया वारान्धेश्चागाधतया तुलामधिरूह्यात् । यथा वारिधिः, यथा च हिमवान् गिरिः अनन्तरत्नानां निधिः तथैव अयम् अनुत्तमो ग्रन्थाधिराजः इति वेदान्तविद्यानिश्नातैः अभिमन्यते । न केवलं भारतवर्षस्य अपि तु विश्वस्य दर्शनशास्त्रीयमौलीभूतनिबन्धानां तुलनात्मिका समीक्षा इममेव सिद्धान्तं द्रढयति यत् तेषु एकोपि अतलस्पर्शत्वेन गाम्भीर्येण च अद्वैतसिद्धेः कक्षां गाहितुं नालम्" इति । अस्य ग्रन्थस्य व्याख्यानानि बहूनि सन्ति । तत्र श्रीमद्गौडब्रह्मानन्दस्वामिभिः लघुचन्द्रिका गुरुचन्द्रिका च रचिता । अद्वैतसिद्धिग्रन्थे परिच्छेदचतुष्टयं वर्तते । अस्मिन् ग्रन्थे प्रथमपरिच्छेदे निरूपितान् विषयान् सङ्क्षेपेण निरूपयामि । येन अस्य ग्रन्थस्य अध्येतॄणाम् अत्यन्तम् आनुकूल्यं भवेत्। आदौ

- विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वम् अस्ति इति निरूपितम् ।ततः परं मिथ्यात्वलक्षणानि पञ्च निरूपितानि । तानि -

१. सदसत्वानधिकरणत्वरूपम् अनिर्वाच्यत्वं मिथ्यात्वम् ।

इदं लक्षणं पञ्चपादिकाग्रन्थोक्त "अनिर्वचनीयतावचनः" इति वचनात् प्राप्तम्।

२. प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वम् ।

---

[9] अद्वैतसिद्धिः (बालबोधिनीव्याख्यया युक्ता, सम्पादकीयनिवेदनतः इदं वचनम् उद्धृतम्)

इदं लक्षणं विवरणव्याख्याने प्रकाशात्मश्रीचरणैः उक्तम् । विवरणाचार्यैः “नेह नानास्ति किञ्चन” इति श्रुतिम् अनुसृत्य उक्तम् । विवरणव्याख्यानं पञ्चपादिका ग्रन्थस्य टीका ।

३. ज्ञानत्वेन ज्ञाननिवर्त्यत्वरूपं बाध्यत्वमेव मिथ्यात्वम् ।

इदमपि लक्षणं विवरणव्याख्याने प्रकाशात्मश्रीचरणैः उक्तम् । इदं वचनं तेषां “अज्ञानस्य स्वकार्येण वर्तमानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिः बाधः इति वचनानुसारेण उक्तम् । विवरणव्याख्यानं पञ्चपादिका ग्रन्थस्य टीका ।

४. स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं मिथ्यात्वम् ।

इदं लक्षणं तत्त्वदीपिकाकृतैः चित्सुखाचार्यैः उक्तम् ।

५. सद्विविक्तत्वं मिथ्यात्वम्

इदं लक्षणं आनन्दबोधभट्टारकैः उक्तम् । तैः न्यायदीपावली ग्रन्थः लिखितः । तत्रैव अयं विषयः निरूपितः ।

- जगतः मिथ्यात्वं साधयितुं चत्वारः हेतवः दर्शिताः ।

१. दृश्यत्वम्

तथा च अनुमानं विमतं मिथ्या दृश्यत्वात् ।

२. जडत्वम्

तथा च अनुमानं विमतं मिथ्या जडत्वात् ।

३. परिच्छिन्नत्वम्

तथा च अनुमानं विमतं मिथ्या परिच्छिन्नत्वात् ।

४. अंशित्वम्

तथा च अनुमानं विमतं मिथ्या अंशित्वात् ।

- एवं हेतून् निरूप्य एतेषु हेतुषु सोपाधिकत्वं उच्यते । तत्र स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वं , स्वबाधकाबाध्यं प्रति निषेध्यत्वेन विषयत्वम् इति उपाधिद्वयं प्रदर्श्य निराकृतम् ।
- विमतम् प्रातिभासकं द्रृश्यत्वात् , ब्रह्म मिथ्या व्यवहारविषयत्वात् , , ब्रह्म मिथ्या असद्विलक्षणत्वात् शुक्तिरुप्यवत् इति अनुमानानि दुष्टहेतुघटितत्वात् स्वार्थासाधकानि भवन्तः आभासरूपाणि सन्ति ।

न्यायशास्त्रम्

न्यायशास्त्रं द्विधा विभक्तुं शक्यते

१. प्राचीनन्यायशास्त्रं

२. नवीनन्यायशास्त्रम् इति।

प्राचीनन्यायशास्त्रं गौतममुनिना प्रणीतम् इति वक्तुं शक्यते । गौतममुनिभिः सूत्राणिप्रणीतानि । प्रथमं सूत्रं तावत् “ **प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाबासच्छल जातिनिग्रहस्थानानां तत्त्वज्ञानात् निश्रेयसाधिगमः** इति । न्यायसूत्राणां उपरि वात्सायनाचार्यैः भाष्यं लिखितम् । एवमेव उदयनाचार्यैः अपि न्यायकुसुमाञ्जलि इति ग्रन्थः लिखितः । एवमेव बहवः ग्रन्थाः प्राचीनन्यायशास्त्रे प्रसिद्धाः वर्तन्ते । नव्यन्यायशास्त्रं गङ्गेशोपाध्यायैः प्रवर्तितम् । तेषां ग्रन्थः “ तत्त्वचिन्तामणिः” इति।

तत्त्वचिन्तामणिग्रन्थः मणिग्रन्थः इत्येव जगति प्रसिद्धः । तत्त्वचिन्तामणेः कृते बहूनिव्याख्यानानि सन्ति । परन्तु तत्र प्रसिद्धानि व्याख्यानानि दीधितिः, माथुरी च इति द्वयम् । तत्र अत्यन्तं प्रसिद्धं व्याख्यानं दीधितिः इति । अयं ग्रन्थः रघुनाथशिरोमणिमहाभागैः लिखितः । अस्मिन् व्याख्याने तर्कशास्त्रस्य अत्यन्तः गहनः विषयः चर्चितः । दीधितेः व्याख्यानद्वयं वर्तते । प्रथमं व्याख्यानं जागदीशी इति । जागदीशी ग्रन्थः जगदीशतर्कालङ्काराचार्यैः लिखितः । दीधितेः अपरं व्याख्यानं गादाधरी

इति । गादाधरी ग्रन्थः गदाधरभट्टचार्यैः लिखितः । अत्यन्तं विस्तृतं व्याख्यानम् इदम् । प्रायेण नव्यन्यायसिद्धान्तविरुद्धाः इतः प्राक्तनाः युक्तयः एभिः आचार्यैः निराकृताः । जागदीशेः अनन्तरकालिकः ग्रन्थः सः गाधादरी इति । अस्मिन् ग्रन्थे जगदीशतर्कालङ्कारस्य बहवः अभिप्रायाः अनूद्य निराकृताः वर्तन्ते । जागदीश्यां गादाधर्यां च अस्ति मतभेदः । अवगमनसौलभ्यार्थं न्यायबोधिन्यां वर्तमानं विषयम् उदाहरामि ।

" **अन्तरवभासमानयोः विषयतयोः ऐक्यम्** " इति जागदीशिकाराः वदन्ति । परन्तु " **अन्तरवभासमानयोः विषयतयोः अवच्छेद्यावच्छेदकभावः** " इति गादाधर्यां वर्तते । पर्वतो वह्निमान् धूमात् इत्यत्र वह्निव्याप्यधूमवान् पर्वतः इति परामर्शः भवति । तथा च पूर्वोक्तनियमानुसारं जागदीशिमते परामर्शस्वरूपम् "**वह्नित्वावच्छिन्नवह्निनिष्ठप्रकारतानिरूपितव्याप्तत्वावच्छिन्नव्याप्तिनिष्ठप्रकारतानिरूपितधूमत्वावच्छिन्नधूमनिष्ठप्रकारतानिरूपितपर्वतत्वावच्छिन्नपर्वतनिष्ठविशेष्यतानिरूपकं ज्ञानं**" परामर्शः ।

पूर्वोक्तनियमानुसारं गादाधरीमते परामर्शस्वरूपं -

"**वह्नित्वावच्छिन्नवह्निनिष्ठप्रकारतानिरूपितविशेष्यत्वावच्छिन्नव्याप्तित्वावच्छिन्नव्याप्तिनिष्ठप्रकारतानिरूपितविशेष्यत्वावच्छिन्नधूमत्वावच्छिन्नधूमनिष्ठप्रकारतानिरूपितपर्वतत्वावच्छिन्नपर्वतनिष्ठविशेष्यतानिरूपकं ज्ञानं**" परामर्शः इति ।

तस्मात् गङ्गेशोपाध्यायप्रभृतिनव्यन्यायशास्त्रम् आरब्धम् ।

अद्वैतसिद्धौ तार्किकप्रमेयविमर्शः

मधुसूदनसरस्वतीस्वामिभिः बहुत्र तार्किकाणां सिद्धान्ताः अङ्गीकृत्य निरूपिताः वर्तन्ते । यथा पक्षता स्वरूपविमर्शः । अत्र मणिकारादितार्किकैः यादृशस्वरूपं अङ्गीकृतं तादृशम् एव स्वरूपं सिद्धिकारैः अपि उपपादितम् । एवमेव ध्वंसप्रागभावयोः अधिकरणे अत्यन्ताभावः न अङ्गीक्रियते इति प्राचीनानां मतं वर्तते । इदं प्राचीनानां मतं अङ्गीकृत्य सिद्धिकारैः उपपादनं कृतं वर्तते । परन्तु क्वचित् तार्किकाणां सिद्धान्ताः निराकृताः । यथा परमात्मनः वेदैक्यगम्यत्वं इति सिद्धिकारैः व्यासाचार्याणाम् आशयानुसारेण उक्तं वर्तते । परन्तु नैयायिकानाम् कृते इदं सम्मतं नास्ति । यतो हि नैयायिकैः अनुमानप्रमाणगम्यत्वं परमात्मनः उक्तं वर्तते । एवञ्च नैयायिकानाम् अयमाशयः सिद्धिकारैः खण्डितम् इति ज्ञायते ।

अत्र एकः विशेषः मया वक्तव्यः अस्ति । सिद्धिकारैः क्वचित् तार्किकाणां मतं अनेन निराकृतं भवति इति उक्त्वा निराकृतं वर्तते । तद्यथा ख्यातिनिरूपणावसरे आचार्याः अन्यथाख्यातिखण्डनम् इति उक्तवन्तः । एवमेव आकाशस्य अवृत्तित्वं नाङ्गीक्रियते इत्यपि उक्तवन्तः । एवमेव अन्यत्र सिद्धिकाराः स्वयं स्वसिद्धान्तम् उपपादितवन्तः । तेन परोक्षेण केषांचित् मतं खण्डितं भवति । तेषु क्वचित् नैयायिकानां मतम् अपि खण्डितं भवति । । अतः तेषां विमर्शः अवश्यं कर्तव्यः । तार्किकाः स्वस्य परमतत्वानुसारं अन्यत् सर्वं सिद्धान्तं योजयन्ति । अतः कदाचित् तार्किकदृष्ट्या सः

सिद्धान्तः सम्यक् भवेत् । परन्तु वेदान्तदृष्ट्या विचार्यमाणे तु कदाचित् तार्किकप्रमेयः निराकर्तव्यः भवे त्। अत्र मया आदौ अद्वैतिनां सिद्धान्तः उपपाद्यते । ग्रन्थे ग्रन्थकारैः येन अभिप्रायेण कश्चन प्रमेयः भागः उपपादितः सः भागः व्याख्यानादीनां गुरूणां च सहाय्येन स्वाभिप्रायं अपि योजयित्वा मया उपपादितः । ततः परं तस्य प्रमेयस्य विषये नैयायिकानां कः अभिप्रायः इति प्रामाणिकान् न्यायग्रन्थान् आधारीकृत्य विचारः उपपादितः । तन्मध्ये अथवा विचारान्ते उभयोः मतयोः प्रमेययोः साधकबाधकादिकं आकलय्यः विमर्शः कृतः।

द्वितीयः अध्यायः

विरोधः

(सिद्धिकारैः यत्र नैयायिकाः खण्डिताः तेषां भागानां विमर्शः)

वेदैकगम्यः परमात्मा

प्राचीनानाम भाष्यकारादीनां वचनं मनसि निधाय अद्वैतसिद्धिकारैः मङ्गलश्लोकलेखनावसरे “श्रुतिशिखोथ्थाखण्डधीगोचरः” इति लिखितम् । अधुना अस्य पदस्य विग्रहवाक्यम् उच्यते – श्रुतीनां शिखा तस्याः उत्था या अखण्डधीः तस्याः गोचरः इति । इदम् अज्ञानम् अथवा दृश्यं यथा अखण्डब्रह्माकारज्ञानेन नश्यति, तद्वत् अपाततः प्राप्तेन ब्रह्मज्ञानेन अपि नश्यताम् इति प्रश्नः । अतः सिद्धिकारैः परमात्मा श्रुतिशिखोत्थाखण्डधीगोचरः इति उक्तम् । अस्य अयमभिप्रायः – अत्र श्रुतिपदेन कर्मोपासनारूपः श्रुत्येकदेशः विवक्षितः । तादृशश्रुतीनां शिखास्थानीयं वर्तते महावाक्यार्थः । तादृशमहावाक्यार्थैः जनिता या अखण्डाकारा धीः तादृशाखण्डाकारया धिया एव दृश्यस्य उच्छेदः भवति । न तु आपाततः उत्पन्नेन ब्रह्मज्ञानेन । एवञ्च कर्मश्रुतीनां निष्कामकर्मानुष्ठापकपरत्वं, उपासनाश्रुतीनां उपासनानुष्ठापकपरत्वम्, निष्कामकर्मानुष्ठानेन चित्तशुद्धिः भवति । एवमेव उपासनानुष्ठानेन चित्तस्य एकाग्रता भवति । एतत्द्वयसम्पादकत्वं श्रुतीनां भवति । अतः श्रुतीनां महावाक्योपकारकत्वं सम्भवति । तेन महावाक्येन अखण्डाकारा धीः जायते । अतः एतावत् विचारणेन इदं ज्ञायते यत् परमात्मनः वेदैकगम्यत्वम् । एतादृशवाक्यलेखनं तेषाम् आत्मनः वेदैकगम्यत्वाभिप्रायं दृढयति । एतेन नैयायिकानां मतं निरस्तम् इति ज्ञयते ।


अधुना नैयायिकानां मतं वयं पश्यामः -

ईश्वरस्य सद्भावे प्रत्यक्षप्रमाणं भवितुं न अर्हति । यतो हि प्रत्यक्षं तावत् द्विविधम्।

१.बाह्यम्.

२.आभ्यन्तरश्चेति॥

द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषप्रत्यक्षत्वावच्छिन्नं प्रति समवायेन रूपं कारणम् इति कार्यकारणभावः अस्ति ।




एवञ्च एकस्य द्रव्यस्य प्रत्यक्षत्वं भवेत् चेत् तत्र समवायेन रूपम् अपेक्षितम् इति ज्ञायते । उदाहरणार्थम् – समवायेन रूपवतः एव घटस्य प्रत्यक्षत्वं संभवति । परन्तु ईश्वरे रूपं नास्ति इत्यतः तस्य बाह्यप्रत्यक्षविषयत्वं नास्ति ।

एवमेव आन्तरिकप्रत्यक्षविषयत्वम् अपि ईश्वरस्य नास्ति, यतो हि तत्र एवं कार्यकारणभावः अस्ति -

“आत्मवृत्तिलौकिकविषयतासम्बन्धेन मानसप्रत्यक्षत्वावच्छिन्नं प्रति समवायेन मनस्संयोगः कारणम्”

आत्मनि ज्ञानं यदा समवायेन वर्तते, तत्रैव मनसः संयोगः समवायसम्बन्धेन वर्तते, तदा आत्मनः प्रत्यक्षत्वं जायते ।



एवञ्च आत्मा यदि मानसप्रत्यक्षविषयः तर्हि मम मनसा गृह्येत । परन्तु अन्येन मनसा अन्यस्य प्रत्यक्षत्वं न सम्भवति इति कृत्वा परमात्मा न अस्मदादि मानसगोचरः । तस्मात् परमात्मा न मानसप्रत्यक्षविषयः ।

आत्मा न अनुमानप्रमाणगोचरः, अनुमानप्रमाणे तु आदौ साध्यहेत्वोः व्याप्तिः गृहीतव्या । सा व्याप्तिः तावत् सपक्षे गृह्यते । परन्तु ईश्वरसदृशस्य अन्यस्य अभावात् साध्यहेत्वोः व्याप्तिः न लभ्यते । अतः दृष्टान्ताभावात् ईश्वरसद्भावे न अनुमानं प्रमाणम् । उपमानप्रमाणं तु न वस्तु साधकं भवति । परन्तु विद्यमानयोः वाच्यवाचकभावं वदति । अतः प्रकृते ईश्वरसाधकप्रमाणम् उपमानं न भवितुम् अर्हति ।

आगमः अपि ईश्वरसद्भावे प्रमाणं भवितुम् न अर्हति । यतो हि परस्परम् अन्योन्याश्रयदोषः स्यात् । कथम् इति चेत् आगमः ईश्वरोक्तत्वात् प्रमाणम्, ईश्वरः आगमोक्तत्वात् प्रमाणं चेत् अवश्यम् अन्योन्याश्रयदोषः स्यादेव । अतः आगमः अपि ईश्वरसद्भावे प्रमाणं भवितुम् न अर्हति ।

तस्मात् चार्वाकैः उच्यते ईश्वरसद्भवे न किमपि प्रमाणम् अस्ति, अतः ईश्वरः नास्ति एव इति वदन्ति ।

अत्र नैयायिकाः वदन्ति ईश्वरस्य सद्भवे अस्ति प्रमाणम् इति । अतः तत्र अनुमानं प्रदर्शयन्ति ।

[1] **"क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात् घटवत् इति"**

इदं प्राधान्येन दर्शितम्, अत्यन्तं प्रसिद्धं च । अन्यानि अपि अनुमानानि [2]दिनकर्यां दर्शितानि

- सर्गाद्यकालीनद्व्यणुकप्रयोजकं कर्म प्रयत्नजन्यं कर्मत्वात्
- गुरुत्ववतां पतनाभावः पतनप्रतिबन्धकप्रयत्नप्रयुक्तः धृतित्वात् पक्षिपतनाभाववत्
- ब्रह्मण्डनाशः प्रयत्नजन्यः नाशत्वात् घटनाशवत्
- घटादिव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिककल्पितलिप्यादिव्यवहारवत्
- वेदजन्यप्रमा वक्तृयथार्थवाक्यार्थज्ञानजन्या शाब्दप्रमात्वात् चैत्रवाक्यजन्यप्रमावत्
- वेदः असंसारिपुरुषप्रणीतः वेदत्वात् यन्नैवं तन्नैवं यथा काव्यम्
- वेदः पौरुषेयः वाक्यत्वात् भारतादिवत्
- द्व्यणुकपरिमाणजनिका संख्या अपेक्षाबुद्धिजन्या एकत्वान्यसङ्ख्यात्वात्

इत्यादीनि अनुमानानि ईश्वरं साक्षात् परंपरया वा साधयन्ति । अत्र उदयनाचार्याणां कारिका प्रसिद्धा –

"[3]कार्याऽयोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः।

---

[1] दीपिका पृ सं ४१

[2]दिनकरी पृ स २९

[3] दिनकरी पृ स २९

वाक्यात्सङ्ख्याविशेषाच्च साध्यो विश्वविदव्यः ॥"

एवञ्च अनुमानप्रमाणेन ईश्वरं साधयन्ति नैयायिकाः ।

परन्तु वेदान्तिनां मते परमात्मा वेदैकगम्यः । परमात्मनः वेदैकगम्यत्वं शात्रयोनित्वाधिकरणे भगवत्पादैः निरूपितम् । तस्मिन् अधिकरणे शास्त्रयोनिपदं द्विधा व्याख्यातं भगवत्पादैः ।

- शास्त्रस्य योनिः शास्त्रयोनिः
- शास्त्रं योनिः यस्य इति शास्त्रयोनिः

प्रथमव्युत्पत्या तावद् समग्राम्नायस्य कारणं ब्रह्म इति ज्ञयते ।

द्वितीयव्युत्पत्या तावत् परमात्मा वेदैक्यगम्यः इति ज्ञायते । तदुक्तं भगवत्पादैः भाष्ये

"[4]**अथवा यथोक्तम् ऋग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य** ब्रह्मणः **यथावत्स्वरूपाधिगमे । शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यते इत्यभिप्रायः । शास्त्रमुदाहृतं पूर्वसूत्रे – "यतो वा इमानि भूतानि जायन्ते" इत्यादि।**

अत्र एव भगवत्पादानां भाष्यव्याख्यानावसरे न्यायनिर्णयकारैः उच्यते –

---

[4] ब्रह्मसूत्रशांकरभाष्यम् पृ स ५८

“[5]**अनुमानादपि लाघवानुगृहीतात्** ब्रह्म**स्वरूपधीसंभवात् तत्र शास्त्रमेव मानं इत्याशङ्क्याह- शास्त्रादिति। न तावदप्रत्यक्षं** ब्रह्म **वह्निवत् अविषेशतोऽनुमेयं, कार्यमात्रस्य कतृमात्रगमकत्वात्। न च लाघवात् तदैक्य धीः, विचित्रप्रासादादेः अनेककतृकस्यापि दृष्टत्वेन अनिर्णयात् । तथा च कर्तृः न सर्वज्ञत्वादि अनुमानलभ्यम्। शास्त्रे तु 'यतः' इति एकवचनात् कर्तैक्यसिद्धौ सर्वज्ञत्वादिसिद्धेः शास्त्रैक्यगम्यं** ब्रह्म **इति भावः ।**

भाष्यं व्याख्यानं च परिशीलयामः चेत् इदं ज्ञातुं शक्यते यत् परमात्मा वेदेन केवलं ज्ञतुं शक्यः इति । एवञ्च नैयायिकैः यत् उच्यते परमात्मा अनुमानप्रमाणगम्यः इति तत् प्रकृते निरस्तम् । अतः प्राचीनानाम् भाष्यकारादीनां वचनं मनसि निधाय अद्वैतसिद्धिकारैः अपि मङ्गलश्लोकलेखनावसरे “श्रुतिशिखोथ्थाखण्डधीगोचरः” इति लिखितम्। एतादृशवाक्यलेखनं तेषाम् आत्मनः वेदैक्यगम्यत्वाभिप्रायं दृढयति । एतेन नैयायिकानां मतं निरस्तम् ।

---

[5] ब्रह्मसूत्रशांकरभाष्यम् पृ स ५८ ,न्यायनिर्णयव्याख्या ५८

मोक्षस्वरूपम्

अद्वैतसिद्धिकाराः मङ्गलश्लोके एव अद्वैतसिद्धान्तानुसारं मोक्षस्वरूपम् उल्लिखितवन्तः । तथा च मोक्षस्वरूपघटितः मङ्गलश्लोकः अयं वर्तते-

[6]मायाकल्पितमातृतामुखमृषाद्वैतप्रपञ्चाश्रयः

सत्यज्ञानसुखात्मकः श्रुतिशिखोत्थाखण्डधीगोचरः।

मिथ्याबन्धविधूननेन परमानन्दैकतानात्मकं

मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः॥

अत्र मङ्गलश्लोके तृतीयचतुर्थपादयोः मोक्षस्वरूपं सिद्धिकारैः वर्णितम् । परमानन्दैकतानात्मकत्वं मोक्षस्य स्वरूपम् । परमानन्दैकतानात्मकत्वस्य स्वरूपं ब्रह्मानन्दीकाराः एवं वर्णयन्ति - [7]"निरतिशयापरिच्छिन्नसुखमात्रस्वरूपमित्यर्थः"। अत्र परमशब्दस्य अर्थः निरतिशयापारिच्छिन्नत्वम् इति। अत्र निरतिशयत्वं नाम अपकर्षानाश्रयत्वम् इति अर्थः । अस्माकं यः आनन्दः सः अन्यस्मात् आनन्दात् अपकृष्टः भवति । यतो हि तैत्तरीयोपनिषदि आनन्दतारतम्यस्य पट्टिका प्रदर्शिता । प्रत्येकम् आनन्दात् अग्रिमः आनन्दः शतगुणितं अधिकं भवति । अत्र पट्टिकायां अन्तिमः यः आनन्दः वर्तते सः आनन्दः मोक्षकालीनानन्दापेक्षया समुद्रे बिन्दुसमानः इति स्वयं

---

[6] अद्वैतसिद्धिः पृ सं १

[7] लघुचन्द्रिका पृ सं १०

आचार्याः एव वदन्ति । अतः ज्ञायते मोक्षकालीनः यः परमानन्दः तस्य अपेक्षया अधिकः आनन्दः कोऽपि नास्ति ।

अतः [8]उपनिषदि उक्ता आनन्दतारतम्यपट्टिका एवं वर्तते -

मानुषानन्दः

↓

मनुष्यगन्धर्वाणामानन्दः

↓

देवगन्धर्वाणामानन्दः

↓

आजानजानां देवानाम् आनन्दः

↓

कर्मदेवानाम् आनन्दः

↓

देवानाम् आनन्दः

↓

इन्द्रस्य आनन्दः

↓

[8] यजुरारण्यकम् पृ सं २०६ , २०७

पूर्वोक्तप्रकारेण मोक्षकालीनः यः परमानन्दः सः निरतिशयः इति ज्ञायते । एतादृशनिरतिशयानन्दः मोक्षः इति नैयायिकैः न उच्यते । एवमेव ब्रह्मानदीकारैः आनन्दस्य कृते अपरं विशेषाणं दत्तम् "अपरिच्छिन्नत्वम्" इति । अयम् अनन्दः कालतः देशतः वस्तुतः अपि परिच्छेदरहितम् इति अर्थः । अत्र मात्रशब्दः व्याख्याकारैः प्रयुक्तः । तेन दुःखलेशेन अपि अस्पृष्टत्वं ज्ञायते । सिद्धिकारैः अद्वैतसिद्धान्तोक्तरीत्या मोक्षस्वरूपं वर्णितं मङ्गलश्लोके । अनेन तार्किकाः निराकृताः इति ज्ञायते । अत्र मया तार्किकाः इत्यनेन प्राचीननवीननैयायिकाः विवक्षिताः । तार्किकाणां मते अपि मोक्षकाले

दुःखलेशः अपि नाङ्गीक्रियते । परन्तु नैयायिकाः द्वैतिनः , न तु अद्वैतिनः । मोक्षकाले वेदान्तिनः जीवात्मपरमात्मनोः अभेदम् वदन्ति । परन्तु नैयायिकाः भेदमेव कथयन्ति । अयं भेदः विशेषेण मतद्वये वर्तते ।

अधुना नैयायिकानां मते मोक्षस्वरूपस्य निरूपणं कथम् इति पश्यामः ।अपवर्गः नाम आत्यन्तिकी दुःखनिवृत्तिः । दुःखानि विंशतिः वर्तन्ते ।

- शरीरम्
- षडिन्द्रियाणि
- षट् विषयाः
- षट् बुद्धयः
- सुखम्
- दुःखम् च इति

षडिन्द्रियाणि कानि इति चेत् - चक्षुः, रसनं, घ्राणं, श्रोत्रं, मनः, त्वक् इत्येतानि।

षट् विषयाः - रूपं, रसः,गन्धः,स्पर्शः,शब्दः इति

अत्र अयं प्रश्नः जागर्ति यत् दुःखत्वजातिशून्येषु शरीरादिषु कथं दुःखत्वम् इति । परन्तु शरीरादीनां दुःखसम्बन्धित्वात् एव दुःखत्वम् इति । अतः शरीरादिषु दुःखत्वव्यवहारः गौणः इति ज्ञातव्यम् । स्वर्गादि सुखस्य नाशभयं तावत् सर्वेषाम् अस्ति एव , अतः सहजतया एव तस्य दुःखसम्बन्धित्वम् आयातम् । परन्तु अत्र अन्यः प्रश्नः

उदेति – दुःखस्य निवृत्तिः नाम नाशः, एकविंशतिदुःखेषु नित्यपदार्थयोः मनसः श्रवणस्य च अन्तर्भावः अस्ति । परन्तु तयोः नित्यत्वादेव नाशः अनुपपन्नः । तर्हि अत्र निवर्तमानेषु दुःखेषु तयोः अन्तर्भावः कथम् इति । अत्र उच्यते यद्रूपविशिष्टस्य श्रवणस्य ज्ञानद्वारा दुःखहेतुतया दःखत्वं, तद्रूपस्य कर्णशष्कुल्या नाशे तद्विशिष्टश्रवणेन्द्रियरूपदुःखनाशः इति । एवमेव आत्मसंयोगरूपव्यापारविशिष्टस्य एव मनसः ज्ञानद्वारा दुःखहेतुतया दःखत्वं, व्यापारनाशेन तद्विशिष्टमनोरूपदुःखनाशसंभवात् इति ।

दुःखनिवृत्तौ आत्यन्तिकत्वं नाम किम् इति चिन्तनीयम् । दुःखनिवृत्तौ आत्यन्तिकत्वं नाम "[9]**स्वसमानाधिकरणदुःखासमानकालीनत्वम्**" संसारदशायां या दुःखनिवृत्तिः सा स्वसमानाधिकरणदुःखान्तरसमानकालीना भवति । स्वं दुःखनिवृत्तिः, तदधिकरणं संसारीजीवः, तद्वृत्ति यत् दुःखं तत्समानकालीना पूर्वतनदुःनिवृत्तिः, अपवर्गरूपा या दुःखनिवृत्तिः सा तु स्वसमानकालीनदुःखसमानकालीना न भवति । तस्मिन् काले आत्मनि दुःखस्य अभावात् । अत्र इदं चिन्तनीयं वर्तते यत् मुक्तात्मनिष्ठयाः कथं स्वसमानाधिकरणदुःखासमानकालीनत्वम् इति । स्वाधिकरणवृत्तिदुःखस्य अप्रसिद्धेः इति । अत्र उच्यते स्वाधिकरणवृत्तिदुःखसमानकालीना या दुःखनिवृत्तिः तद्भिन्ना दुःखनिवृत्तिः अपवर्गः इति आशयात् । स्वपदेन संसारीजीववृत्तिदुःखनिवृत्तिः गृह्यते ,सा

---

9 दिनकरी पृ सं ३२

स्वाधिकरणजीववृत्तिदुःखसमानकालीना भवति । तद्भिन्नत्वं मुक्तात्मनिष्ठायां दुःखनिवृत्तौ इति न कोऽपि दोषः । एतादृशदुःखध्वंसस्य मुक्तित्वे मुक्तेः तत्त्वज्ञानसाध्यता कथं भवति इति चिन्तनीयम् । यतो हि मोक्षस्तु तत्त्वज्ञानेन एव भवति इति सकलशास्त्रप्रसिद्धम् । अतः अयं प्रश्नः उत्पन्नः । अत्र उच्यते गौतमऋषिणा -

‘‘[10]**दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानां उत्तरोत्तरापाये तदनन्तरापायाद् अपवर्गः” इति**

अस्य अर्थः चिन्तनीयः – आत्यन्तिकदुःखध्वंसस्य मोक्षत्वे तस्य केन प्रकारेण पदार्थतत्त्वज्ञानजन्यत्वम् इति शङ्कायां सः प्रकारः उच्यते – पदार्थतत्त्वज्ञानेन अनात्मनि आत्मभ्रमादिरूपमिथ्याज्ञानजन्यसंस्कारस्य नाशः । संस्कारनाशे च संस्कारमूलकस्य रागादिदोषस्य अभावः । रागादिरूपहेत्वभावे च धर्माधर्मादिरूपप्रवृत्तेः अनुत्पत्तिः । प्रवृत्तेः अनुत्पत्तौ च देहान्तरसंबन्धरूपस्य जन्मनः अभावः । जन्माभावे च दुःखानुत्पत्तिः । दुःखानुत्पत्तौ च दुःखनिवृत्तौ स्वसमानाधिकरणदुःखासमानकालीनत्वरूपविशेषणसंबन्धः भवति । तथा च स्वसमानाधिकरणदुःखासमानकालीनत्वविशिष्टदुःखनिवृत्तिरूपः अपवर्गः संपद्यते । तथा च दुःखासमानकालीनत्वरूपविशेषणांशे तत्त्वज्ञानस्य उक्तपरम्परया हेतुत्वात् विशिष्टमोक्षस्य तत्त्वज्ञानजन्यत्वम् ।

अत्र अयं क्रमः – अनात्मनि देहे आत्मबुध्यादिरूपमिथ्याज्ञानात् यः संस्कारः तद्वशात् रागदोषादयः दोषाः भवन्ति । दोषवशाच्च धर्माधर्मरूपा प्रवृत्तिः जायते । तद्वशाच्च

---

[10] गौतमसूत्रं अ १ आ १ सू २

शरीरान्तरसंबन्धरूपं जन्म भवति । ततः दुःखं भवति । पदार्थतत्त्वज्ञानेन मिथ्याज्ञाने नष्टे तेन जन्य वासनायाः च नाशे वासनाविशिष्टरागादिरूपस्य प्रवृत्तिहेतोः अभावः । रागाद्यभावाच्च प्रवृत्त्यभावः । तदभावात् जन्माभावः । तदभावाच्च दुःखानुत्पत्तिः इति । दुःखानुत्पत्या च स्वसमानाधिकरणदुःखासमानकालीनः दुःखध्वंसो भवति ।

तत्त्वज्ञानेन प्रारब्धकर्मजन्यादृष्टस्यापि नाशात् तत्त्वज्ञानाव्यवहितोत्तरं मोक्षप्रसङ्गः इति न चिन्तनीयम् । यतो हि भोगन प्रारब्धकर्मजन्यादृष्टस्य निवृत्तिः । तत्त्वज्ञानेन तद्भिन्नकर्मजन्यादृष्टस्य निवृत्तिः । तथा च प्रारब्धस्य भोगेन एव क्षपयितव्यत्वात् न तत्त्वज्ञानाव्यवहितोत्तरं मुक्तेः आपत्तिः इति ।


इदानीं एकविंशतिदुःखध्वंसस्य तत्त्वज्ञानसाध्यत्वं कथम् इत्युक्ते स्वकारणनाशादेव इति वदन्ति । एवञ्च एतावता प्राचीनन्यायमतानुसारेण मोक्षस्वरूपं विचारितम् ।

नवीननैयायिकमतानुसारं मोक्षस्वरूपम् उच्यते –


नवीनमतानुसारं चरमदुःखध्वंसः न तत्त्वज्ञानप्रयोज्यः । यतोहि अत्र कश्चन नियमः स्मर्तव्यः "[11]**योग्यविभुविशेषगुणानां स्वोत्तरवर्ति योग्यविभुविशेषगुणनाश्यत्वम्**" इति । अस्य अयमर्थः - विभुविशेषगुणानाम् अयं स्वभावः यत् स्वोत्पादकं गुणं स्वं नाशयति । उदाहरणार्थम् – एकः शब्दः शब्दान्तरं उत्पादयति । सः शब्दः स्वस्य द्वितीयक्षणे पूर्वतनं शब्दं नाशयति अन्यं शब्दम् उत्पादयति ।

---

[11] मुक्तावली पृ सं ९८



ज्ञानस्य अपि चित्रम्



एवमेव ज्ञानस्य अपि द्विक्षणावस्थायित्वम् अस्ति । अतः नवीनाः वदन्ति योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवर्तिगुणानां कारणत्वात्, स्वोत्तरोत्पन्नगुणेन एव दुःखध्वंसरूपमुक्तिसंभवेन, न तत्र तत्त्वज्ञानापेक्षा इति दुःखपदं दुःखसाधनदुःखपरत्या

व्याख्येयं, दुरितस्य च योग्यगुणत्वाभावात् न स्वोत्तरवर्ति गुणनाश्येन इति तन्नाशरूपमुक्तेः तत्त्वज्ञानसाध्यत्वमेवैति वदन्ति ।

एतावता नवीनप्राचीनमतानुसारं मुक्तिस्वरूपं दृष्टम् । अधुना अद्वैतसिद्धिकारोक्तक्रमेण वेदान्तमते मुक्तिस्वरूपं किम् इति चिन्तनीयम् । अद्वैतसिद्धिकारैः मङ्गलश्लोके उच्यते "**परमानन्दैकतानात्मकः मोक्षः"** इति । अस्य अभिप्रायः चिन्तनीयः ।

उपनिषदां मोक्षशास्त्रत्वेन प्रसिद्धिः अस्ति । तर्हि कीदृशः मोक्षः उपनिषत्सु प्रसिद्धः इति चिन्तनीयम् । भाष्यकारादयस्तु अविद्यानिवृत्युपलक्षितः आनन्दः मोक्षः इति वदन्ति । एषा अविद्यानिवृत्तिः आत्मतत्त्वसाक्षात्कारसाध्या इति शास्त्रं वदति । मोक्षः नाम आनन्दरूपः इति उक्तम्, अयम् आनन्दः आत्मस्वरूपः एव । अत्र श्रुतिः प्रमाणम् "[12]विज्ञानम् आनन्दं ब्रह्म" इति । इदम् आत्मस्वरूपम् अविद्यया आवृतत्वात् न प्रकाशते । अतः शास्त्रं वदति , अविद्या निवृत्तौ सति आत्मतत्वं प्रकाशते इति । यतो हि अविद्या निवृत्तिः नाम आत्मस्वरूपमेव । अस्माकं तु व्यवहारे भाट्टनयः इति वर्तते । भाट्टमते तु अभावानाम् अधिकरणात्मकत्वम्, अतः अत्रापि अविद्यानिवृत्तिः नाम आत्मस्वरूपमेव ।

अधुना उक्तेषु विषयेषु प्रमाणं पश्यामः -

---

[12] बृहदारण्यकोपनिषत् अ.३, ब्र.९, म २२

[13]पुरुष एवेदं विश्वं तपोब्रह्म परामृतम् ।

एतद्यो वेदनिहतं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य॥

अत्र "पुरुष एवेदं विश्वम्" इत्यनेन प्रपञ्चस्य मिथ्यात्वं प्रतिपादितम् । एवमेव अद्वितीयात्मज्ञानात् अविद्या निवृत्तिः अपि कथितं भवति ।

एवमेव ईशावास्योपनिषदि अपि श्रूयते -

"[14]यस्मिन् सर्वाणि भूतानि आत्मैवाभूत् विजानतः ।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः"

अत्र "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इत्यनेन जीवब्रह्मणोः ऐक्यज्ञानात् शोकमोहयोः निवृत्तिः उच्यते । शोकमोहयोः अविद्याकार्यत्वात् मूलभूतायाः अविद्याः निवृत्तौ शोकमोहयोः अपि निवृत्तिः ।

"[15]क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"

सर्वं कर्म अविद्या मूलभूतम् एव। तस्मात् मूलभूतायाः अविद्यायाः निवृत्तौ सर्वं कर्म निवर्तते इति अभिप्रायः । वस्तुतः आनन्दस्वरूपं नित्यप्राप्तमेव । तथापि अप्राप्तत्वभ्रमः अस्माकं सर्वेषां भवति ।

---

[13] मुण्डकोपनिषत् मु २ , ख १, मं १०

[14] ईशावास्योपनिषत् मं स ७

[15] मुण्डकोपनिषत् मु २ ख २ मं ९

लेशसंग्रहे एतत् विषये एवं लिखितम् अप्पय्यदीक्षितेन्द्रैः

“[16]अत्राहुः केचित् – नित्यप्राप्तेऽप्यर्थे अप्राप्तत्वभ्रान्त्या तस्य प्राप्त्यर्थं तदुचितोपायेषु प्रवृत्तेः लोके दृष्टत्वात् । यथा स्वकण्ठगतमेव कनकाभरणं भ्रान्त्या अप्राप्तमपि परोपदेशेन प्राप्तमिव भवति । तद्वत् स्वरूपानन्दोऽपि अविद्यया अप्राप्तः सन् अकृतार्थताम् अजनयत् । प्राचीनसुकृतवशात् गुरुवेदान्तवाक्यैः उदितायां विद्यायां निवर्तितायाम् अविद्यायां निवर्तते च निखिलानर्थविक्षेपे प्राप्तः सन् कृतकृत्यतां जनयति । तस्य प्राप्तिश्च औपचारिक्यमेवेति ।”

अतः एव वेदे उच्यते “[17]ब्रह्म एव सन् ब्रह्माप्येति” इति । अयमेव मोक्षः भिन्न भिन्न स्थलेषु भिन्नभिन्नरूपेण कीर्त्यते । विशिष्टाद्वैतिनः तु मोक्षकाले जीवस्य ब्रह्मानुभवं न अङ्गीकुर्वन्ति । यतो हि विशिष्टाद्वैतमते जीवब्रह्मणोः अत्यन्तं भेदः उच्यते । अपि तु अद्वैतवेदान्ते अहङ्ग्रहोपासकानां यत् फलम् उच्यते ब्रह्मलोकप्राप्तिरूपं तदेव मुख्यः मोक्षः इति उच्यते । एवञ्च एतादृशानां पूर्वजानाम् अभिप्रायं मनसि निधाय अद्वैतसिद्धिकाराः उक्तवन्तः परमानन्दैकतानात्मकः मोक्षः इति । परमानन्दैकतानात्मकः नाम परमानन्दप्राप्तिः एव । एवञ्च नैयायिकानाम् अपेक्षया वेदान्तिनाम् अस्ति मतभेदः मोक्षस्वरूपविषये ।

---

[16] सिद्धान्तलेशसंग्रः पृ स ६१

[17] बृहदारण्यकोपनिषत् अ ४, ब्र ४ , मं ६

जगन्मिथ्यात्वम्

अद्वैतसिद्धिकारैः "[18]मायाकल्पितमातृतामुखमृषाद्वैतप्रपञ्चाश्रयः" **इति मङ्गलश्लोके लिखितम् । अस्य अयमर्थः –** [19]**मायया कल्पितं मायाकल्पितम्। अस्य मायया प्रयुक्तम् इत्येव अर्थः। मायाकल्पितम् इत्यस्य मायाजन्यम् इति अर्थः न वक्तव्यः । कुतः इति चेत् अनादिभूतानां जीवेश्वरभेदानां जन्यत्वानुपपत्तिः । अनादिदृश्येऽपि मायाप्रयुक्तत्वम् अक्षतमेव । मायानिवृत्या निवृत्तत्वादित्यर्थः। माया नाम अनादिभावरूपत्वे सति ज्ञाननिवर्त्या । मायाकल्पितम् अत एव मृषाभूतं यत् मातृतामुखं प्रमातृत्वप्रमाणत्वप्रमितित्वप्रमेयत्वरूपं द्वैतमात्रम् आत्मभिन्नम्, तदभिन्नो यः प्रपञ्चः तदाश्रय इत्यर्थः । एवं मङ्गलपद्यस्य अनेन भागेन अद्वैतसिद्धिकारैः जगतः मिथ्यात्वं प्रतिपादितम् ।** ब्रह्मसत्यं **जगन्मिथ्या इत्येव अद्वैतिनां प्रधानः आशयः । शास्त्रे चत्वारः वादाः प्रसिद्धाः । ते च -**

१. आरम्भवादः

२. सङ्घातवादः

३. परिणामवादः

[18] अद्वैतसिद्धिः बालबोधिनीव्याख्यासहतं पृ सं १

[19] अद्वैतसिद्धिः बालबोधिनीव्याख्यासहतं पृ सं २

४. विवर्तवादः

1. आरम्भवादः –

अयं वादः नैयायिकानां वर्तते । तेषाम् अयमाशयः- उत्पत्तेः पूर्वं सर्वम् असदेव इदं जगत् आसीत् । परम् पूर्वम् अविद्यमानं नूतनम् उत्पद्यते इति । अस्य एव असत्कार्यवादः इति उच्यते । यथा पूर्वम् अविद्यमानः घटः स्वकारणे समवायेन उत्पद्यते । नैयायिकैः जगतः वास्तवत्वम् उच्यते ।

2. सङ्घातवादः –

अयं वादः बौद्धानां वर्तते । तेषामयमाशयः – अवयवस्य अपेक्षया अवयविभेदः नास्ति । परमाणूनां पुञ्जः एव अवयवी इति । तस्मात् परमाणूनां समूहं प्रति एव घटः स्थूलः इत्यादि व्यवहारः। अयमेव सङ्घातवादो नाम । अत्र एकः प्रश्नः उदेति – परमाणवः अतीन्द्रियाः इत्यतः तस्य समूहः यः घटः सः अपि अतीन्द्रियः स्यात् इति । परन्तु अस्य प्रश्नास्य एवं समाधानं वर्तते यत् – यथा एकः केशः दूरे वर्तमानः प्रत्यक्षः न भवति , परन्तु दूरे केशानां समूहः वर्तते चेत् सः प्रत्यक्षः भवति । तद्वत् एकः परमाणुः अप्रत्यक्षः चेदपि परमाणुसमूहः प्रत्यक्षः भवत्येव इति उच्यते । एतेषां पक्षे कपालात्मकात् पुञ्जात् घटात्मकः पुञ्जः उत्पद्यते । पुञ्जात् पुञ्जोत्पत्तिः इति व्यवहारः ।

3. परिमाणवादः –

अयं साङ्ख्यानां पक्षः वर्तते । तेषाम् अयमाशयः मृत्तिका घटाकारेण परिणमते। एवमेव प्रधानं जगदाकारेण परिणमते । अस्मिन्मते कर्तृत्वं वस्तुतः अन्तःकरणस्य एव । परन्तु तादृशस्य अन्तःकरणस्य कारणत्वात् प्रधाने अपि कर्तृत्वव्यवहारः । पुरुषस्तु निर्लिप्तः एव भवति ।

4. विवर्तवादः –

अयम् अद्वैतवेदान्तिनां पक्षः। तेषाम् अयमाशयः – कारणसमसत्ताकः अन्यथाभावः परिणामः। कारणविषमसत्ताकः अन्यथाभावः विवर्तः। अधुना एतदनुसारेण चिन्तनं कर्तव्यम्। ब्रह्म जगदाकारेण विवर्तते इति वेदान्तसिद्धन्तः । विवर्तः नाम पूर्वोक्तरूपेण उपादानविषमसत्ताककार्यापत्तिः । अस्य अयमर्थः – उपादानस्य या सत्ता तद्भिन्न सत्ता यस्य कार्यस्य वर्तते सः विवर्तः । वस्तुतः अत्रापि सत्ताः विषये ज्ञातव्यम् । त्रिवधा सत्ता वेदान्तिभिः अङ्गीक्रियते ।

१. पारमार्थिकी सत्ता

२. व्यावहारकी सत्ता

३. प्रातिभासिकी सत्ता

कालत्रयेऽपि यस्य बाधः न भवति, सा पारमार्थिकी सत्ता। उदाहरणाम् – ब्रह्मणः सत्ता कालत्रयेऽपि बाधितं न भवति इत्यतः सा सत्ता पारमार्थिकी सत्ता । व्यावहारिकी सत्ता नाम ब्रह्मप्रमातिरिक्ताबाध्यत्वम् इत्यर्थः । उदाहरणम् – घटः । घटस्य परमात्मज्ञानं विना प्रकारान्तरेण बाधः नास्ति । परन्तु पटज्ञानात्

घटज्ञानस्य निवृत्तिः भवितुम् अर्हति। प्रातिभासिकी सत्ता नाम ब्रह्मप्रमातिरिक्तबाध्यत्वम् इत्यर्थः । उदाहरणं – रज्जौ सर्पज्ञानम् । अत्र सर्पज्ञानस्य ब्रह्मज्ञानभिन्नेन रज्जुज्ञानेन बाधः भवति । अतः तस्मिन् सर्पे प्रातिभासिकी सत्ता अस्ति इति उच्यते । शुक्तौ रजतज्ञानम् इत्यत्र उपादानस्य रजतस्य या व्यावहारिकी सत्ता, तद्विषमसत्ता व्यावहारिकसत्ताभिन्नसत्ता रजतस्य वर्तते । सा प्रातिभासिकीसत्ता । अतः रजतं विवर्तते इति उच्यते । एवमेव जगतः व्यावहारिकी सत्ता । ब्रह्मणः पारमार्थिकी सत्ता । तस्मात् ब्रह्म जगदाकारेण विवर्तते इति उच्यते । माया तु जगदाकारेण परिणमते इति उच्यते । यतो हि जगतः मायायाश्च समानासत्ता वर्तते । तस्मात् परिमणते इति उच्यते । एवञ्च प्राचीनानाम् एतादृशम् आशयं मनसि निधाय अद्वैतसिद्धिकारैः जगत् मिथ्या इति उक्तम् ।

नैयायिकाः तु द्वैतिनः। नैयायिकैः जगतः सत्यत्वम् अङ्गीक्रियते । तस्मात् प्रकृते नैयायिकनां सिद्धान्तः सिद्धिकारैः खण्डितः इति ज्ञायते ।

सामान्यलक्षणज्ञानलक्षणप्रत्यासत्त्योः खण्डनम्

अद्वैतसिद्धौ प्रत्यक्षबाधोद्धारे सत्त्वानिरुक्तिः इति प्रकरणे पूर्वपक्षिभिः सत्त्वस्य निर्वचनम् इत्थं क्रियते – सर्वदेशीयत्रैकालिकनिषेधाप्रतियोगित्त्वम् । इदं च सत्त्वं चक्षुषा ग्रहीतुं न शक्यते इति प्रत्यक्षायोग्यत्वात् दुष्टम् इति स्थापितम् । अस्य च सत्त्वस्य प्रत्यक्षयोग्यत्त्वं साधयितुं लौकिकसन्निकर्षः संयोगादिः न क्षमते चेदपि अलौकिकसन्निकर्षेण सामान्यलक्षणप्रत्यासत्त्या सत्त्वं ग्रहीतुं शक्यते एव। एवञ्चेदपि दोषः अन्यः उच्यते सामान्यलक्षणया सर्वनिषेधाः उपस्थिताः भवन्तु नाम परन्तु तत्प्रतियोगित्त्वाभावः चक्षुषा ग्रहीतुम् अशक्यः एव । चक्षुषा ग्रहीतुम् अशक्यं सामान्यलक्षणप्रत्यासत्त्या ग्रहीतुं न शक्यते । यथा न हि गुरुत्वं सामान्यलक्षणप्रत्यासत्त्या गृह्यते अपि तु महानसादिषु दृष्टः धूमः वन्हिः वा वह्नित्त्वेन धूमत्वेन वा सामान्यलक्षणप्रत्यासत्त्या सकलेषु धूमवत्सु वह्निमत्सु वा प्रदेशेषु साक्षात्क्रियते । एवम् इह निषेधप्रतियोगित्वं सामान्यलक्षणप्रत्यासत्त्या साक्षात्कर्तुं न शक्यम् । कस्मात् तेषाम् अतीन्द्रियसाधारणत्वात् । तथा च सिद्धं योग्यप्रतियोगिकः एव संसर्गाभावः प्रत्यक्षयोग्यः । येन संसर्गेण प्रतियोगिनः वैशिष्ट्यं तदुपलम्भस्य आपादकं तेन संसर्गेण अवच्छिन्नप्रतियोगिताकः अभावः प्रत्यक्षः । निरुक्तं सत्वं सर्वदेशकालवृत्तिनिषेधाप्रतियोगि । तत्र निषेधस्यैव सामान्यलक्षणप्रत्यासत्त्या ग्रहीतुमशक्यत्वात् तत्प्रतियोगिनः कथञ्चिदपि

ग्रहणं न भवतीति सामान्यलक्षणप्रत्यासत्त्या अपि सत्वं ग्रहीतुं न शक्यते इत्ययं विषयः स्थापितः।

तत्र अद्वैतसिद्धौ उच्यते सामान्यं नेन्द्रियप्रत्यासत्तिः मानाभावात् । अत्र पूर्वपक्षिणः सामान्यस्य इन्द्रियप्रत्यासत्तित्वे चतुरः हेतून् प्रदर्शयन्ति । सामान्यलक्षणप्रत्यासत्त्यनङ्गीकारे च दोषाश्च भवन्ति इति निरूप्यते।

सामान्यलक्षणाप्रत्यासत्तिखण्डनम् -

"वस्तुतस्तु सामान्यलक्षणाप्रत्यासत्तिः अङ्गीकर्तुं न शक्या" तदङ्गीकारे पूर्वपक्षिणां युक्तयः तासां खण्डनं च क्रियते । सा प्रत्यासत्तिः नैयायिकैः कुतः अङ्गीक्रियते इति तस्य लक्षणसमन्वयपुरस्सरम् अन्ते प्रदर्श्यते । अधुना आदौ अद्वैतसिद्धिकाराणां आशयाः विस्तरेण प्रदर्श्यन्ते ।

सामान्यलक्षणप्रत्यासत्त्यनङ्गीकारे "पर्वतो वह्निमान्" इति अनुमितिः न स्यात् । तथा हि व्याप्तिज्ञानम् अनुमितिं जनयति । व्याप्तिः नाम साहचर्यनियमः इति उच्यते । महानसे महानसीयधूमवह्निसाहचर्यमतः पर्वतीयवह्निधूमात् अनुमितिः न स्यात् । यतो हि तत्र व्याप्तिग्रहाभावः वर्तते । तत्र सामान्यलक्षणप्रत्यासत्त्या पर्वतीयधूमे धूमत्वाविशेषात् व्याप्तिग्रहो भवति तेन वन्ह्यनुमितिः जायते इति पूर्वपक्षः ।

सिद्धान्तः – मैवम् । सामान्यलक्षणप्रत्यासत्तिम् अनङ्गीकृत्य अपि पर्वतीयधूमात् अनुमितिः उपपादयितुं शक्यते । अयमाशयः - महानसे महानसीयधूमे केन प्रकारेण

व्याप्तिः गृहीता लाघवात् धूमत्वेन एव । व्याप्तिग्रहणजन्यसंस्कारः धूमत्वेन पर्वतीयधूमज्ञाने उत्पन्नो भवति । तदुत्तरं व्याप्तिस्मरणं भवति । पर्वतीयधूमस्य व्याप्त्या सह असंसर्गग्रहः वर्तते । तथा च वह्निव्याप्तिवैशिष्ट्यं पर्वतीयधूमेऽपि गृह्यते । तत्र विशिष्टज्ञानं प्रति त्रीणि कारणानि भवन्ति ।

१. विशेष्येण सह इन्द्रियसन्निकर्षः

२. विशेषणज्ञानम्

३. विशेषणस्य विशेष्येण सह असंसर्गाग्रहः

तथा हि विशेष्यं धूमः, स च इन्द्रियसन्निकृष्टः। धूमत्वज्ञानं च वर्तते । धूमत्वस्य धूमेन सह संसर्गः नास्ति इत्यपि न गृहीमतः पर्वतीयधूमादपि अनुमितिः जायते सामान्यलक्षणप्रत्यासत्तिम् अनङ्गीकृत्यापि । सुरभि चन्दनमत्र उदाहरणम्।

द्वितीया युक्तिः –

सामान्यलक्षणप्रत्यासत्तिं विना धूमः वह्निव्यभिचारी न वा इति अनुभूयमानः संशयः उपपादयितुं न शक्यते । धूमः प्रसिद्धश्चेत् तत्र संशयः एव न भवति । अप्रसिद्धश्चेत् अज्ञातत्वादेव तत्र संशयः न भवति अतः-

सिद्धान्तः – सामान्यलक्षणप्रत्यासत्तिं विनापि संशयः उपपादयितुं शक्यते। प्रसिद्धधूमविषयकः संशयः वक्तुं न शक्यः तत्तद्व्यक्तित्वेन निश्चयात् परं तु धूमत्वे धूमविषयकसंशयः उपपद्यते एव ।

अत्र च अभियुक्तानामुक्तिः प्रमाणं "घटत्वेन इतरभेदनिश्चयेऽपि पृथिवीत्वादिना तत्र संशयसिषाधयिषे भवत एव" इति। निश्चितेऽपि अर्थे प्रमात्वसन्देहे जाते प्रमेयसंशयः भवति तथा धूमत्वं वह्निव्यभिचारी न वा इति संशयः वक्तुं शक्यः।

अत एव वायुः रूपवान् न वा इति संशयः उपपादयितुं शक्यते।

तृतीया युक्तिः –

सामान्यालक्षणप्रत्यासत्त्यनङ्गीकारे तृतीयैषा युक्तिः – ननु सिद्धे वस्तुनि इच्छा न भवति असिद्धे एव इच्छा भवति। सा च असिद्धविषयिणी इच्छा समानविषयकज्ञानं विना न जायते। समानविषयकज्ञानं च प्रत्यासत्तिं विना न संभवति इति।

सिद्धविषयकसुखप्रकारकज्ञानात् अज्ञानेऽपि सुखे इच्छा भवितुमर्हति। "समानप्रकारकज्ञानात् इच्छा" इत्येव तन्त्रं तस्मात् अज्ञाते सुखे इच्छा वक्तुं न शक्यते इति न च वाच्यम्।

एवं नियमाङ्गीकारे रजतत्वेन प्रकारेण ज्ञायमाने घटादौ अपि रजतत्त्वप्रकारकैच्छा स्यात् समानप्रकारकत्वमात्रस्य नियामकत्वात्।

समानप्रकाराश्रयत्वम् इच्छां प्रति नियामकं भवतु इत्यपि वक्तुं न शक्यते। प्रतीतिविरोधात् रजतभ्रमात् शुक्तौ इच्छा स्यात् यदि समानप्रकाराश्रयत्वं रजतत्त्वप्रकाराश्रयत्वं शुक्तौ नास्ति। अतः सर्वेषामपि इच्छा तत्र इच्छा न स्यात्।

तथा च समानप्रकारकत्वे सति समानविषयकत्वमिच्छोदये तन्त्रम् । यतः इदमेव तन्त्रमतः अरण्यातिपक्षे रजतस्मरणस्यैव शुक्तौ प्रवर्तकमिति अपास्तम् । अव्यदीपज्ञानेन अन्यत्र इच्छासम्भवात् ।

इत्येवं प्राप्ते उच्यते, रजतभ्रमात् शुक्तौ इच्छा नास्ति एव । परं रजतभ्रमात् अनिर्वचनीये रजते एव इच्छा भवति । किञ्च प्रकाराश्रयत्वं नियामकमिति अनिर्वचनीयापरण्यातिवादी वेदान्ती । तथा च इच्छोदये नियामकम् एतेन अन्यथारण्यातिपक्षः अपास्तः ।

एवं चेत् “इदं रजतम्” इति ज्ञानस्य भ्रमत्वमेव न स्यात् । तद्वृत्ति तत्प्रकारकज्ञानत्वात् अस्य । अधिकरणप्रकारकत्वेन भ्रमत्वं नास्ति ।

मैवम् । बाधितविषयत्वात् अस्य ज्ञानस्य भ्रमत्वं निश्चीयते । न तु तदभाववति तत्पर्कारकज्ञानत्वात् व्यधिकरणप्रकारकत्वमपि विषयबोधोत्तरमेव ज्ञातुं शक्यम् ।

चतुर्थी युक्तिः

सामान्यलक्षणप्रत्यासत्त्यनङ्गीकारे तमः प्रत्यक्षमिति वक्तुं शक्यते । अयमाशयः - अभावज्ञानं प्रति प्रतियोगिज्ञानं कारणम् इति नियमानुरोधेन प्रौढप्रकाशकयावत्तेजोऽभावरूपं तमः तदा प्रत्यक्षं भवति यदा यावन्ति तेजांसि ज्ञायन्ते । तथा च प्रतियोग्युपस्थितिः सामान्यलक्षणप्रत्यासत्तिं विना वक्तुं न शक्यते इति चेत् –

तमसः भावान्तरमिति कृत्वा प्रतियोग्युपस्थित्यर्थं सामान्यलक्षणप्रत्यासत्तिः नापेक्षिता।

ननु एवं चेदपि यदि तेजः तत्र तमः न अभिव्यज्यते तथा चव्यञ्जकज्ञार्थं वा सामान्यलक्षणप्रत्यासत्तिः अङ्गीकार्या खलु इति चेत् न स्वरूपसतः तेजोऽभावस्य तमोव्यञ्जकत्वं न तु ज्ञानं सत् तत्र मानाभावात् ।

किञ्च तेजोऽभावज्ञानमेव तमोऽभिव्यञ्जकं तेषां मतेऽपि सामान्यलक्षणप्रत्यासत्तिः न स्वीकार्या । प्रतियोगितावच्छेदप्रकारज्ञानात् यावत्प्रतियोगिविरहज्ञानं सम्भवति । तदर्थं सकलप्रतियोगिग्राहिका सामान्यलक्षणप्रत्यासत्तिः नाङ्गीकार्या ।

पञ्चमी युक्तिः – गोत्वाभावज्ञानं प्रति प्रतियोगितावच्छेदकप्रकारकज्ञानं कारणमित्युक्ते गोत्वत्वप्रकारकं ज्ञानं कारणम् । गोत्वत्वं च गवेतरावृत्ति – सकलगोसमवेतत्त्वम्। तथा च सकलगोज्ञानार्थं सामान्यलक्षणप्रत्यासत्तिः अङ्गीकार्या ।

मैवम् । गोत्वत्वं नाम गोव्यक्ति एव तज्ज्ञानं प्रत्यासत्तिं विनापि सम्भवति।

प्रसङ्गात् ज्ञालक्षणप्रत्यासत्तिः अपि निराक्रियते । तार्किकमते सुरभि चन्दनमति ज्ञानम् । चन्दनं चक्षुषा गृह्यते । पूर्वं गृहीतं सौरभं (चाक्षुषं) स्मर्यते। इदं सौरभं ज्ञानं चक्षुषः सौरभेण सह सन्निकृष्टं भवति । ज्ञानलक्षणप्रत्यासत्तिः = स्वविषयेण सह सन्निकर्षः इत्यर्थः । तथा च सुरभिचन्दनमति चाक्षुषज्ञानं तदर्थं ज्ञानलक्षणप्रत्यासत्तिः अङ्गीकार्या ।

अत्रोच्यते ज्ञानलक्षणप्रत्यासत्तिमनङ्गीकृत्य अपि “सुरभि चन्दनम्” इति विशिष्टज्ञानं सम्पादयितुं शक्यते । तत् विनापि अनुमानेन सुरभि चन्दनमिति ज्ञानं जायते । तथाहि इदं सुरभि चन्दनत्वात् सम्मतवत् ।

ज्ञानलक्षणप्रत्यासत्तिस्वीकारे दोषः उच्यते । पर्वते धूमविषयकप्रत्यक्षज्ञानमस्ति (पक्षधर्मताज्ञानम्) । ततः परं व्याप्तिस्मरणं भवति । अत्र च साध्यं विषयः। वह्निविषयकमिदं ज्ञानं प्रत्यासत्तिर्भूत्वा “पर्वतो वह्निमान्” इति प्रत्यक्षं जायते । कुत्रापि अनुमानप्रयोगः एव न स्यात् ।

अनुमानमात्रोच्छेदं वारयति पूर्वपक्षी । तथा च केवलव्यतिरेकिस्थले पृथिवी इतरेभ्यो भिद्यते गन्धवत्वात् यन्नैवं तन्नैवं यथा जलम् । अत्र व्याप्तौ साध्याभावः एव विषयः न तु साध्यम् । तथा च साध्यज्ञानं नास्ति इति कृत्वा तत्प्रत्यासत्ति न भवति । तथा च अत्र अनुमानमेव प्रबलं भवति ।

अत्र “अभावसाध्यकेवलव्यतिरेकिणि साध्यप्रसिद्धेः अनङ्गत्वात्” अत्र यदि केवलव्यतिरेकिणि इत्येव पङ्क्तिः स्यात्तदा दोषः भवति । तथाहि -

“इयं भूः शशविषाणोल्लिखिता एतद्भूत्वात्” अत्र दोषः। साध्यं प्रसिद्धं नास्ति। यदि केवलव्यतिरेकस्थले साध्यप्रसिद्धिः नापेक्षिता तथा च अनुमानं सदनुमानं स्यात् अतः अभावसाध्यककेवलव्यतिरेकिणि इति उक्तम् । अत्र साध्यप्रसिद्धिः नापेक्षिता, अन्यत्र तु सा अपेक्षिता एव इति ।

अत्रोच्यते केवलव्यतिरेकिस्थलमेव नाभ्युपगम्यते । तस्य अर्थापत्तिप्रमाणरूपत्वात् अनुमानमात्रोच्छेदः दुर्वारः एव ।

सामान्यलक्षणप्रत्यासत्त्यङ्गीकारे पूर्वपक्षिभिः अयमपि हेतुः प्रदर्शितः यत् "पर्वतो वह्निमान्" इति विशिष्टं ज्ञानम् । विशिष्टज्ञानं प्रति च विशेषज्ञानस्य हेतुत्वात्, अनुमेयः वन्हिः प्राग् ज्ञातव्यः । तच्च ज्ञानं प्रत्यासत्त्यङ्गीकारे एव इति । तत्रायं कार्यकारणभावः एव व्यभिचरितः इति तु प्रदर्शितमेव इदानीं समाधानान्तरमपि निरुच्यते ।

सर्वदा अनुमितिस्वरूपं साध्यप्रकारकपक्षविशेष्यकत्वं न अपि तु यत्प्रकाशकः यद्विशेष्यकः च परामर्शः तदा तत्प्रकारिका तद्विशेष्यिका अनुमितिः जायते ।

यदा "वह्निव्याप्यधूमवान् पर्वतः" इत्याकारकपरामर्षादनुमितिः तदा विशेषणीभूतः वन्हिः प्राग् ज्ञातव्यः। यदा तु "पर्वते वह्निव्याप्यधूमः" इति परामर्षाद् अनुमितिः तदा पर्वतस्य विशेषणत्वे तस्य च ज्ञानं प्रत्यक्षेण अस्ति अनुमितेः प्रागेव । अतः अत्र स्थले सामान्यलक्षणप्रत्यासत्तिं विनापि अनिमित्युदयः सम्भवति ।

इदानीं सामान्यलक्षणप्रत्यासत्तिः विकल्प्य दूष्यते । धूमत्वादिसामान्यं स्वरूपतः प्रत्यासत्तिः, उत धूमत्वज्ञानं प्रत्यासत्तिः –

आद्ये दोषः प्रदर्श्यते । तथा च महानसे धूलीपटले धूमभ्रमः जातः तथा च धूमत्वज्ञानं विद्यते धूमत्वं तु वस्तुतः नास्ति । तथा च स्वरूपसतः प्रत्यासत्तित्वे धूमत्वाभावे सकलधूमनिष्ठवह्निव्याप्तिग्रहः न सम्भवति स्वरूपेण तत्र धूमत्वाभावः।

न च इष्टापत्तिः। ततः परम् अनुमित्युदयः न स्यात् अत एव धूमत्वज्ञानमेव प्रत्यासत्तिः।

अत एव धूमत्वज्ञानमेव प्रत्यासत्तिः तथा च तेषां मते सन्निकृष्टे धूमे लौकिकप्रत्यक्षम्, असन्निकृष्टे धूमे अलौकिकं ज्ञानम् इति धूमत्वज्ञानोत्तरं इदमेकमेव ज्ञानम् । तथा च अत्रापि दोषः उच्यते । सन्निकर्षः यदा कारणं तदा कारणपूर्ववृत्तिः भवेत् । तथा च धूमेन्द्रियसन्निकर्षकाले प्राक् धूमज्ञानं जायते । धूमत्वज्ञानरूपः सन्निकर्षश्च पूर्ववृत्तिः न । ननु निर्विकल्पज्ञानम् अस्ति प्राग् इति चेत् तत्र मानाभावः ।

किञ्च विशिष्टेन सह सन्निकर्षे युगपत् विशिष्टज्ञानं जायते इति अनुभवसिद्धम्। तथा च “विशेषणज्ञानस्य कारणत्वे” दोषाः । अपि च स्मृतिज्ञानं विशिष्टं चेत् तत्र विशेषणज्ञानस्य कारणत्वं नास्ति ।

आदौ सन्निकृष्टविषयकं धूमज्ञानं ततः परं सकलधूमविषयक-अलौकिकप्रत्यक्षम् इति मते तु प्रथमक्षणवृत्तिज्ञानं धूमत्वप्रकारकमिति अस्ति सन्निकर्षः इति चेत्

न । एतादृशप्रक्रियायां मानाभावः, अनुभवबलात् । अनुभवश्च पुरोवर्तिनं धूमं साक्षात्करोमि यदि इयं प्रक्रिया अङ्गीक्रियते तदा सकलधूमान् साक्षात्करोमि इति अनुव्यवसायः स्यात् । दोषान्तरमपि उच्यते यत्प्रमेयं तदभिधेयम् इति व्याप्तिग्रहे सकलप्रमेयज्ञाने सर्वज्ञत्वापत्तिः । न च इदं सम्भवति देवदत्तज्ञानविषयः घट न वा इति संशयः न उदियात् । परन्तु भवति च संशयः ।

एतादृशः संशयः प्रमेयमिति निश्चयेन निषेद्धुं न शक्यते । अतः संशयोपपादनं सम्भवति एव । यस्तु प्रमेयत्वेन घटं जानाति तस्य घटत्वप्रकारकनिश्चयाभावात् घटसंशयः सम्भवति इति आशयः । प्रमेयमिति निश्चयः घटविषयकश्चेदपि घटत्वप्रकारको न अतो भवति संशयः । अत्रोच्यते प्रमेयत्वस्य केवलान्वयित्वात् घटत्वेऽपि अस्ति इति वाच्यम्। प्रकारत्वं नाम प्राचीनमते "भासमानवैशिष्ट्यप्रतियोगित्वम्" । प्रमेयमिति ज्ञाने घटत्वमपि भासमानवैशिष्ट्यप्रतियोगि, तथा च प्रमेयमिति ज्ञानं कथं संशयविरोधि न ।

अत्र पूर्वपक्षी आक्षिपति, घटत्वज्ञानजन्यः यः घटत्वप्रकारकघटविशेष्यकनिश्चयः सः एव संशयविरोधी । प्रमेयमिति निश्चयस्तु न घटत्वज्ञानजन्यः अतः प्रमेयमिति ज्ञानं संशयविरोधि न ।

अत्रोच्यते - घटत्वज्ञानजन्यत्वविशिष्टघटत्वप्रकारकनिश्चयः इति परिष्कारे को हेतुः "विषिष्टबुद्धिः विशेषणबुद्धिः कारणमिति नियमः एव । अयं नियमः बहुलं व्यभिचरुतः ।

नवीनन्यायमते "प्रकारतास्वरूपसम्बन्धः" एतादृशः क्लेषः प्रकारत्वस्य भासमानवैशिष्ट्यप्रतियोगित्वरूपं चेदेव ।

मैवम् । अनिर्वचनीयवादापत्तिः न च इष्टापत्तिः। अपि च स्वरूपस्य सम्बन्धत्वे मानाभावात्, सम्बन्धश्चेत् द्विनिष्ठः भवेत् ।

तथा च सामान्यं न प्रत्यासत्तिः । अन्ततो गत्वा यत्सत्वं पूर्वपक्षिणा निरुच्यते तत् चक्षुराद्ययोग्यमेव । अतः अनुमानं प्रत्यक्षेण प्रमाणेन न बाध्यते ।

इति लौकिक-अलौकिकप्रत्यक्षबाधोद्धारः।

अधुना नैयायिकानां मतानुसारेण किञ्चित् विचार्यते। सन्निकर्षाः द्विविधाः।

1. लौकिकसन्निकर्शः
2. अलौकिकसन्निकर्शः इति

लौकिकसन्निकर्शाः षड्विधाः सन्ति।

1. संयोगः
2. संयुक्तसमवायः
3. संयुक्तसमवेतसमवायः
4. समवायः
5. समवेतसमवायः
6. विशेषणविशेष्यभावः इति।

अलौकिकसन्निकर्षाः त्रिविधाः वर्तन्ते।

1. सामान्यलक्षणाप्रत्यासत्तिः
2. ज्ञानलक्षणाप्रत्यासत्तिः
3. योगजाक्षणाप्रत्यासत्तिः इति।

अत्र अद्वैतसिद्धौ ग्रन्थकारैः सामान्यलक्षणाप्रत्यासत्तेः ज्ञानलक्षणाप्रत्यासत्तेः च खण्डनं कृतं वर्तते । वस्तुतः वेदान्तिभिः समवायः न अङ्गीक्रियते इत्यतः नैयायिकोक्ताः सर्वे

सन्निकर्षाः समवायघटिततया न अङ्गीक्रियन्ते । समवायः कुतः वेदान्तिभिः न अङ्गीक्रियते इत्युक्ते नैयायिकैः समवायस्य नित्यत्वे सति एकत्वम् उच्यते । परन्तु वेदान्तिभिः परमात्मनः एव नित्यत्वे सति एकत्वम् उच्यते । तदुक्तं परिभाषाकारैः [20]“समवायासिध्या ब्रह्मभिन्ननिखिलप्रपञ्चस्य अनित्यतया च नित्यत्वसमवेतत्त्वघटितजातित्वस्य घटत्वादौ असिद्धेश्च इति” । तस्मात् नैयायिकोक्ताः सन्निकर्षाः वेदान्तिभिः न अङ्गीक्रियन्ते । तर्हि के लौकिकाः सन्निकर्षाः अङ्गीक्रियन्ते इति चेत् –

1. संयोगः
2. संयुक्ततादात्म्यम्
3. संयुक्ततदात्मतादात्म्यम्
4. तादात्म्यम्
5. तदात्मतादात्म्यम् इति।

अलौकिकसन्निकर्षाः त्रयः उच्यन्ते इति मया पूर्वम् उक्तम् । तत्र प्रसिद्धनैयायिकानाम् वचनं प्रमाणम् । तदुक्तं मुक्तावलीकारैः –

[21]“अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ।

सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥

---

[20] वेदान्तपरिभाषा पृ सं

[21] मुक्तावली पृ सं २०७

आदौ का नाम सामान्यलक्षणाप्रत्यासत्तिः इति विचार्यते । अत्र नैयायिकैः द्विधा अर्थः उच्यते । तत्र प्राचीनाः नैयायिकाः वदन्ति , ज्ञायमानं सामान्यं प्रत्यासत्तिः इति । अतः एतेषां पक्षे सामान्यं स्वरूपं यस्याः प्रत्यासत्तेः इति व्युत्पत्तिः सिध्यति । अत्र लक्षणशब्दस्य स्वरूपम् इति अर्थः । परन्तु नवीनाः नैयायिकाः वदन्ति सामान्यज्ञानं प्रत्यासत्तिः इति । अस्मिन् मते लक्षणशब्दस्य विषयः इति अर्थः । उभयमतेऽपि सामान्यशब्दस्य द्विधा अर्थः उच्यते । सामान्यं नाम जातिः इति एकः अर्थः। समानानां भावः सामान्यं इति व्युत्पत्या व्यक्तयः इत्यपि अपरः अर्थः उच्यते ।

इदानीं ज्ञायमानं सामान्यं प्रत्यासत्तिः इति मते लक्षणं पश्यामः। अस्मिन् मते एवं लक्षणं भवति – इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः इति उच्यते । अस्य समन्वयं पश्यामः- इन्द्रियपदेन चक्षुरिन्द्रियं स्वीकुर्मः । इन्द्रियसम्बद्धविशेष्यकज्ञानं नाम अयं धूमः इत्याकारकं ज्ञानम् । तादृशे ज्ञाने प्रकारः भवति धूमत्वम् । तत् धूमत्वम् एव प्रत्यासत्तिः । एवञ्च तादृशेन धूमत्वेन रूपेण सकलानां धूमानां ज्ञानं भवति । अत्र एकः प्रश्नः उदेति यत् सामान्ये इन्द्रियसम्बद्धत्वम् इत्येव विशेषणं भवतु , किमर्थं ज्ञानप्रकारीभूतत्त्वविशेषणम् इति । तथा चेत् दोषः भवति । यतो हि कदाचित् धूलीपटलं दृष्ट्वा धूमः इति ज्ञानं सम्पन्नम् । तत्र अपि सामान्यलक्षणाप्रत्यासत्त्या धूमाः इति ज्ञानं भवितुम् अर्हति । परन्तु केवलं इन्द्रियसम्बद्धत्वस्य सामान्ये निवेशे इदं न स्यात् । यतो हि तत्र धूमत्वेन सह इन्द्रियसम्बन्धस्य अभावः वर्तते । तस्मात् सामान्ये ज्ञानप्रकारीभूतत्त्वम् इत्यपि विशेषणं

दीयते । तथा सति न दोषः । यतो हि इन्द्रियसम्बद्धविशेष्यकज्ञानं नाम अयं धूलीपटलः इति ज्ञानम् । तत्र प्रकारविधया धूमत्वं भासते इति न कोऽपि दोषः ।

पूर्वोक्तक्रमेण सामान्यपदेन घटः अपि स्वीकर्तुं शक्यते । तथा सति इन्द्रियसम्बद्धविशेष्यकज्ञानं नाम अयं भूतलं घटवत् इति ज्ञानम् । तत्र प्रकारविधया घटः भासते इत्यतः तेन सन्निकर्षेण सकलानां घटवतां भूतलानां ज्ञानं जायते । परन्तु ज्ञायमानसामान्यस्य प्रत्यासत्तित्वस्य अस्वीकारे युक्तिद्वयं नैयायिकैः उच्यते ।

प्रथमा युक्तिः –

यदि ज्ञायमानसामान्यस्य प्रत्यासत्तित्वं स्वीक्रियते तर्हि व्यतिरेकव्यभिचारदोषः स्यात् । तथा हि एकदा भूतले घटं दृष्ट्वा भूतलं घटवत् इति ज्ञानं जातम् । तदनन्तरं मुद्गरस्स्य पातानन्तरं तस्य घटस्य नाशः जातः । परन्तु घटस्य नाशानन्तरं कालान्तरे घटस्य स्मरणं जातम् । तेन घटाः इति सामान्यलक्षणाप्रत्यासत्त्या ज्ञानम् अपि जातम् । परन्तु इदं न स्यात् । यतो हि अत्र ज्ञायमानस्य सामान्यस्य अभावेऽपि प्रत्यक्षं ज्ञानम् उदेति । अतः अत्र कारणस्य अभावेऽपि कार्योत्पत्तिः इति व्यतिरेकव्यभिचारः दोषः । अतः सामान्यज्ञानं प्रत्यासत्तिः इति वक्तव्यम् । तथा सति न दोषः । यतो हि यत्र घटस्य नाशानन्तरं घटाः इति घटस्य स्मरणेन अलौकिकं प्रत्यक्षम् उत्पन्नं, तत्र घटस्य स्मरणात्मकं घटस्य ज्ञानम् अस्ति एव इत्यतः सामान्यज्ञानरूपस्य प्रत्यासत्तेः सत्वादेव

अलौकिकं प्रत्यक्षम् उत्पन्नम् । अतः कारणस्य सत्वादेव कार्यम् उत्पन्नम् इत्यतः व्यतिरेकव्यभिचारः नास्ति ।

द्वितीया युक्तिः –

यदि ज्ञायमानसामान्यस्य प्रत्यासत्तित्वं स्वीक्रियते तर्हि व्यतिरेकव्यभिचारदोषः स्यात् । तथा हि एकस्मिन् दिने घटेन सह इन्द्रियस्य सन्निकर्षेण घटः इति ज्ञानं जातम् । एवमेव तत्र प्रकारविधया भासमानत्वात् घटत्वम् अपि ज्ञातम् । परन्तु परदिने तत्र घटत्वस्य नित्यत्वात् विद्यमानत्वं भवत्येव । परन्तु अलौकिकं प्रत्यक्षं तु न भवति इत्यतः अन्वयव्यभिचारः । अतः सामान्यसन्निकर्षरूपकारणस्य सत्वेऽपि कार्यस्य प्रत्यक्षस्य अनुदयात् अन्वयव्यभिचारः इति भावः। अतः तत्परिहारार्थं सामान्यज्ञानं सन्निकर्षः इति उच्यते । तथा सति अन्वयव्यभिचारदोषः नास्ति । कुत इति चेत् तत्र घटत्वस्य सत्वेऽपि घटत्वस्य ज्ञानं नास्ति । अतः कारणम् एव नास्ति इत्यतः कार्यस्य अनुत्पत्तिः , अतः अन्वयव्यभिचारदोषः नास्ति । तस्मात् सामान्यज्ञानं प्रत्यासत्तिः इत्येव वक्तव्यम् ।

ज्ञानलक्षणाप्रत्यासत्तिः – ज्ञानमेव स्वरूपं यस्याः प्रत्यासत्तेः सा ज्ञानलक्षणप्रत्यासत्तिः । सुरभिचन्दनम् इति उदाहरणम् । अत्र चन्दनखण्डस्य चाक्षुषप्रत्यक्षं जायते । अनन्तरम् अन्यत्र चन्दनखण्डे वर्तमानस्य यत् प्रत्यक्षं जातमासीत् तस्य स्मरणं अधुना चन्दनखण्डं दृष्ट्वा भवति । तेन सुरभेः अलौकिकं प्रत्यक्षं भवति । अत्र एकः प्रश्नः – अनयोः प्रत्यासत्त्योः कः भेदः इति । अत्र उच्यते –

सामान्यलक्षणप्रत्यासत्त्या आश्रयस्य ज्ञानं भवति । ज्ञानलक्षणप्रत्यासत्त्या विषयीभूतस्य तस्य केवलं ज्ञानं भवति । न तु तदाश्रयस्य । अनुभवानुरोधेन नैयायोकैः एतादृशं प्रत्यक्षम् अङ्गीकृतम् । परन्तु सिद्धिकारैः इदं खण्डितमस्ति पूर्वोक्ताभिः युक्तिभिः ।

आकाशस्वरूपम्

परिच्छिन्नत्वहेतुनिरूपणावसरे सिद्धिकारैः आकाशस्य स्वरूपम् उक्तम्। तथा च सिद्धिकाराः वदन्ति – “[22]**अज्ञाने सर्वसम्बन्धिन्यसिद्धिश्च, ध्वंसप्रतियोगित्वमपि आकाशादौ असिद्धम्, तेषां परैः अनित्यत्वाभ्युगमात्**” **इति। एवमेव अकाशस्य अवृत्तित्वम् अपि सिद्धिकारैः निराकृतं वर्तते । किञ्चित् वस्तुनिष्ठात्यन्ताभावप्रतियोगित्वम् यत्र अस्ति तत् अवृत्ति इति वक्तुं शक्यते । परन्तु आकाशे इदम् अस्ति वा इति विचारणीयम् । आकशः ध्वंसप्रतियोगी , आकाशः प्रागभावप्रतियोगी, आकाशः अत्यन्ताभावप्रतियोगी इत्यत्र न किमपि प्रमाणं वर्तते । इह घटः ध्वस्तः इति यथा प्रतीतिः वर्तते, तद्वत् आकाशः ध्वस्तः इति प्रतीतिः नास्ति । एवमेव इह घटो भविष्यति इति प्रतीतिवत् इह आकाशो भविष्यति इति प्रतीतिः नास्ति । एवमेव इह आकाशः नास्ति इति इति प्रतीत्यभावात् आकाशस्य अत्यन्ताभावप्रतियोगित्वे प्रमाणं नास्ति इति सिद्धिकाराणाम् आशयः । इह आकाशः नास्ति इति कुतः प्रतीतिः नास्ति इत्युक्ते तत्र तत्साधकं प्रमाणं नास्ति इति । यदि वक्तव्यं तर्हि अनुमानं वा प्रत्यक्षं वा तत्र प्रमाणत्वेन वक्तव्यम् । प्रत्यक्षेण इदं साधयितुं न शक्यते । यतो हि अभावप्रत्यक्षं प्रति प्रतियोगिज्ञानं नितराम् आवश्यकं भवति । यथा परमाणोः अभावः कुतः न प्रत्यक्षः इत्युक्ते तत्प्रतियोगिभूतस्य परमाणोः प्रत्यक्षत्वं नास्ति । अतः तदभावः न प्रत्यक्षः । परन्तु घटः**

[22] अद्वैतसिद्धिः बालबोधिनीव्याख्यासहतं पृ सं २५९

प्रत्यक्षः इत्यतः तदभावः प्रत्यक्षः एव भवति । एवमेव आकाशः प्रत्यक्षः न इत्यतः तदभावः न प्रत्यक्षः भवति । अतः अत्र प्रत्यक्षं प्रमाणम् इति वक्तुं न शक्यते । अनुमानेन साधयामः इति चेत् अनुमाने यदि अप्रयोजकशङ्का आक्षिप्यते चेत् तस्य वारणार्थम् अनुकूलः तर्कः नोपलभ्यते । अनुकूलतर्कं विनापि यदि आकाशे अनुमानेन अत्यन्ताभावप्रतियोगित्वं सिध्यति, तर्हि तद्वदेव आकाशे ध्वंसप्रतियोगित्वं प्रागभावप्रतियोगित्वम् अपि साधयितुं शक्यते । अतः अनुमानेन आकाशे अत्यन्ताभावप्रतियोगित्वं साधयितुं न शक्यते इति प्राप्तम् । अतः मिथ्यात्वसाधकानुमाने आकाशम् आदाय सिद्धसाधनदोषः न आक्षेप्तुं शक्यते । अतः आकाशः मिथ्या इत्यपि सिध्यति । अतः मिथ्यात्वानुमानेन आकाशे यत् अत्यन्ताभावप्रतियोगित्वं प्राप्तं तत् न तु आकाशस्य अवृत्तित्वे पर्यवसन्नम् । परन्तु आकाशस्य मिथ्यात्वे पर्यवसन्नम् इति ज्ञायते । एवञ्च अनेन सिद्धिकारैः नैयायिकोक्तम् अकाशस्य अवृत्तित्वं नित्यत्वं च खण्डितम् इति ज्ञायते ।

नैयायिकैः आकाशस्य नित्यत्वम् उच्यते । अतः तर्कसङ्ग्रहकाराः वदन्ति "[23]**शब्दगुणकमाकाशं तच्चैकं विभुनित्यश्च**" इति। आकाशस्य शब्दः एकः एव विशेषगुणः अस्ति । आकाशस्य उत्पत्तिः न उच्यते नैयायिकैः । परन्तु वेदान्तिभिः आकाशस्य उत्पत्तिः उच्यते । तदुक्तं वेदे [24]"तस्माद्वा एतस्माद् आत्मन आकाशः सम्भूतः" इति ।

---

[23] तर्कसङ्ग्रहः पृ सं ३६

[24] यजुरारण्यकम् पृ सं २०२

अतः वेदान्तिनां मते आकाशः अनित्यः । नैयायिकानां मते अनित्यद्रव्याणि चत्वारि एव । पृथिवीजलस्तेजोवायूनां कार्यभूतानि अनित्यानि सन्ति । पृथिव्यादिचतुष्टयपरमाणवः आकाशादिपञ्चकञ्च नित्यद्रव्याणि इति व्यवस्था नैयायिकानाम् । एवञ्च नैयायिकाः आकाशस्य नित्यत्वं वदन्ति । इदानीं वेदान्तिनां मते आकाशस्य स्वरूपं किम् इति पश्यामः – आकाशस्य स्वरूपं सिद्धिकारैः परिच्छिन्नत्वहेतुनिरूपणावसरे उक्तम्।

परिच्छिन्नत्वं त्रिविधम् –

1. देशतः परिच्छिन्नत्वम्
2. कालतः परिच्छिन्नत्वम्
3. वस्तुतः परिच्छिन्नत्वम्

देशतः परिच्छिन्नत्वं नाम अत्यन्ताभावप्रतियोगित्वम् । अर्थात् यस्य परिच्छिन्नत्वम् उच्यते तस्य स्थानान्तरे अभावः वक्तुं शक्यते इत्यर्थः । कालतः परिच्छिन्नत्वं नाम ध्वंसप्रतियोगित्वम् । अर्थात् यस्य कालतः परिच्छिन्नत्वम् उच्यते तस्य क्वचित्काले असत्वं क्वचित् काले सत्वम् इति । वस्तुतः परिच्छिन्नत्वं नाम अन्योन्याभावप्रतियोगित्वम् । अर्थात् यस्य वस्तुतः परिच्छिन्नत्वम् उच्यते सः केनचित् वस्तुना सह एव तादात्म्यापन्नं इति । नैयायिकमते आकाशः अवृत्तिपदार्थः इति उच्यते । अर्थात् आकाशः कुत्रापि असमवेतः असंयुक्तः अपि । अयम् अभिप्रायः वेदान्तिनाम् अपि सम्मतः इति ज्ञायते

आत्मनि व्यभिचारप्रदर्शकपूर्वपक्षावलोकनेन । तथा च पूर्वपक्षः एवं वर्तते – यदि अत्यन्ताभावप्रतियोगित्वं देशतः परिच्छिन्नत्वं तर्हि आत्मनः समवायसम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगत्वं आत्मनि अपि अस्ति । यतो हि आत्मा कुत्रापि समवेतः नास्ति आकाशवत् । एवञ्च ग्रन्थकारैः आत्मनि व्यभिचारप्रदर्शनकाले आत्मनः आकाशवत् असमवेतत्त्वम् इति उक्तम्। अतः आत्मनि व्यभिचारवारणाय संयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वं देशतः परिच्छिन्नत्वम् इति उच्यते तर्हि आत्मनि दोषः वारयितुं शक्यते । तर्हि अस्य आकाशे समन्वयः न भवति । यतो हि [25]सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम्। [26]मूर्तत्वं नाम परिच्छिन्नपरिमाणवत्वम् । पृथिव्यप्तेजोवायुद्रव्याणि मूर्तद्रव्याणि । एतैः सर्वैः सह यस्य संयोगः वर्तते सः विभुपदार्थः इति उच्यते । पृथिव्यादिषु चतुर्षु यत् परिमाणं वर्तते तत् परिच्छिन्नं वर्तते ।

परिमाणं त्रिविधम् –

१. अणुपरिमाणम्

२. महत्परिमाणम्

३. विभुपरिमाणम्

[25] तर्कसङ्ग्रहदीपिका पृ सं ३७

[26] तर्कसङ्ग्रहदीपिका पृ सं ३७

एतेषु त्रिषु परिमाणेषु प्रथमद्वयं परिमाणं परिच्छिन्नपरिमाणम् । नित्यभूतेषु पृथिव्यादिचतुर्षु अणुपरिमाणम् अस्ति । कार्यरूपेषु पृथिव्यादिचतुर्षु महत्परिमाणम् अस्ति । तस्मात् एतेषु चतुर्षु परिच्छिन्नपरिमाणम् अस्ति इति ज्ञायते । एवञ्च परिच्छिन्नपरिमाणरूपमूर्तद्रव्यसंयोगित्वरूपं विभुत्वम् आकाशादिषु वर्तते । अतः आकाशस्य विभुत्वकथनार्थं आकाशस्य मूर्तद्रव्यैः सह संयोगः वक्तव्यः इत्यतः आकाशे संयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वं नास्ति इति आक्षेपः उद्भवति । अत्र मया वक्तव्यः अंशः कः इत्युक्ते परिच्छिन्नत्वलक्षणस्य परिष्कारं कुर्वता ग्रन्थकारेण आकाशादौ असिद्धम् इति उक्तम् । अनेन वेदान्तिनां मते अपि आकाशस्य नैयायिकोक्तरीत्या सर्वमूर्तद्रव्यसंयोगित्वम् अङ्गिकृतम् इति ज्ञायते । एतत् सर्वं विवक्षुः सिद्धिकारः एवं लिखति “ [27]**ननु समवायसम्बन्धेनात्यन्ताभावप्रतियोगित्वम् आत्मनि व्यभिचारि , तस्य अपि आकाशादिवत् क्वापि असमवेतत्वात् । संयोगसम्बन्धेनात्यन्ताभावप्रतियोगित्वम् आकाशादौ असिद्धम् । तस्य यावन्मूर्तसंयोगित्वनियमात् ।**” इति

एतावता सिद्धिकारैः उक्तरीत्या आकाशस्य स्वरूपं विचारितम् । अस्य प्रबन्धस्य आदौ एव मया द्वितीयमिथ्यात्वसिद्धान्तनिरूपणावसरे सिद्धिकारैः यत् आकाशस्य अवृतित्वं खण्डितं तत् सयुक्तिकं पूर्वम् उपपादितम् । अधुना नैयायिकोक्तरीत्या विस्तरेण चिन्तनं

---

[27] अद्वैतसिद्धिः बालबोधिनीव्याख्यासहतं पृ सं २५८

कर्तव्यम् । शब्दनिष्ठाधेयतानिरुपिताधिकरणतावान् आकशः इति शाब्दबोधः । अत्र ग्रन्थकारैः एवकारः किमर्थं दत्तः इति चेत् आकाशे शब्दः एकः एव विशेषगुणः अस्ति इति द्योतनाय न तु अतिव्याप्ति वारणाय । यतो हि

रूपंगन्धोरसस्पर्शः स्नेहस्सांसिद्धिकोद्रवः।

बुध्यादिभावनान्ताश्च शब्दो वैशेषिका गुणाः॥ इति

अस्मिन् श्लोके उक्तक्रमेण रूपादयः केपि गुणः आकाशे न सन्ति । परन्तु शब्दः इति एकः एव विशेषगुणः आकाशे वर्तते । आकाशः एकः एव वर्तते । यथा अन्यत्र अनेके विभागाः वर्तन्ते तद्वत् आकाशे विभागः न वर्तते । आकाशः नित्यः । नित्यत्वं नाम प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वम् । आकाशस्य उत्पत्तिः नास्ति, अतः आकाशे प्रागभावाप्रतियोगित्वम् आयातम् । एवमेव आकाशस्य नाशः नास्ति । तस्मात् आकाशे ध्वंसाप्रतियोगित्वम् आयातम् । अतः आकाशः त्रैकालिकः नित्यः इति ज्ञायते । आकाशः भूतपदार्थः । भूतत्वं नाम बहिरिन्द्रियग्राह्यविशेषगुणवत्वम् । बहिरिन्द्रियाणि पञ्च । चक्षुः, रसनं, घ्राणं, त्वक्, श्रोत्रम् इति । अधुना एकैकम् इन्द्रियं स्वीकृत्य पञ्चसु भूतेषु समन्वयं पश्यामः । चक्षुरिन्द्रियजन्यज्ञानं नाम इदं रूपम् इत्याकारकम् । तादृशज्ञानविषयः यः विशेषगुणः नाम रूपम् । तादृशविशेषगुणवत्वं पृथिव्यां वर्तते इति समन्वयः। एवमेव त्वगिन्द्रियजन्यं ज्ञानं नाम अयम् उष्णस्पर्शः इत्याकारकः । तादृशज्ञानविषयः यः विशेषगुणः नाम स्पर्शः । तद्वत्वं पृथिव्यादिषु इति समन्वयः। एवमेव

श्रोत्रेन्द्रियजन्यं ज्ञानं नाम अयं कशब्दः इत्यादिः । तादृशज्ञानविषयः यः विशेषगुणः इत्युक्ते शब्दः । तादृशविशेषगुणवत्वं आकाशे वर्तते इति आकाशे भूतत्त्वलक्षणस्य समन्वयः । आकाशः एकः एव इत्यतः आकाशे वर्तमानम् आकाशत्वं न जातिः । तदुक्तम् उदयनाचार्यैः -

[28]व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।

रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः॥ इति।

एवञ्च एकव्यक्तिवृत्तिकत्वरूपस्य व्यक्तेः अभेदस्य सत्वात् आकाशत्वं न जातिः ।

विश्वनाथपञ्चाननाचार्याः आकाशस्य स्वरूपम् एवं वदन्ति –

“[29]आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः” इति

आकाशः नैयायिकमते अनुमानाप्रमाणेन सिद्धः इति वक्तव्यम् । नहि आकाशस्य प्रत्यक्षत्वं वर्तते । यतो हि द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति समवायेन रूपं कारणम् इति वर्तते नियमः। आकाशे रुपस्य अभावात् तस्य प्रत्यक्षत्वं न सम्भवति । अतः आकाशः नैयायिकमते अनुमानाप्रमाणेन सिद्धः इति मया प्राक् उक्तम् । तर्हि आकाशस्य सिद्धिप्रकारं पश्यामः ।

अत्र प्रथमतः एकम् अनुमानम् उच्यते –

---

[28]मुक्तावली पृ सं ५८

[29] कारिकाकरः श्लो सं ४४

“शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात्”

इति।

अनेन अनुमानेन वस्तुतः आकाशः सिध्यति इति उच्यते । अस्य अयम् अर्थः यस्मात् कारणात् शब्दस्य अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वं तस्मात् कारणात् शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः इति । तच्च द्रव्यं किम् इति चेत् आकाशः इति सिध्यति । अत्र एकः प्रश्नः उदेति, शब्दे द्रव्याश्रितत्त्वम् एव न सिद्धं तत् कथं तेन हेतुना आकाशः अनेन अनुमानेन सिध्यति इति । अस्मिन् अनुमाने पक्षे हेतोः विशेष्यदलं नास्ति इत्यतः अत्र स्वरूपासिद्धिदोषः वर्तते इति । अतः स्वरूपासिद्धिदोषस्य परिहारार्थं एकम् अनुमानं क्रियते । शब्दः द्रव्याश्रितः गुणत्वात् रूपवत् इति । यथा रूपस्य गुणत्वात् द्रव्याश्रितत्वं तुल्यया रीत्या शब्दस्यापि गुणत्वात् द्रव्याश्रितत्वं वक्तव्यं तस्मात् शब्दः द्रव्याश्रितः इति सिध्यति । अत्र अपि पूर्वतनः तुल्यः एव प्रश्नः उदेति । शब्दस्य गुणत्वम् एव न सिद्धं तत् कथं तेन हेतुना शदस्य द्रव्याश्रितत्वं अनेन अनुमानेन सिध्यति इति । अतः अधुना शब्दस्य गुणत्वसाधकम् अनुमानम् उच्यते । शब्दः गुणः चक्षुग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्वात् स्पर्शवत् इति । अत्र स्पर्शः चक्षुषा ग्रहीतुं न शक्यते । अतः स्पर्शे चक्षुग्रहणायोग्यत्वम् आयातम् । एवमेव स्पर्शः त्वगिन्द्रियेण गृह्यते, तः स्पर्शे बहिरिन्द्रियग्राह्यत्वम् आयातम् । एवञ्च यथा स्पर्शस्य चक्षुग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्वात् गुणत्वं तुल्यया रीत्या शब्दस्य अपि चक्षुग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्वात् गुणत्वं वक्तव्यं , तस्मात् शब्दः गुणः इति

अनेन अनुमानेन सिध्यति । एतेन आकाशसाधकानुमाने विशेष्यासिद्धिः वारिता । प्रथमे आकाशसाधके अनुमाने विशेषणासिद्धिदोषः अपि वर्तते । अतः तस्य परिहारार्थम् एकम् अनुमानम् उच्यते [30]शब्दः स्पर्शवद्विशेषगुणभिन्नः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत् । यथा सुखस्य अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् स्पर्शवद्विशेषगुणभिन्नत्वं तुल्यया रीत्या शब्दस्य अपि अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् स्पर्शवद्विशेषगुणभिन्नत्वं वक्तव्यम् । तस्मात् शब्दः स्पर्शवद्विशेषगुणभिन्नः इति सिध्यति । अधुना अत्रत्य साध्यस्य परिचयं करोमि । स्पर्शवद्विशेषगुणभिन्नत्वं नाम स्पर्शवत्सु पृथिव्यादिषु चतुर्षु अवर्तमानः इति । तत् सुखे वर्तते । कथम् इति चेत् सुखम् आत्मनि वर्तते । अतः स्पर्शवत्सु पृथिव्यादिषु चतुर्षु न वर्तते । तस्मात् सुखे स्पर्शवद्विशेषगुणभिन्नत्वम् आयातम् । अधुना हेतोः परिचयं प्राप्नुमः। तत्र प्रथमं दलं वर्तते अग्निसंयोगासमवायिकारणकत्वाभाववत्वम् इति । अग्निसंयोगः असमवायिकारणं यस्य सः अग्निसंयोगासमवायिकारणकः । सुखं प्रति अग्निसंयोगः असमवायिकारणं न । कुतः इति चेत् सुखम् आत्मनि वर्तते । सुखं प्रति आत्ममनः संयोगः असमवायि कारणम् । अतः सुखे अग्निसंयोगासमवायिकारणकत्वाभाववत्वम् अयातम् । अत्र हेतौ द्वितीयं दलम् अकारणगुणपूर्वकत्वम् इति । कारणस्य गुणः कारणगुणः। अत्र कारणपदेन

[30] मुक्तावली पृ स १४२

स्वकारणकारणं विवक्षणीयम्। कारणस्य गुणः पूर्वं यस्य सः कारणगुणपूर्वकः । न कारणगुणपूर्वकः अकारणगुणपूर्वकः। प्रकृते सुखे समन्वयं पश्यामः। आत्मनः समवायिकारणं न किमपि वर्तते । अतः आत्मनि वर्तमाने सुखे स्वकारणकारणगुणपूर्वकत्वम् नास्ति । अतः सुखे अकारणगुणपूर्वकत्वम् आयाति । एवञ्च अनेन अनुमानेन शब्दे स्पर्शवद्विशेषगुणभिन्नत्वम् आयाति इति प्राप्तम् । एवमेव पूर्वस्मिन् अनुमाने विशेषणासिद्धिवारणार्थम् अपरम् अनुमानम् उच्यते । शब्दः दिक्कालमनोगुणभिन्नः विशेषगुणत्वात् रूपवत् । रूपं विशेषगुणेषु अन्तर्भवति । दिशि काले मनसि च रूपं न वर्तते । एवञ्च रूपस्य विशेष गुणत्वात् यथा दिक्कालमनोगुणभिन्नत्वं तुल्यया रीत्या शब्दस्य अपि विशेषगुणत्वात् दिक्कालमनोगुणभिन्नत्वं वक्तव्यं । तस्मात् शब्दः दिक्कालमनोगुणभिन्नः इति ज्ञायते । अनेन अनुमानेन शब्दस्य दिक्कालमनोगुणभिन्नत्वं साधितम् । एवमेव पूर्वस्मिन् अनुमाने विशेषणासिद्धिवारणार्थम् अपरम् अनुमानम् उच्यते । शब्दः आत्मगुणभिन्नः बहिरिन्द्रियग्राह्यत्वात् रूपवत् । रूपं चक्षुरिन्द्रियेण गृह्यते । अतः रूपे बहिरिन्द्रियग्राह्यत्वम् अयातम् । एवमेव आत्मनि रूपं नास्ति इत्यतः रूपे आत्मगुणभिन्नत्वम् अयातम् । एवञ्च यथा रूपस्य बहिरिन्द्रियग्राह्यत्वात् आत्मगुणबिन्नत्वं तुल्यया रीत्या शब्दस्य अपि बहिरिन्द्रियग्राह्यत्वात् आत्मगुणबिन्नत्वं वक्तव्यम् । अतः शब्दः आत्मगुणभिन्नः इति सिध्यति । एवञ्च एतैः त्रिभिः अनुमानैः पूर्वस्मिन् अनुमाने विशेषणासिद्धिः वारिता । परन्तु शब्दस्य विशेषगुणत्वे किं मानम् इति प्रश्नः उदेति ।

अतः शब्दस्य विशेषगुणत्वसाधकम् अनुमानं दिनकरीकारैः एवं दर्शितं वर्तते यत् “ शब्दः विशेषगुणः लौकिकप्रत्यासत्त्या इन्द्रियग्राह्यत्वे सति लौकिकप्रत्यासत्त्या द्वीन्द्रियग्रहणयोग्यताराहित्ये सति गुणत्वव्याप्यजातिमत्वात् रूपवत् इति । अत्र आदौ समन्वयं पश्यामः। रूपे इन्द्रियग्राह्यत्वं वर्तते । एवमेव रूपं चक्षुषा केवलं गृह्यते अन्येन केनापि इन्द्रियेण न गृह्यते इत्यतः द्वीन्द्रियग्रहणयोग्यताराहित्यं रूपे वर्तते । एवमेव रूपे गुणत्वव्याप्या या रूपत्वजातिः तादृशजातिमत्वम् अपि वर्तते । एवञ्च रूपस्य यथा लौकिकप्रत्यासत्त्या इन्द्रियग्राह्यत्वे सति लौकिकप्रत्यासत्त्या द्वीन्द्रियग्रहणयोग्यताराहित्ये सति गुणत्वव्याप्यजातिमत्वात् विशेषगुणत्वं तुल्यया रीत्या शब्दस्य अपि लौकिकप्रत्यासत्त्या इन्द्रियग्राह्यत्वे सति लौकिकप्रत्यासत्त्या द्वीन्द्रियग्रहणयोग्यताराहित्ये सति गुणत्वव्याप्यजातिमत्वात् विशेषगुणत्वं वक्तव्यम् । तस्मात् शब्दः विशेषगुणः इति सिध्यति । स्पर्शवद्विशेषगुणसाधकानुमानं यत् तत्र हेत्वाभासदोषः आक्षिप्यते । तत्र मुक्तावलीकाराः कथयन्ति , [31]न च वायोः अवयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्दः उत्पद्यतामिति वाच्यम् । अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात् । अत्र ग्रन्थकाराणाम् आशयः मया वक्तव्यः। वस्तुतः अत्र ग्रन्थकारैः बाधदोषः स्वरूपासिद्धिदोषः च उत्थापितः वर्तते । अत्र पूर्वपक्षिणाम् अयमाशयः यत् वायुः इति एकं द्रव्यम् । वायोः अवयवाः वर्तन्ते । वायोः अवयवेषु सूक्ष्माः शब्दाः वर्तन्ते । तेषु अवयवेषु वर्तमानाः श्ब्दाः वायौ उत्पद्यन्ते । एवञ्च शब्दाः

[31] मुक्तावली पृ सं १४४

वायौ उत्पद्यन्ते इति प्राप्तम् । तथा च प्रकृते अनुमाने बाधदोषः आगतः । गगनम् अवृत्तिपदार्थः इति सर्वेषां नैयायिकानाम् आशयः । अतः मुक्तावलीकाराः वदन्ति “[32]अन्यत्र नित्यद्रव्येभ्यः आश्रितत्त्वम् इह उच्यते” इति । तेषाम् अयम् आशयः यत् नित्यद्रव्याणि विहाय आश्रितत्वं साधर्म्यम् इति । नित्यद्रव्याणि नाम परमाण्वाकाशादीनि । तानि कुत्रापि आश्रितानि न भवन्ति । अर्थात् समवायसंयोगादिसम्बन्धैः वृत्तिमन्ति न भवन्ति इति आशयः। एतावता प्रबन्धेन आकाशस्य स्वरूपं सिद्धिकाराणां , नैय्ययिकानां च अभिप्रायानुसारेण चिन्तितम् । अनेन इदम् अवगम्यते नैयायिकैः अनुमानेन आकाशः साधितः सः नित्यः इति यदुच्यते तत्र अनित्यत्वं एव वेदोक्तत्वात् अङ्गीकर्तवयम् । एवमेव नैयायिकोक्तं गगनस्य अवृत्तित्वं खण्डितम् ।

---

[32] मुक्तावली ६३

सत्तात्रैविध्यनिरूपणम्

प्रथमपरिच्छेदे अद्वैतसिद्धिकारैः सत्तात्रैविध्यं साधितं वर्तते । एतस्य प्रमेयस्य विस्तरेण उपपादनं तु अद्वैतसिद्धौ वर्तते । नैयायिकैः व्यावहारिकी सत्ता, प्रातिभासिकीसत्ता च अङ्गीक्रियते । इयं प्रातिभासिकसत्ता भ्रमज्ञानं इति पदेन कथयते । परन्तु वेदान्तिनां या पारमार्थिकी सत्ता सा नैयायिकैः नैव अङ्गीक्रियते । यतो हि नैयायिकाः जगतः सत्यत्वम् अङ्गीकुर्वन्ति । अतः व्यावहारिकीम् अवस्थां परित्यज्य अन्या पारमार्थिकी अवस्था इति नैयायिकानां मते भवितुं नैव अर्हति । अतः नैयायिकैः सत्ता द्वैविध्यं एव अङ्गीक्रियते । अधुना विद्यमानान् विषयान् सङ्कलय्य अत्र संक्षेपेण उपपादयामि । एतत् प्रमेयस्य वेदान्तशास्त्रे "कार्यं मिथ्या कारणं सत्यम्" इति स्वीकृतम् । यथा जगत् ब्रह्मणः कार्यं ब्रह्म कारणम् । अतः ब्रह्म सत्यं जगन्मिथ्या । लौकिकमुदाहरणं वक्तव्यं चेत पटः तन्तोः कार्यम् । पटस्य मिथ्यात्वात् । तन्तुः कार्पासस्य कार्यम् । अतः तन्तोः कार्यत्वात् मिथ्यात्वात् । एवं क्रमेण परममूलकारणं ब्रह्मपर्यन्तं गम्यते चेत् ब्रह्म केवलं परममूलकारणत्वात् सत्यम् । अन्यत् सर्वं मिथ्या इति तु अवगम्यते । किन्तु घटादयः तावत् दृश्यन्ते खलु? कथं तस्य मिथ्यात्वमिति चेत्तत्र उच्यते ।

सत्तात्रैविध्यं वेदान्तिभिः उररीक्रियते -

1. प्रातिभासिकसत्ता

2. व्यावहारिकसत्ता

3. पारमार्थिकसत्ता

प्रातिभासिकसत्ता –

ब्रह्मज्ञानातिरिक्तबाध्यत्वं प्रातिभसिकसतायाः लक्षणम् । यथा “शुक्तौ इदं रजतम्” इत्याकारकं ज्ञानम् । अत्र शुक्तिरूप्यज्ञानं ब्रह्मज्ञानातिरिक्तं यत् व्यावहारिकं रजतज्ञानं तेन बाध्यते । वस्तुतः स्वप्नप्रपञ्चः प्रातिभासिकसत्तायां अन्तर्भवति । **“इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्था स्वप्नावस्था”**[33] अस्यां स्वप्नावस्थायां ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि च उपरतानि भवन्ति । [34]यथा अस्तं गच्छतः सूर्यस्य रश्मयः अदर्शनं गच्छन्ति तेजोमण्डले एकीभवन्ति पुनश्च उदयतः सूर्यस्य रश्मयः सर्वत्र प्रसरन्ति तथा सुप्तस्य पुरुषस्य इमानि चक्षुरादीनि इन्द्रियाणि मनसि एकीभवन्ति पुनश्च तस्यैव जागृतस्य पुरुषस्य इन्द्रियाणि मनसः एव स्वव्यापारे प्रवर्तन्ते ।

किञ्च जागृदवस्थायां व्यवहारवासना-प्रयुक्तं मनः इन्द्रियव्यापाराभावे अपि पदार्थान् सृजति । उदाहृणार्थम् – **“अथ रथान् रथयोगान् पथः सृजते”** इत्यत्र यद्यपि स्वप्नावस्थायाम् इन्द्रियजन्यज्ञानं नास्ति तथापि विषयगोचरा अपरोक्षान्तःकरणवृत्तिः भवति । तथा च रथः अस्ति , रथयोगाः पन्थानश्च वर्तन्ते इत्येवं भानं तु ब्रह्मणः

[33] वे प-३७०

[34] प्र०उ-१/६

तदधिष्ठात्वात्[35] उपपद्यते । अतः इति ज्ञातं भवति । स्वप्नप्रपञ्चस्य ब्रह्मज्ञानेतरबाध्यत्वं वर्तते । अतः स्वप्नावस्थायाः प्रातिभासिकत्वं सिध्यति । नैयायिकैः स्वप्नावस्थायाः विपर्यये अन्तर्भावः क्रियते । विपर्ययः नाम यद्यपि भ्रमः एव, परन्तु जनकसामग्र्यां मतद्वयेऽपि भेदः वर्तते।

व्यावहारिकसत्ता –

ब्रह्मज्ञानातिरिक्ताबाध्यत्वं व्यावहारिकसत्तायाः लक्षणम् । यथा घटः । ब्रह्मज्ञानपर्यन्तं व्यावहारिकसत्तायाः प्रामाण्यं स्वीक्रियते । इदं व्यावहारिकं सत्वं ब्रह्मज्ञानेन केवलं बाध्यते इत्यतः ब्रह्मज्ञानातिरिक्ताबाध्यत्वम् इत्युक्तम् । जीवस्य जाग्रदवस्था व्यावहारिकसत्तायाम् अन्तर्भवति । इन्द्रियजन्यज्ञानावस्था जागृदवस्था[36]। ज्ञानगतविषयः यस्याम् अवस्थायां इन्द्रियेण गृह्यते सा जागृदवस्था इति कथ्यते । उदाहरणार्थम् – अयं घटः इत्यत्र घटः ज्ञानविषयः । सः घटः चक्षुरिन्द्रियेण संयोगसन्निकर्षेण जागृदवस्थायां गृह्यते ।

एवं लक्षणं कृतम् इत्यतः स्वप्नसुषुप्त्योः विषये अतिप्रसङ्गः न भवति । इन्द्रियव्यापाराभावात् तयोः अवस्थयोः । जागृदवस्थायां यत् ज्ञानं जायते तत् ज्ञानं


---

[35] अस्ति भाति प्रियं रूपं नाम चेत्यंश पञ्चकम् |
आद्य त्रयं ब्रह्म रूपं जगद्रूपं ततो द्वयम् ॥

[36] वे प-३६९

क्षणिकं भवति इति जानीमः । किन्तु ज्ञानं नित्यं ब्रह्मणः स्वरूपमिति च प्रसिद्धं वेदान्ते, **सत्यं ज्ञानम् अनन्तं ब्रह्म**[37] इत्यत्र ज्ञानं ब्रह्म इत्युक्तत्वात् । अतः विवेकः कार्यः ।

(चित्रम्) ज्ञानस्य परस्पराध्यासः -



यथा अत्र दर्शितम् – चैतन्यं ज्ञानरूपम् अस्ति । वृत्तिश्च जन्यरूपा । इह चैतन्ये जन्यत्वम् अध्यारोप्यते । पुनश्च वृत्तौ ज्ञानम् आरोप्यते इति परस्पराध्यासपूर्वकं वृत्तौ ज्ञानत्वस्य उपचारः क्रियते इति सिद्धान्तः । तच्च "उपाध्युपहितयोः तादात्म्याध्यासात् उपाधिगतधर्माः उपहितेऽपि भासन्ते" इति न्यायेन । अतः ज्ञानम् उत्पद्यते इति यत्र व्यवहारः तत्र सर्वत्रापि वृत्यात्मकमेव ज्ञानं स्वीकर्तव्यम् । **इन्द्रियजन्य-ज्ञानावस्था जागृदवस्था** इति सिद्धम् भवति । तस्मादेव कारणात् स्वप्नसुषुप्त्योः लक्षणे अतिव्याप्तिशङ्का न भवति इन्द्रियाजन्यत्वात् तयोः तद्गतज्ञानयोः च । माण्डूक्योपनिषदस्थं

---

[37] तै उ १/१

किञ्चिदुपपाद्यते । जागृदवस्थायां जीवः बहिरिन्द्रियो भवति । जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग-एकोनविंशतिमुखः स्थूलभुक्[38] इति माण्डूक्योपनिषदि निरूपणात् । अस्याम् अवस्थायां जीवस्य नवदशमुखानि नवदशद्वाराणि ज्ञानप्राप्तये भवन्ति । तानि च द्वाराणि

- पञ्चज्ञानेन्द्रियाणि ।
- पञ्चकर्मेन्द्रियाणि ।
- चत्वारः मनो विकाराः {अहङ्कारः चित्तम् मनः बुद्धिः} ।
- पञ्च प्राणाः ।

एतेभ्यः द्वारेभ्यः सः जीवः ज्ञानं प्राप्नोति । नैयायिकैः अपि जाग्रदवस्थायाः व्यावहारिकसत्तायाम् एव अन्तर्भावः क्रियते ।

पारमार्थिकसत्ता –

त्रिकालाबाध्यत्वं पारमार्थिकसत्तायाः लक्षणम् । यथा ब्रह्मणः सत्वम् । ब्रह्मणः नित्यत्वात् कालत्रयाबाध्यत्वम् ।

एवञ्च वेदान्तिभिः या पारमार्थिकी अवस्था अङ्गीक्रियते सा नैयायिकैः नैव उच्यते । तस्मात् त्रिविधसत्तायाः उपपादनं कृतवद्भिः सिद्धिकारैः नैयायिकसिद्धान्तः नैव अङ्गीकृतः इति ज्ञायते ।

---

[38] मु उ १\२

मायायाः जगत्कारणत्वनिरूपणम्

“मायाकल्पितमातृतामुखमृषाद्वैतप्रपञ्चाश्रयः” इति अद्वैतसिद्धौ आदौ मङ्गलश्लोके मायायाः जगत्कारणत्वं प्रतिपादितम् । जगतः माया कल्पितत्वं सिद्धिकारैः उक्तम् । नैयायिकैः जगतः मायाकारणत्वं न उच्यते । अतः मङ्गलश्लोके मायायाः जगत्कारणत्वकथनेन नैयायिकानां सिद्धान्तः निराकृतः इति ज्ञायते । मतद्वयेऽपि सृष्टिप्रक्रियायां महान् भेदः वर्तते । तार्किकाणां मतेः परमाणोः आरभ्यसृष्टिः उक्ता । अतः नैयायिकाः परमाणुकारणवादिनः । मायास्वरूपं नैयायिकैः नैव कल्पितं वर्तते । तर्हि नैयायिकानां मते जगतः सृष्टिः कथं जाता इति चेत् – आदौ ईश्वरस्य चिकीर्षावशात् परमाणौ क्रिया जायते । ततः परमाणुद्वयसंयोगेन द्व्याणुकम् उत्पद्यते । ततः द्व्यणुकत्रयसंयोगेन त्र्यणुकम् उत्पद्यते । एवं क्रमेण पृथिव्याः जलादीनां च उत्पत्तिः नैयायिकैः साध्यते । परन्तु वेदान्तिभिः एवं क्रमेण उत्पत्तिः नैव उच्यते । इदानीं तावत् मायायाः जगत्कारणवादः उपस्थाप्यते । **“मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्”**[39] इत्यादि श्रुतौ तुशब्दः मायायाः प्रकृतित्वम् अवधारयति । यथा मृद्गतश्लक्ष्णत्वादेः घटादौ अनुगमात् मृत् घटस्य उपादानम् भवति । तथैव मायागतजाड्यस्य जगति अनुवर्तमानत्वात् माया जगतः उपादानं भवति । एवं

---

[39] श्वे०उ ४/१०

श्रुतियुक्तिभ्यां प्रमाणितत्वात् माया एव जगतः उपादानं ,न ब्रह्म इति आशयः । अत्र विषये चत्वारः पक्षाः उपस्थाप्यन्ते ।

- **पदार्थतत्त्वनिर्णयकाराः** एवं बृवन्ति – ब्रह्म-माया इति उभयमपि उपादानकारणं भवति । ब्रह्मणः सत्वादेः मायायाश्च जाड्यस्य च घटादौ अनुवर्ततमानत्वात् । किन्तु उपादाने भेदः वक्तव्यः । जगत्प्रति ब्रह्म विवर्तमानतया उपादानं भवति । माया तु परिणममानतया उपादनमिति भेदः वर्तते एव ।
- **संक्षेपशारीरकाराणां** मतम् – एतेषां मतरीत्या ब्रह्मैव केवलम् उपादानं न माया । कूटस्थस्य ब्रह्मणः स्वतः कारणत्वानुपपत्तेः माया द्वारकारणमिति कथ्यते । कुतः इति चेत् यदि मायां विनैव ब्रह्म उपदानं स्यात्, तदा ब्रह्मणः स्वतः परिणामित्वम् स्यात् । तथा च परिणामपरिणामिनोः वस्तुतः भेदानङ्गीकारात् जन्मादिविकारैः ब्रह्म अपि विकारवत् स्यात् । किन्तु **"न जायते** [40]**"** इत्यादि श्रुतिषु ब्रह्मणः जन्मादि विक्रियाभावः उच्यते । अतः कारणात् मायाद्वारा ब्रह्मणः कारणत्वं वाच्यम् । अतः माया द्वारकारणं भवति । किन्तु मायायाः उपादानत्वाभावात् प्रपञ्चस्य जाड्यं न स्यात् इति चेत्- अकारणमपि मायाजाड्यं जगति अनुवर्तते । यथा मृदः मृदुत्वं घटस्य अनुपादानमपि सत् घटे मृदुत्वम् अनुवर्तते । तद्वत्।

[40] क०उ १/१८

वाचस्पतिमिश्राः एवं वदन्ति – जगति अनुगतं जाड्यं न उपादानकारणगुणः । आपि तु जगतः एव स्वाभाविकं जाड्यम् । अतः प्रपञ्चे जाड्यसिध्यर्थं मायायाः उपादानत्वं, कार्यानुगतकारणत्वं वा न कल्पनीयम् । तस्मात् ब्रह्म एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतया उपादानं भवति । माया तु निमित्तकारणम् एव ।

सिद्धान्तमुक्तावलीकारास्तु एवं ब्रुवन्ति – मायाशक्तिरेव उपादानम् । न ब्रह्म उपादानम् । कुतः इति चेत् ब्रह्मणः स्वरुपं [41]"तदेतत् ब्रह्म अपूर्वम् अनपरं" (तस्यार्थः – पूर्वं-कारणं न विद्यते यस्य तदपूर्वम् । अपरं- कार्यं न विद्यते यस्य तत् अपरम्) " [42]न तस्य कार्यं करणञ्च विद्यते" (तस्य करणं – जगत्सृष्टिसाधनम्)इत्यादि श्रुतेः न ब्रह्म जगतः उपादानम् । किन्तु जगदुपानमायाधिष्ठातृत्वेन विद्यमानस्य ब्रह्मणः उपादनत्वम् उपचारात् केवलम्|

तदुक्तं – [43]**ब्रह्मज्ञानात् जगज्जन्म ब्रह्मणोऽकारणत्वतः ।**

अधिष्ठानत्वमात्रेण कारणं ब्रह्म गीयते ॥

अधुना मायायाः स्वरूपं किञ्चित् विचार्यते । वेदान्तशस्त्रे माया इति पदार्थः सुप्रसिद्धः वर्तते । मीयते अपरोक्षवत् प्रदर्श्यते अनया इति माया । स्वीयशक्तिवशात् प्रपञ्चमिमम् प्रत्यक्षवत् सत्यमिव प्रदर्शयति इति मायाशब्दः अन्वर्थः भवति ।

---

41 बृ०उ २/५/१९


42 श्वे०उ ६/८

43 वेदान्तसिद्धान्तमुक्तावली- ४६

माया स्वरूपम् -एवं विवृतं वर्तते –

- सदसद्भ्याम् अनिर्वचनीया ।
- सत्व-रजस्तमोरूपत्रिगुणात्मिका [44]।
- अव्याकृतनामरूपात्मिका ।
- ज्ञानविरोधिनी भावरूपा ।
- आवरण-विक्षेपशक्तिमती ।

प्रकृतिः,तमः,अव्यक्तम्,अज्ञानं,अविद्या इत्यादि शब्दैः मायायाः व्यवहारः शास्त्रलोके वर्तते । **"मायान्तु प्रकृतिं विद्यात्, मायिनं तु महेश्वरम्[45]"** इति श्रुतेः, सा माया ईश्वराधीना अस्वतन्त्रः पदार्थः इति ज्ञायते ।



आवरणशक्तिः – आव्रियते ब्रह्मणः शुद्धं स्वरूपम् अनया शक्त्या इति आवरणशक्तिः ।

---

[44] अजामेकां लोहित-शुक्ल-कृष्णाम् (श्वे०उ ४/५)

[45] श्वे०उ ४/१०

विक्षेपशक्तिः - शुद्धे ब्रह्मणि धर्मधर्मिभावं विषयविषयिभावम् अनात्मबुद्धिं प्रपञ्चभेदभावं च उत्पादयति या शक्तिः सा ।

मतभेदाः –

अभेदपक्षः –

माया, अविद्या इत्यनयोः अभेदः इति ये अभ्युपगच्छन्ति तेषाम् अयं पक्षः । अयं सिद्धान्तः विवरणकारसिद्धान्तः इति प्रसिद्धः वर्तते । वस्तुतः न माया अविद्यातः भिद्यते, यथा अन्तःकरणमेव वृत्तिभेदेन अहंकारः,बुद्धिः,मनः,चित्तम् इति भेदेन व्यवह्रियते तथा सृष्टिप्रकरणे मायाशक्तिः ईश्वरदृष्ट्या, संसारिप्रकरणे जीवदृष्ट्या अविद्या इति भेदेन व्यवह्रियते ।

भेदपक्षः - माया, अविद्या इत्यनयोः भेदः अस्ति इति ये अभ्युपगच्छन्ति तेषाम् अयं पक्षः । पञ्चदशीकाराणाम् अयं सिद्धान्तः इति प्रसिद्धं वर्तते । एतत् मतानुसारं **विशुद्धसत्वप्रधाना माया** इति कथ्यते । पुनः **मलिनसत्वप्रधाना अविद्या** इति कथ्यते।

[46]अथवा - समष्टिरूपम् अज्ञानं माया इति । व्यष्टिरूपेण विद्यमानम् अज्ञानम् अविद्या इति वा व्यवहारः।

[46]वेदान्त सारः(कन्नड)-३१

समष्टि- अज्ञाने प्रतिबिम्बितः आत्मा ईश्वरः भवति । स एव सर्वव्यापी । ईश्वराधिष्ठितमायायाः सर्वव्यापित्वात् । ईश्वरः अनादिः । ईश्वराधिष्ठितमायायाः अनादित्वात् ।

मायायाः व्यष्ट्यभिप्रायेण अविद्या इति संज्ञा भवति । तत्र प्रतिबिम्बितः आत्मा जीव इत्युच्यते । अतः सः प्राज्ञः (प्रकृष्टेन अज्ञः) अल्पज्ञः भवति । प्राज्ञस्य उपाधेः अविद्यायाः अल्पज्ञत्वात् ।

तदुक्तं पञ्चदशीकारेण-

[47]**तमोरजः सत्वगुणाः प्रकृतिः द्विविधा च सा ।**

सत्वशुध्यविशुध्याभ्यां मायाऽविद्ये च ते मते ॥

एवञ्च अद्वैतसिद्धौ तर्किकाणां मतं निराकृत्य मायायाः जगत्कारणत्ववादः उपपादितः इति ज्ञायते।

[47] पञ्चदशी

सत्कार्यवादनिरूपणम्

अद्वैतसिद्धौ ग्रन्थकारैः सत्कार्यवादः अङ्गीक्रियते इति कण्ठरवेण उक्तमस्ति । तदुक्तं सिद्धिकारैः – [48]“अवस्थितिश्च द्वेधा , स्वरूपेण कारणात्मना च, सत्कार्यवादाभ्युपगमात्” इति । अद्वैतसिद्धान्ते सत्कार्यवादः अङ्गीकृतः वर्तते। परन्तु नैयायिकैः असत्कार्यवादः अङ्गीकृतः। असत्कार्यवादः नाम उत्पत्तेः पूर्वं कार्यं न भवति । परन्तु उत्पत्तेः पूर्वम् अविद्यमानं सत् स्वसमवायिकारणे समवायसम्बन्धेन कार्यम् उत्पद्यते इति वादः असत्कार्यवादः इति उच्यते । उदाहरणार्थं – घटः उत्पत्तेः पूर्वं कारणात्मना अविद्यमानः सन् कारणत्वेनाभिमते कपाले समवायेन उत्पद्यते । अद्वैतसिद्धिकारैः अस्माभिः सत्कार्यवादः अङ्गीक्रियते इति कथनेन नैयायिकाः खण्डिताः। सृष्टिविषये बहूनां दार्शनिकानां बहवः वादाः श्रूयन्ते । तत्र अद्वैतवेदान्तिभिः सत्कार्यवादः अङ्गीक्रियते । अतः सत्कार्यवादः उपपाद्यते । समग्रं जगत् कार्यकारणभावेन व्याप्तं वर्तते । यद्यत् जगति वर्तते तस्य सर्वस्यापि एकं कारणं निश्चयेन भवति । उदाहरणार्थं कार्पासवृक्षात् पुष्पं जायते । पुष्पात् कार्पासः जायते । कार्पासात् तन्तवः निर्मीयन्ते । तन्तुभ्यः पटः निर्मीयते । पटात् युथकं निर्मीयते । अत्र कार्पासस्य कृते पुष्पं कारणं चेत् तन्तुः तस्य कार्यम् । तन्तोः कार्पासः कारणं चेत् पटः तस्य कार्यम् । पटस्य तन्तुः

---

[48] अद्वैतसिद्धिः पृ सं १३०

कारणं चेत् युतकं तस्य कार्यम् । एवं क्रमेण सर्वम् इदं कार्यकारणभावेन व्याप्तं वर्तते ।

सर्वस्यापि कारणं किम् इति ज्ञातुं शक्यते । किन्तु सर्वस्यापि कार्य उत्पत्तेः पूर्वम् आसीत् आहोस्वित् न आसीत् इत्यत्र बहवः विवदन्ते । तत्र अद्वैतवेदान्तिभिः कथ्यते यत् उत्पत्तेः पूर्वं कार्यं कारणात्मना आसीत् इति । यतो हि "नासतो वियते भावः" इति गीतार्चायाणाम् उक्तेः अनुसारम् अविद्यमानम् उत्पत्तुं न शक्यते । यथा घटः पूर्वं मृदि आसीत् । पटः स्वोत्पत्तेः पूर्वं तन्तौ आसीत् । तत्र कुम्भकारः मृदं घटाकारेण परिणतवान् । मृदः घटाकारेण परिणाममात्रेण घटः नूतनतया उत्पन्नः इति न वक्तव्यम् । आकारस्य अनित्यत्वेन नाशोत्तरं मृद्रूपेणैव दृश्यमानत्वात् । एवमेव इदं जगदपि उत्पत्तेः पूर्वं सद्रूपेण एव आसीत् । अत्र किं प्रमाणम् इति चेत् "सदेव सौम्य इदमेव अग्र आसीत्"[49] इति श्रुतेः | तस्मात् सत्कार्यवादः इति अद्वैतवेदान्तिनां सिद्धान्तः

[49] छान्दोग्यम् (६)

आत्मस्वरूपविमर्शः

अद्वैतसिद्धिकारैः मङ्गलश्लोके एव आत्मनः स्वरूपं प्रदर्शितम् । सत्यज्ञानसुखात्मकः आत्मा इति सिद्धिकाराः कथयन्ति । वेदान्तिनां मते जीवात्मपरमात्मनोः भेदः नास्ति इत्यतः उभयोः अपि समानं स्वरूपम् । आत्मा सत्यस्वरूपः, आत्मा सुखस्वरूपः, आत्मा ज्ञानस्वरूपः इति सिद्धिकारैः कथितं वर्तते । असुखम् इति श्रुत्या आत्मनः सुखस्वरूपत्वम् उच्यते । परन्तु नैयायिकैः आत्मनि समवायेन सुखं वर्तते इति उच्यते । परन्तु असुखम् इति उपनिषद्वाक्येन न विद्यते सुखं यस्य इति अर्थः लभ्यते । अनेन नैयायिकैः यत् उच्यते आत्मनि सुखं वर्तते इति तत् निरस्तं भवति । [50]सत्यं ज्ञानमनन्तं ब्रह्म इति उपनिषदः वाक्यम् । अत्र आत्मनः ज्ञानस्वरूपत्वं , सत्यस्वरूपत्वं च उक्तं वर्तते । परन्तु नैयायिकैः आत्मनः ज्ञानाधिकरणत्वम् उच्यते । वेदान्तिनां मते श्रुतिः प्रबलं प्रमाणम् । अतः श्रुत्या एव आत्मनः ज्ञानस्वरूपत्वं सत्यस्वरूपत्वं च उच्यते इत्यतः तद्विरुद्धं नैयायिकोक्तं न अङ्गीक्रियते । अतः अत्र विमर्शः कर्तव्यः ।

जगति बहूनि वस्तूनि वर्तन्ते । तत्र कानिचित् वस्तूनि प्रत्यक्षप्रमाणेण ज्ञातुं शक्यन्ते । कानिचित् वस्तूनि अनुमानप्रमाणेन ज्ञातुं शक्यन्ते । कानिचित् वस्तीनि अन्येन प्रमाणेन । सर्वेषाम् अपि द्रव्याणां किञ्चित् परिमाणं भवत्येव । परिमाणं नाम किम्?

---

[50] यजुरारण्यकम् पृ सं २०२

इति प्रश्ने सति “मानव्यवहारासाधारणकारणं परिमाणम्”[51] इति शास्त्रकाराः कथयन्ति । परिमाणस्य विषये विश्वनाथपञ्चाननाचार्याः एवं कथयन्ति

“[52]परिमाणं भवेन्मानव्यवहारस्य कारणम्।

अणुदीर्घं भवेध्रस्वमिति तद्भेद ईरितः॥

अनित्ये तदनित्यं स्यात् नित्येनित्यमुदाहृतम्।

सङ्ख्यातः परिमाणाच्च प्रचयादपि जायते॥

अनित्यं द्व्यणुकादौ तु संङ्ख्याजन्यमुदाहृतम्॥

परिमाणं घटादौ तु परिमाणजमुच्यते।

प्रचयः शिथिलाख्यो यः संयोगः तेन जन्यते॥

परिमाणस्य विषये शास्त्रकाराणां समानाभिप्रायः वर्तते । अयमणुः इदं महत् इत्यादि व्यवहारं प्रति अथवा ज्ञानजनकशब्दप्रयोगं प्रति यः गुणः असाधारणं कारणं सः गुणः परिमाणम् इति उच्यते । परिमाणस्य नित्यत्वम्-अनित्यत्वम् इति उभयमपि अस्ति ।नित्येषु पदार्थेषु वर्तमानं इदं परिमाणं नित्यम् । उदाहरणार्थं परमाणुः,आकाशः,कालः,दिक् । अनित्येषु पदार्थेषु वर्तमानं इदं परिमाणं अनित्यम् । उदाहरणार्थं घटः पुस्तकम् इत्यादि । परिमाणं त्रिविधमिति उच्यते । अणुपरिमाणं, मध्यमपरिमाणं, विभुपरिमाणं च इति। इदं परिमाणं त्रिधा जायते।

---

[51] तर्कसङ्ग्रहः पृ सं ६१ (रामकृष्णाश्रमप्रकशितम्)

[52] मुक्तावली श्लो.सं १०९-११२

परिमाणं सङ्ख्यातः जायते । तथा हि अत्र एकः नियमः स्मर्तव्यः। परिमाणं स्वसमानजातीयं परिमाणं जनयति । एवमेव स्वोत्कृष्टं परिमाणं जनयति इति। उदाहरणार्थं कपालपरिमाणं घटपरिमाणं जनयति । घटपरिमाणं कपालपरिमाणापेक्षया उत्कृष्टम् । एवमेव घटपरिमाणं कपालपरिमाणसजातीयञ्च । कुत इति चेत्-कपालपरिमाणे यः परिमाणविभाजकोपाधिः वर्तते सः एव परिमाणविभाजकोपाधिः घटपरिमाणे अपि वर्तते ।तस्मात् घटपरिमाणे कपालपरिमाणजन्यत्वमुपपद्यते । अत्र एकः प्रश्नः उदेति - द्व्यणुकपरिमाणस्य जनकः कः इति । एवमेव त्र्यणुकपरिमाणस्यापि जनकः कः इति । न हि अणुपरिमाणं द्व्यणुकपरिमाणस्य जनकं भवितुम् अर्हति । न वा द्व्यणुकपरिमाणं त्र्यणुकपरिमाणस्य जनकं भवितुम् अर्हति । कुत इति चेत् द्व्यणुकपरिमाणे परमाणुपरिमाणसजातीयस्य सत्वे अपि परमाणुपरिमाणापेक्षया उत्कृष्टत्वं नास्ति। अतः द्व्यणुकपरिमाणस्य जनकं अणुपरिमाणं भवितुं नार्हति । एवमेव त्र्यणुकपरिमाणे द्व्यणुकपरिमाणापेक्षया उत्कृष्टत्वस्य सत्वेऽपि द्व्यणुकपरिमाणसजातीयत्वं नास्ति । कुत इति चेत् द्व्यणुकपरिमाणे अणुत्वं अस्ति, त्र्यणुकपरिमाणे तु महत्वं अस्ति । अतः सजातीयत्वं नास्ति इति उच्यते । तस्मात् द्व्यणुकपरिमाणे त्र्यणुकपरिमाणजनकत्वं नास्ति । तर्हि द्व्यणुकपरिमाणस्य त्र्यणुकपरिमाणस्य जनकं किमिति प्रश्नः भवति । तत्र द्व्यणुकपरिमाणस्य जनकं परमाणुद्वयगतद्वित्वसंख्या । एवमेव त्र्यणुकपरिमाणस्य जनकं द्व्यणुकत्रयगतत्रित्वसंख्या । एवञ्च सङ्ख्यातः परिमाणं जायते इति ज्ञातुं शक्यते । यथा सङ्ख्यातः परिमाणस्य उत्पत्तिः तद्वत् परिमाणादपि परिमाणस्य

उत्पत्तिः भवति । यथा कपालपरिमाणात् घटपरिमाणं जायते । तन्तुपरिमाणात् पटपरिमाणं जायते । यथा परिमाणात् परिमाणं जायते । तद्वत् प्रचयादपि जायते । आत्मनि अपि परिमाणम् अस्ति इति अस्माभिः पूर्वं चिन्तितम् । तच्च परिमाणं किमिति चेत् - विभुपरिमाणं इत्येव वेदितव्यम् । इदं विभुपरिमाणं त्रितयादपि न जायते । कुत इति चेत् आत्मनः नित्यत्वात्, आत्मनि वर्तमानपरिमाणस्यापि नित्यत्वम् । आत्मपरिमाणस्य नित्यत्वादेव तस्य उत्पत्तिः नास्ति । इदं विभुपरिमाणं न प्रत्यक्षवेद्यम् । कुतः इति अधुना चिन्तनीयम् । ततः प्राक् अयं विचारः किमर्थं प्रस्तूयते इति किञ्चित् उपपादनीयम् अस्ति । यतोहि येषां वस्तूनां परिमाणं प्रत्यक्षं, तेषां वस्तूनां परिमाणविषये लौकिकैः वा शास्त्रकारैः वा विवादः न कृतः । परन्तु येषां वस्तूनां परिमाणं न प्रत्यक्षं तेषां वस्तूनां परिमाणविषये शास्त्रकारैः महती चर्चा कृता अस्ति । उदाहरणार्थं मनसः परिमाणं न प्रत्यक्षवेद्यम् । अतः मनसः परिमाणविषये अस्ति महती चर्चा । केचन मनसः विभुत्वं साधयन्ति । तेषां मते मनसः विभुत्वसाधने युक्तिः का इति चेत् [53]"मनः विभु स्पर्शरहितद्रव्यत्वात् आकाशवत्" इति । यथा आकाशस्य स्पर्शरहितद्रव्यत्वात् विभुत्वं तुल्यया रीत्या मनसः अपि स्पर्शरहितद्रव्यत्वात् विभुत्वं वक्तव्यम् । तस्मात् मनः विभु । एवं रुपेण मनसः विभुत्वं केचन साधयन्ति । परन्तु इदं नैयायिकाः निराकुर्वन्ति । किमर्थमिति चेत्, ज्ञानोत्पत्तिं प्रति आत्ममनसोः संयोगः असमवायिकारणम् इति उच्यते । ज्ञाननिष्ठसमवायसम्बन्धाच्छिन्नकार्यतानिरूपितसमवायसम्बन्धावच्छिन्न-

---

[53] तर्कसङ्ग्रहदीपिका पृ सं ४३

कारणताश्रयत्वम् आत्ममनःसंयोगे वर्तते । विभुद्वयसंयोगः नाङ्गीक्रियते । अतः मनसः विभुत्वे आत्ममनःसंयोगः सर्वदा भवितुमेव नार्हति इति कृत्वा ज्ञानोत्पत्तिः एव न स्यात् । अतः मनसः विभुत्वं नैयायिकैः नाङ्गीक्रियते । अस्तु विभुद्वयसंयोगः इत्यदि आग्रहः, तर्हि मनसः विभुत्वात् आत्ममनस्संयोगस्य सर्वदा विद्यमानत्वात् सर्वदा ज्ञानोत्पत्तिप्रसङ्गः । अस्तु, सर्वदा ज्ञानोत्पत्तिः भवतु इति नाभ्युपगन्तव्यम् । कुत इति चेत् पुरुषस्य कदापि सुषुप्तिः एव न स्यात् ।

अतः सुषुप्त्यनुरोधेन मनसः विभुत्वं नाङ्गीकर्तव्यम् । अतः मनः अणु इति नैयायिकाः वदन्ति । मनसः अणुत्वे तु यदा मनः पुरीतत् नाडीं प्रविशति तदा सुषुप्तिः, यदा मनः पुरीतत् नाडीतः बहिः निस्सरति तदा ज्ञानोत्पत्तिः इति व्यवस्था भवितुमर्हति । एवञ्च एतत् सर्वविधसौकर्याय मनः अणू इति नैयायिकानां सिद्धान्तः । तदुक्तं विश्वनाथपञ्चाननाचार्यैः -

[54]साक्षात्कारे सुखादीनां करणं मन उच्यते।

अयौगपद्यात् ज्ञानानां तस्याणुत्वमिहोच्यते॥

केचन वेदान्तिनः मनसः मध्यमपरिमाणत्वम् अङ्गीकुर्वन्ति । तत्र मनसः मध्यमपरिमाणत्वे उत्पत्तिविनाशशालित्वमपि वेदान्तिभिः अङ्गीक्रियते । सः उत्पत्तिविनाशशालित्वे किं प्रमाणमिति चेत् - श्रुतिरेव प्रमाणमिति अङ्गीकुर्वन्ति । तर्हि

---

[54] कारिकावली श्लो सं ८५

का सा श्रुतिः इति चेत् - “तस्मान्मनोऽसृजत” इति श्रुतिरेव तत्र प्रमाणम् । एवञ्च यस्य वस्तुनः परिमाणस्य प्रत्यक्षत्वं नास्ति तत्र विवादः अस्त्येव इति ज्ञायते । आत्मनः पूर्वोक्तरीत्या परिमाणं विभुपरिमाणम् । विभुपरिमाणस्य प्रत्यक्षत्वं भवितुं नार्हति । कुत इति चेत् विभुपरिमाणेन सह इन्दियसन्निकर्षाभावात् । मध्यमपरिमाणेन सह इन्द्रियसन्निकर्षः भवितुमर्हति । उदाहरणार्थं घटपरिमाणम् । शास्त्रकारैः द्रव्यप्रत्यक्षं प्रति उद्भूतरूपस्य समवयेन कारणत्वं अङ्गीकृतम् । एवञ्च घटे उद्भूतरूपस्य सत्वादेव प्रत्यक्षत्वं सम्भवति । शास्त्रकाराः कथयन्ति द्रव्यप्रत्यक्षं प्रति महत्वावच्छिन्न-उद्भूतरूपावच्छिन्न-चक्षुस्स्त्वगन्यतरीन्द्रियस्य कारणत्वमङ्गीकृतम् । एवमेव द्रव्यगतरूपप्रत्यक्षत्वं प्रति महत्वावच्छिन्न-चक्षुस्स्त्वगन्यतरसंयुक्तसमवायसन्निकर्षस्य कारणत्वम् अङ्गीकृतम् । एवमेव परिमाणप्रत्यक्षं प्रत्यपि उद्भूतरूपावच्छिन्नचक्षुस्स्त्वगन्यतरसंयुक्तसमवायसन्निकर्षस्य कारण्त्वं वर्तते । अनेन किं ज्ञायत् इत्युक्ते यस्मिन् द्रव्ये उद्भूतरूपं वर्त्तते, तस्य द्रव्यस्य प्रत्यक्षत्वं सम्भवति । एवमेव यस्मिन् द्रव्ये उद्भूतरूपं वर्तते, तद्द्रव्यगतपरिमाणस्य एव प्रत्यक्षत्वं सम्भवति । इदानीम् अत्र अयं विमर्शः कर्तुं शक्यते यत् आत्मगतपरिमाणस्य प्रत्यक्षत्वम् अस्ति वा न वा इति । ततः प्राक् आन्तरिकप्रत्यक्षं प्रति किं कारणमिति चिन्तयामः। तत्र आन्तरिकप्रत्यक्षत्वं प्रति सन्निकर्षत्रयं कारणत्वेन लभ्यते ।

- [55]आत्मप्रत्यक्षे मनस्सयोगः कारणम्

---

[55] मुक्तावली पृ सं १९२

- आत्मसमवेतमानसप्रत्यक्षे मनस्संयुक्तसमवायः कारणम्
- आत्मसमवेतसमवेतमानसप्रत्यक्षे मनस्संयुक्तसमवेतसमवायः कारणम् ।

तर्हि आत्मनः प्रत्यक्षत्वं सम्भवति इति तु ज्ञायते । परन्तु यथा घटादीनां प्रत्यक्षत्वं प्रति तद्गतपरिमाणस्यापि कारणत्वं तद्वत् आत्मप्रत्यक्षत्वं प्रति तद्गतपरिमाणस्यापि कारणत्वम् अस्ति वा इति जिज्ञासा उदेति । तत्रोच्यते - आत्मगतं यत् परममहत् परिमाणं तस्य आत्मप्रत्यक्षं प्रति कारणत्वं नास्ति । कथमिदं ज्ञायते इति चेत् साधर्म्यवैधर्म्यप्रकरणे—[56]"पारिमाण्डाल्यभिन्नानां कारणत्वमुदाहृतम्" इति श्लोकव्याख्यानसन्दर्भे मुक्तावलीकारैः [57]"एवम् परममहत्परिमाणम् अतीन्द्रियसामान्यं विशेषाश्च बोध्याः" इति उक्तम् । अत्र केषां कारणत्वं साधर्म्यम् इति साधितम् । तदा ग्रन्थकारैः उक्तम् यथा पारिमाण्डल्यस्य कारणत्वं नास्ति । तद्वत् परममहत्परिमाणस्य अतीन्द्रियसामान्यस्य विशेषाणाञ्च कारणत्वं नास्ति इति उक्तम् । परन्तु परममहत्परिमाणं कारणमेव न इति न वक्तव्यम् । यतोहि तत्रैव अग्रे ग्रन्थकारैः उक्तम् आत्मप्रत्यक्षे आत्मगतपरममहत्परिमाणस्य कारणत्वमस्त्येव । अतः आत्मवृत्तिपरममहत्परिमाणभिन्नपरममहत्परिमाणस्यैव कारणत्वं नास्ति । तर्हि आत्मगतपरममहत्परिमाणस्य कारणत्वमस्तीत्येव प्राप्तम् ।

अस्मिन् विषये उदयनाचार्याः किं वदन्तीति विचारयामः । उदयनाचार्यास्तु टीकाकाराः इत्येव प्रसिद्धाः। टीकाकारैः उदयनाचार्यैः आत्मगतपरममहत्परिमाणस्य

---

[56] कारिकावली श्लो.स.१५

[57] मुक्तावली पृ.सं ७९

प्रत्यक्षयोग्यत्वं नास्तीति उच्यते । परन्तु केचन उदयनाचार्याणां वचनम् एवं वर्णयन्ति आत्मभिन्नवृत्तिपरममहत्परिमाणस्यैव कारणत्वं नास्ति इति । तस्मात् आत्मगतपरममहत्परिमाणस्य स्वप्रत्यक्षं प्रति कारणत्वं भवत्येव । एवञ्च आत्मनः प्रत्यक्षत्वं भवितुमर्हति । परन्तु बाह्यप्रत्यक्षत्वं भवितुं नार्हति, आन्तरिकप्रत्यक्षत्वमेव भवितुमर्हति । अतः अत्र बहूनां विवादः वर्तते । आत्मनः परिमाणं किम् इति । नैयायिकैः आत्मनः व्यापकत्वमेव अङ्गीकृतम् । तत्र नैयायिकानां मते परमात्मनः अपि विभुत्वात् व्यापकत्वम्, जीवात्मनः अपि विभुत्वात् व्यापकत्वम् । नैयायिकैः जीवात्मनः अनेकत्वम् अङ्गीक्रियते । वेदान्तिभिस्तु जीवात्मनः अनेकत्वं नाङ्गीक्रियते । नैयायिकानां मते जीवात्मनः अनेकत्वे अनुमानं प्रमाणम् । तथा च जीवात्मा अनेकः सुखादिवैचित्र्यात् । आत्मनः द्रव्यत्वात् आत्मनः समवायेन गुणाश्रयत्वम् अङ्गीक्रियते । जीवात्मनि चतुर्दशगुणाः भवन्ति ।

तदुक्तं विश्वनाथपञ्चाननाचार्यैः -

[58]"बुद्ध्यादि षट्कं सङ्ख्यादिपञ्चकं भावना तथा।

धार्माऽधर्मौ गुणा एते आत्मनः स्युः चतुर्दश"॥

यथा जीवात्मनः द्रव्यत्वात् गुणाश्रयत्वं तुल्यया रीत्या परमात्मनः अपि द्रव्यत्वात् गुणाश्रयत्वं वर्तते नैयायिकानां मते ।

[58] कारिकावली श्लो.सं. ३२

तदुक्तं विश्वनाथपञ्चाननाचार्यैः -

“[59]संख्यादिपञ्चकं बुद्धिरिच्छा यत्नोपि चेश्वरे”।

तस्मात् नैयायिकैः सुखादिरूपगुणाश्रयत्वम् आत्मनि अङ्गीक्रियते इति कृत्वा सुखादिभेदप्रयुक्तभेदः जीवात्मनि उच्यते । परन्तु वेदान्तिभिः आत्मनि कोऽपि गुणः नाङ्गीक्रियते । अतः आत्मनः अनेकत्वं नोच्यते । अतः एव श्रुतिप्रमाणानुसारेण अद्वैतसिद्धिकाराः आत्मा सत्यज्ञानसुखात्मकः इति उक्तवन्तः । तेन नैयायिकानाम् आत्मस्वरूपं खण्डितं भवति ।

[59] कारिकावली श्लो.सं ३४

संयोगस्य अव्याप्यवृत्तित्वम्

अद्वैतसिद्धौ संयोगस्य अव्याप्यवृत्तित्वं निराकृतं वर्तते । [60]प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वम् इति द्वितीयमिथ्यात्वस्य लक्षणम् । आकाशस्य अवृत्तित्वात् प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं आकाशादौ सिद्धमेव वर्तते इत्यतः सिद्धसाधनं पूर्वपक्षिभिः आक्षिप्यते । अतः तस्य परिहाराय सिद्धिकारैः यदधिकरणं तत्सत् तन्निष्ठाभावप्रतियोगित्वम् इति परिष्क्रियते । एवं सति आकाशस्य वृत्तित्वं नास्ति इत्यतः आकाशे लक्षणसमन्वयाभावात् सिद्धसाधनदोषः नास्ति । परन्तु संयोगेन घटवति समवायेन घटात्यन्ताभावः वर्तते इत्यतः पूर्वपक्षिणां मते घटादौ सिद्धसाधनदोषः भवति । अतः परिहारार्थं सिद्धिकारैः आधेयतावच्छेदकसम्बन्धः यः स एव अभावीयप्रतियोगितावच्छेदकसम्बन्धत्वेन अभिमतः इति उच्यते । तथा सति घटादिषु सिद्धसाधनदोषः न भवति । एवमपि संयोगस्य अव्याप्यवृत्तित्वात् पुनः संयोगमादाय पुनः सिद्धसाधनदोषः आक्षिप्यते । कथम् इति चेत् प्रतिपन्नोपाधौ वृक्षे "अग्रे वृक्षः कपिसंयोगी मूले न" इति प्रतीतिबलात् अत्यन्ताभावप्रतियोगित्वं संयोगे सिद्धमेव इत्यतः सिद्धसाधनदोषः आक्षिप्यते । अतः तस्य परिहारार्थं सिद्धिकारैः येन रूपेण यदधिकरणतया यत् प्रतिपन्नं तेन रूपेण तन्निष्ठात्यन्ताभावप्रतियोगित्वम् इति परिष्क्रियते । एवं परिष्कारे कृते संयोगे समन्वयः न भवति । यतो हि अग्रावच्छेदेन वृक्षे संयोगः

[60] अद्वैतसिद्धिः पृ सं ५३

वर्तते चेत् तत्र तदभावः न भवति इत्यतः न दोषः । परन्तु अयं परिष्कारः नैव अपेक्षितः इति सिद्धिकाराः कथयन्ति । यतो हि संयोगतदभावयोः एकाधिकरणवृत्तित्वं भवितुम् एव न अर्हति। यतो हि यस्मिन् अधिकरणे कपिसंयोगः वर्तते, तस्मिन् एव अधिकरणे तदभावः नास्ति । यतो हि अग्रावच्छेदेन कपिसंयोगः वर्तते यदा, तदा तदवच्छेदेन एव तदभावः यदि पूर्वोक्तरीत्या सिद्धसाधनं भवेत् । परन्तु तथा न भवति । अतः एव संयोगस्य अव्याप्यवृत्तित्वं नास्ति । यतो हि एकस्मिन् अधिकरणे प्रतियोगितदभावयोः वृत्तित्वं भवितुं न अर्हति । अतः एव अग्रे वृक्षः कपिसंयोगी मूले न इति प्रतीतिः संयोगस्य अव्याप्यवृत्तित्वसाधिका न इति । परन्तु तस्यां प्रतीतौ अधिकरणद्वयं प्रतीयते इति सिद्धिकाराः संयोगस्य अव्याप्यवृत्तित्वं खण्डितवन्तः । एतेन नैयायिकानां मतं खण्डितम् इति ज्ञायते।

अधुना नैयायिकोक्तरीत्या संयोगास्य स्वरूपं चिन्तनीयं भवति । तर्कसङ्ग्रहमूलकाराः "[61]संयुक्तव्यवहारहेतुः संयोगः" इति लिखन्ति। संयुक्तव्यवहारहेतुत्वं संयोगस्य लक्षणम् इति लभ्यते । अस्य लक्षणस्य शाब्दबोधः चिन्तनीयः । संयोग इति प्रकृतेः संयोगः इति अर्थः । संयोगस्य इत्यत्र षष्ठीविभक्तेः विषयत्वम् अर्थः । प्रकृत्यर्थप्रत्ययार्थयोः निष्ठत्वं सम्बन्धः इति नियमानुसारेण संयोगनिष्ठाविषयता इति लभ्यते । व्यवहारो नाम ज्ञानजनकशब्दप्रयोगः । व्यवहारस्य इत्यत्र षष्ठीविभक्तेः कार्यत्वम् इति अर्थः । प्रकृत्यर्थप्रत्ययार्थयोः निष्ठत्वं सम्बन्धः इति नियमानुसारेण

---

[61] तर्कसङ्ग्रहः पृ सं ५४

व्यवहारनष्ठाकार्यता इति लभ्यते । हेतुः नाम कारणम् । तदुक्तम् अमरे [62]हेतुर्नाकारणाबीजमिति । तथा च पूर्वोक्त नियमानुसारेण हेतुनिष्ठा कारणता इति प्राप्तम् । कार्यताकारणतयोः परस्परं निरूप्यनिरूपकभावः सम्बन्धः । तथा च कार्यतानिरूपिताकारणता इति भवति । आदौ संयोगनिष्ठा या विषयता तस्याः निरूपकत्वसम्बन्धेन अन्वयः । आहत्य संयोगलक्षणस्य शाब्दबोधः एवं भवति यत् संयोगनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितकारणताश्रय संयोगः इति । अस्य लक्षणस्य समन्वयं पश्यामः संयोगनिष्ठविषयतानिरुपकव्यवहारो नाम इमौ संयोक्तौ इत्याकारकः व्यवहारः । तादृशव्यवहारनिष्ठकार्यतानिरुपितकारणताश्रयत्वं संयोगे वर्तते इति समन्वयः । अप्राप्तयोः या प्राप्तिः संयोगः इति उच्यते । तदुक्तं मुक्तावलीकारैः " [63]अप्राप्तयोः या प्राप्तिः सैव संयोग ईरितः" इति । संयोगः कतिविधः इति प्रश्नस्य उत्तरं विश्वनाथपञ्चाननाचार्याः एवं वदन्ति

[64]कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः।

[65]तथोभयस्पन्दजन्यो भवेत् संयोगजोपरः।

आदिमः श्येनशैलादिसंयोगः परिकीर्तितः॥

---

[62] अमरः पृ सं १.४.३०

[63] मुक्तावली पृ सं ४६५

[64] कारिकावली श्लो सं ११५

[65] कारिकावली श्लो सं ११६

[66]मेषयोः सन्निपातो यः स द्वितीय उदाहृतः।

कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः॥

तृतीयः स्यात् कर्मजोऽपि द्विधैव परिकीर्तितः ।

अधिघातोनोदनं च, शब्दहेतुरिहादिमः॥

शब्दाहेतुः द्वितीयः स्यात् इति।

स्वसमानाधिकरणवृत्तित्वं हि अव्याप्यवृत्तित्वं नाम । स्वं नाम संयोगाभावः स्वाधिकरणं वृक्षः, तद्वृत्तित्वं संयोगे वर्तते इति लक्षणसमन्वयः । केचन संयोगस्य यथा अव्याप्यवृत्तित्वम् तद्वत् रूपस्य अपि अव्याप्यवृत्तित्वम् वदन्ति । नाना वर्णयुक्तैः तन्तुभिः आरब्धः पटः कस्मिन् वर्णे भवति इति जिज्ञासा । तास्मिन् पटे नाना वर्णाः एव भवन्ति इति चित्ररूपस्य अनङ्गी कारवादिनः कथयन्ति । यदि पटे चित्ररूपं न अङ्गीकर्तव्यं तर्हि रूपस्यापि संयोगवत् अव्यप्यवृत्तित्वं अङ्गीकर्तव्यं भवति । पूर्वोक्तरीत्या स्वसमानाधिकरणवृत्तित्वं हि अव्याप्यवृत्तित्वं नाम । स्वं नीलरूपं, स्वात्यन्ताभावो नाम पीततन्ववच्छेदेन पटः । तत्र पटे वर्तते नीलतन्त्ववच्छेदेन नीलरूपं वर्तते । एवमेव स्वपदेन यदि पीतरूपं स्वीक्रियते तर्हि पीतरुपस्य अत्यन्ताभावः नीलतन्तोः अवच्छेदेन तस्मिन् पटे वर्तते । एवमेव तत्र पटे पीततन्तोः अवच्छेदेन पीतरूपं वर्तते इति समन्वयः । तस्मात् नीलादि नाना वर्णानां समुदयः तस्मिन् पटे वर्तते इति वक्तुं शक्यते । परन्तु

[66] कारिकावली श्लो सं ११७

सिद्धान्तिनः अत्र अक्षिपन्ति । यदि अव्याप्यवृत्तिनीलादिसमुदायः एव चित्ररूपम् इति कथ्यते , तर्हि चित्रपटः इत्यत्र ज्ञाने अनेकरूपाणां ज्ञाने विषयत्वं कथनीयम् इति गौरवदोषः भवति । एवमेव चित्रपटः ध्वस्तः इत्यत्र अनेकानां रूपाणां प्रागभावः ध्वंसः अपि अङ्गीकर्तव्यः इति महद्गौरवं भवति । तस्मात् पृथक् सप्तमं चित्ररूपं अङ्गीकर्तव्यम् इति अभिप्रायः ।

अत्र एकः विषयः चिन्तनीयः वर्तते । यथा चित्ररूपम् अतिरिक्तम् अङ्गीक्रियते तद्वत् चित्रगन्धः अतिरिक्तः अङ्गीकर्तव्यः इति अपेक्षा नास्ति । अत्र किञ्चित् उपपादनीयं वर्तते । नाना गन्धयुक्ताभ्यां कपालाभ्यां यः घटः आरभ्यते , तस्मिन् घटे कः गन्धः अङ्गीकर्तव्यः इति प्रश्नः उदेति । पुराणेषु काचित् कथा श्रूयते । सुन्दः उपसुन्दः च इति द्वौ राक्षसौ आस्ताम् । उभयोः अपि बलं समानं एव आसीत्। केनचित् कारणेन उभयोः मध्ये कोलाहलः आरब्धः। सः कोलाहलः तीव्ररूपतां गतः । परं उभयोः बलं समानं आसीत् इति कारणेन परस्परं मारणम् उभाभ्यां कृतम् इति वर्तते काचित् कथा। अनया कथया एकः न्यायः निष्पन्नः यत्र समप्राबल्यं तत्र एकेन अपरस्य नाशः इति परस्परं नाशः भवति इति। अतः एतदर्थकः न्यायः सुन्दोपसुन्दन्यायः इति कथ्यते। तस्मात् प्रकृते अनेन न्यायेन नानागन्धयुक्तकपालाभ्यां आरब्धे घटे परस्परनाशात् कोपि गन्धः नोपलभ्येत इति भवति। तस्मात् गन्धवत्वम् इति पृथिव्याः यत् लक्षणं तस्य प्रकृते घटे अव्याप्तिः भवति इति प्रश्नः। अतः तत्र पृथिव्याः लक्षणस्य अव्याप्तिवारणार्थं चित्रगन्धं अङ्गीकरोमि इति वक्तुं न शक्यते । यदि चित्ररूपं न अङ्गीक्रियते तर्हि पटस्य

अप्रत्यक्षत्वापत्तिः भवति । यतो हि द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति समवायेन रूपं कारणम् इति अस्ति कार्यकारणभावः । तदुक्तं मुक्तावलीकारैः "[67] रूपमत्रापि कारणम्" इति।

अस्मिन् विशये प्राचीननवीनमतभेदेन अभिप्रायभेदः वर्तते । नवीनाः वदन्ति द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति आत्मावृत्तिशब्दद्भिन्नविशेषगुणवत्वं कारणम् इति । तथा च एकत्र समन्वयं करोमि । घटप्रत्यक्षम् उदाहरणत्वेन स्वीकुर्मः चेत् रूपं भवति तादृशम् । यत्र विषयतासम्बन्धेन द्रव्यप्रत्यक्षं द्रव्ये वर्तते तत्र शब्दभिन्नः आत्मावृत्तिविशेषगुणः नाम रूपं , तत् समवायसम्बन्धेन वर्तते इति समन्वयः । एवञ्च द्रव्यप्रत्यक्षं प्रति रूपस्य समवायेन अपेक्षा वर्तते । परन्तु द्रव्यप्रत्यक्षं प्रति गन्धस्य अपेक्षायाः अनिवार्यता नास्ति । अतः सिद्धान्तिनः चित्रगन्धं न अङ्गीकुर्वन्ति। तर्हि पृथिव्याः लक्षणस्य अव्याप्तिः कथं वार्यते इति चेत् जातिघटितं लक्षणं कृत्वा इति वदन्ति। परन्तु घटे गन्धस्य प्रतीतिः कथं तर्हि इति चेत् अवयवगतः गन्धः तत्र अवयविनि स्वाश्रयसमवेतत्त्वसम्बन्धेन प्रतीयते इति उच्यते। प्रकृते मया वक्तव्यः अंशः नाम यथा चित्ररुपं अतिरिक्तम् अङ्गीकर्तव्यं तथा चित्रगन्धः अतिरिक्तः अङ्गीकर्तव्यः इति नास्ति इति । तस्मात् चित्ररुपम् अतिरिक्तम् अङ्गीकर्तव्यम् इति प्राप्तम्। परन्तु अत्र पूर्वपक्षिणः पुनः आक्षिपन्ति चित्ररूपस्य अङ्गीकारः मास्तु , अवयवगतं रूपम् एव प्रतीयते इति उच्यताम् इति। तदानीं सिद्धान्तिनः वदन्ति , तथा सति पटस्य नीरूपत्वात् समवायेन रूपवतः एव द्रव्यस्य प्रत्यक्षत्वात् पटः अप्रत्यक्षः स्यात् इति । तत्र सिद्धन्तिना उच्यते पूर्वोक्तरीत्या लौकिकविषयता सम्बन्धेन

[67] मुक्तावलि श्लो सं ५६

द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति समवायेन रूपं कारणम् इति कार्यकारणभवं परित्यज्य अन्यं कार्यकारणभावं कथयामः । तथा च लौकिकविषयतासम्बन्धेन द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्त्वसम्बन्धेन रूपं कारणम् इति कार्यकारणभावं कथयामः इति। तदुक्तं दीपिकाकारैः " [68]रूपवत्समवेतत्वं प्रत्यक्षत्वप्रयोजकम्" इति । "[69]न च" इति अस्य एव खण्डनं दीपिकाकारैः तत्रैव कृतम् । खण्डनयुक्तिः तु "[70]गौरवात्" इति । अत्र कारणतावच्छेदकसम्बन्धः गुरुभूतः स्यात् । अर्थात् कारणतावच्छेदकसम्बन्धे शरीरकृतं गौरवम् अस्ति । तस्मात् एतादृशः कार्यकारणभावः न अङ्गीक्रियते । तस्मात् अव्याप्यवृत्तिनीलादिसमुदायः एव चित्ररूपम् इति यः पक्षः सः निराकृतः भवति । तस्मात् चित्ररूपम् अतिरिक्तम् अङ्गीकर्तव्यं इति सिद्धान्तः । परन्तु त्रयः एव स्पर्शाः अङ्गीक्रियन्ते । चित्रस्पर्शः तु अपि न अङ्गीक्रियते । यथा प्राक् चित्रगन्धः न अङ्गीकृतः तद्वत् चित्ररसः अपि न अङ्गीक्रियते । यतो हि रसस्य अपि अव्याप्यवृत्तित्वं न अङ्गीकियते । तदुक्तं मुक्तावलीकारैः " [71]रसादिकमपि ना अव्याप्यवृत्ति, किन्तु नाना जातीयस्पर्शवत् अवयवैः आरब्धे अवयविनि रसाभावेऽपि न क्षतिः । तत्र रसनया अवयवरस एव गृह्यते" तस्मात् एतावता महता विचारेण इदम् अवगम्यते यत् संयोगः एव अव्याप्यवृत्तित्वेन अङ्गीकृतः

[68] तर्कसङ्ग्रहदीपिका पृ सं ४६

[69] तर्कसङ्ग्रहदीपिका पृ सं ४६

[70] तर्कसङ्ग्रहदीपिका पृ सं ४६

[71] मुक्तावली पृ सं ३६२

इति । एवञ्च अद्वैतसिद्धिकारैः पूर्वोक्ताभिः युक्तिभिः नैयायिकैः यः संयोगस्य अव्याप्यवृत्तित्वं अङ्गीकृतं तत् खण्डितम् इति ज्ञायते ।

तृतीयः अध्यायः

अविरोधः

संयोगेन घटवति समवायेन घटो नास्ति इति प्रतीति विमर्शः

अद्वैतसिद्धौ नैयायिकोक्तं अभिप्रायं अङ्गीकृत्य उपपादितवन्तः । नैयायिकैः अत्यन्ताभावस्य भिन्नभिन्नप्रकारेण वैलक्षण्यम् अङ्गीकृतमस्ति । लोकबुध्यनुसारेणैव इत्युक्ते लौकिकानुभवानुरोधेन एव नैयायिकैः अत्यन्ताभावस्य वैलक्षण्यम् अङ्गीकृतम् । परन्तु अयमभिप्रायः अद्वैतसिद्धिकारैः न खण्डितः । सिध्यन्तर्गतवेदान्तप्रमेयस्य निरूपणावसरे नैयायिकोक्तः यथावत् स्वीकृत्य सिद्धिकारैः उपपादितः। तत्र अधुना मया सिद्धिकारैः कस्मिन् प्रसङ्गे अयमंशः आनीतः इति उपपाद्य नैयायिकोक्तः अत्यन्ताभावः कथम् निरूपितः इति च उपपाद्य नैयायिकानां मते अत्यन्ताभावस्य वैलक्षण्यं कथम् उपपादितमिति निरूप्यते । निरूपणावसरे नैयायिकोक्तात्यन्ताभावस्य स्वरूपमपि सविस्तरं प्रदर्श्यते । येन अध्येतृणां कृते अस्मिन् विषये अनायासेन प्रवेशः भवितुमर्हति।

तत्र अद्वैतसिद्धौ [1]"प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्" इति द्वितीयं मिथ्यात्वस्य स्वरूपम् उक्तम्। अस्य अयमर्थः प्रतिपन्नोपाधौ इत्यस्य स्वप्रकारकप्रतीतिविशेष्ये इत्यर्थः। त्रैकालिकनिषेधो नाम अत्यन्ताभावः इत्यर्थः । तथा च प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम् इत्यस्य स्वप्रकारकप्रतीतिविशेष्यनिष्ठात्यन्ताभवप्रतियोगित्वमित्यर्थः । लक्षणे तावत् 'स्वम्'

---

[1] अद्वैतसिद्धिः पृ सं ५३

इत्यनेन मिथ्यात्वेन अभिमतः पदार्थः स्वीक्रियते। इदानीं दृष्टान्ते एकत्र समन्वयं कृत्वा पश्यामः । शुक्तौ इदं रजतम् इति एका प्रतीतिः । अत्र मिथ्यात्वेन अभिमतः पदार्थः रजतम् । स्वप्रकारकप्रतीतिः नाम स्वं प्रकारः यस्यां प्रतीतौ सा। सा च प्रकृते इदं रजतम् इति प्रतीतिः। तस्यां प्रतीतौ यद् विशेषणम् तद् स्वप्रकारकप्रतीतिविशेष्यं भवति। प्रकृते तावत् रजतप्रकारकप्रतीतौ विशेष्यं भवति 'इदं पदार्थः'। तथा च स्वप्रकारकप्रतीतिविशेष्ये रजतप्रकारकप्रतीतिविशेष्ये इदमि वर्तमानः यः अत्यन्ताभावः नाम रजतात्यन्ताभावः। तस्य रजतात्यन्ताभावस्य प्रतियोगी भवति रजतम्, प्रतियोगित्वं रजते इति स्वप्रकारकप्रतीतिविशेष्यत्वं रजते आयातम् इति रजतस्य मिथ्यात्वं सिद्धम्।

एवमेव "घटवत्कपाकम्" इत्यत्रापि स्वप्रकारकप्रतीतिः नाम घटप्रकारकप्रतीतिः। स्वप्रकारकप्रतीतिविशेष्यं भवति भूतलम्। तत्र यः अत्यन्ताभावः नाम घटात्यन्ताभावः । तस्य प्रतियोगी भवति घटः इति घटे स्वप्रकारकप्रतीतिविशेष्यनिष्ठात्यन्ताभावप्रतियोगित्वं सिद्धम् । तस्य मिथ्यात्वमपि सिद्धम् ।

एवं तत्र अग्रे प्रकरणे बहुधा लक्षणपरिष्कारकरणावसरे मध्ये यावत्सदधिकरणकात्यन्ताभावप्रतियोगित्वम् इति लक्षणम् एकत्र सिद्धम् । अस्य अयमर्थः - यावन्ति सदधिकरणाणि तत्र वर्तमानात्यन्ताभावप्रतियोगित्वम् इति । यथा "इदं रजतम्" इत्यत्र प्रकृते यावन्ति सदधिकरणानि इत्यनेन इदं पदार्थः स्वीक्रियते। तत्र सदधिकरणे यः अत्यन्ताभावः नाम रजतात्यन्ताभावः । तस्य प्रतियोगी रजतम् ।

प्रतियोगित्वं रजते इति रजते मिथ्यात्वलक्षणसमन्वयः भवति तेन च तस्य मिथ्यात्वं सिद्धं भवति ।

अत्र लक्षणे नैयायिकैः सिद्धसाधनं प्रदर्श्यते । अनुमानात् प्राक् यदि साध्यं क्वचित् सिद्धं भवति तर्हि सिद्धसाधनम् भवति । क्व तर्हि इदं साध्यम् अनुमानात् प्राक् सिद्धं जिज्ञासा - केवलन्वयि-अत्यन्ताभावे अस्य साध्यस्य सिद्धिः । कथं तत्र साध्यं सिद्धं वर्तते इति पश्यामः। तदादौ पदार्थस्य केवलान्वयित्वं नाम किमिति पश्यामः। केवलान्वयित्वं नाम स्वात्यन्ताभावाप्रतियोगित्वम् । यथा वाच्यत्वम् । वाच्यत्वं तावत् सर्वत्र वर्तते तस्य अत्यन्ताभावः क्वापि न वर्तते । तथा च स्वं भवति वाच्यत्वम् । तस्य अत्यन्ताभावः वक्तुं न शक्यते अतः स्वपदेन घटः स्वीक्रियते, तस्य अत्यन्ताभावः घटात्यन्ताभावः । तस्य प्रतियोगी घटः अप्रतियोगी वाच्यत्वम् । अप्रतियोगित्वं वाच्यत्वे इति वाच्यत्वं केवलान्वयि । प्रकृते तावत् अकाशात्यन्ताभावः केवलान्वयित्वेन स्वीक्रियते । स च आकाशात्यन्ताभावः सर्वत्र वर्तते। तस्य अत्यन्ताभावः क्वापि वर्तते इति वक्तुं न शक्यते । यतः आकाशात्यन्ताभावस्य अभावः नाम आकाशस्वरूपः स च क्वचित् वर्तते इति वक्तुं न शक्यते अतः आकाशात्यन्ताभावः केवलान्वयि। एवम् आकाशात्यन्ताभावस्य केवलान्वयित्वनिरूपणस्य प्रकृतप्रयोजनम् इदानीं निरूप्यते। आकाशात्यन्ताभावः केवलान्वयि इत्यतः तत्र आकाशस्य अत्यन्ताभावः सर्वत्र सदधिकरणेषु वर्तते। तथा यावन्ति सदधिकरणानि तत्र सर्वत्र वर्तमानात्यन्ताभावः नाम आकासात्यन्ताभावः तस्य प्रतियोगी आकाशः इति आकाशे सदधिकरणकात्यन्ताभावप्रतियोगित्वं सिद्धम् । एवं

सदधिकात्यन्ताभावप्रतियोगित्वम् आकाशादिषु अनुमानात् प्रागेव सिद्धम् इति सिद्धसाधनम्।

तद्वारणाय यदधिकरणं यत् सत् तन्निष्ठात्यन्ताभावप्रतियोगित्वम् इति परिष्कारः क्रियते । एवं विवक्षायां तु सिद्धसाधनं न भवति । यतः एवं परिष्कारेण एतादृशः अर्थः सिद्ध्यति । यस्य मित्थ्यात्वं साधनीयम् अस्ति तस्य अधिकरणत्वेन यत् सदधिकरणं प्रसिद्धं तत्र वर्तमानात्यन्ताभावप्रतियोगित्वम् इति । इदं तावत् आकाशादिषु न प्रसिद्धम् । यतः आकाशादीनां किमपि अधिकरणमेव न प्रसिद्धम् । अतः तत्र वर्तमानः अत्यन्ताभावः इति वक्तुमेव न शक्यते । अतः सिद्धसाधनं न भवति इति ।

ननु एवमपि सिद्धसाधनं भवति इति पुनः प्रदर्श्यते नैयायिकैः। पूर्वं तु केवलं केवलान्वयिपदार्थमादाय अत्यन्ताभावप्रतियोगित्वं प्रदर्शितम् । इदानीं तु वृत्तिमत्-पदार्थं सर्वमपि आदाय सिद्धसाधनं प्रदर्शयितुं शक्यते । यतः संयोगसम्बन्धेन यत्र घटः वर्तते तत्र समवायेन घटो नास्ति इति प्रतीतिः वर्तते । अत्र संयोगेन घटस्य अधिकरणं भवति भूतलम् । अतः यदधिकरणं यत् सत् इत्यनेन भूतलं स्वीक्रियते । तत्र भूतले वर्तमानः अत्यन्ताभावः इत्यनेन समवायेन घटाभावः स्वीक्रियते । घटस्य समवायेन तत्र असत्वात् । तस्य घटाभावस्य प्रतियोगी भवति घटः । एवं वृत्तिमन्तः ये ये पदार्थाः तेषां सर्वेषामपि एवम् अत्यन्ताभावप्रतियोगित्वं प्रदर्शयितुं शक्यते। अतः सर्वत्र वृत्तिमत्पदार्थेषु इदं साध्यं सिद्धमेव इति पुनः सिद्धसाधनम्।

अतः तद्वारणाय येन सम्बन्धेन यद् यस्य अधिकरणं तेन सम्बन्धेन तन्निष्ठात्यन्ताभावप्रतियोगित्वम् इति परिष्कारः क्रियते। तेन च यद्यपि संयोगेन घटवति भूतले समवायसम्बन्धावच्छिन्नात्यन्ताभावप्रतियोगित्वं घटे अस्ति परन्तु संयोगसम्बन्धेन घटस्य यद् अधिकरणं भूतलं तत्रैव संयोगेन घटस्य अत्यन्ताभावः अत्र विवक्षितः इत्यतः इदं तावत् क्वापि अनुमानात् प्राक् न सिद्धम् आः न सिद्धसाधनम् इति।

ननु तथापि अव्याप्यवृत्तिस्-संयोगादिकमादाय समानसम्बन्धेन एकस्मिन्नधिकरणे एव अत्यन्ताभावः प्रदर्शयितुं शक्यते इत्यतः पुनः सिद्धसाधनं तदवस्थम् इति।

अतः इदानीं अत्र दोषपरिहाराय येन रूपेण यदधिकरणतया यत् प्रतिपन्नं तेन रूपेण तन्निष्ठात्त्यन्ताभावप्रतित्वम् इति परिष्कारः क्रियते। एवं कृते तु सर्वे दोषाः वारिताः भवन्ति। अत्र रूपम् इत्यनेन द्वयं विवक्षितम्। सम्बन्धः धर्मः चेति। तथा च येन सम्बन्धेन येन धर्मेण इति अर्थः सिध्यति। तेन च येन सम्बन्धेन येन धर्मेण यद् यस्य अधिकरणं तत्र तेन सम्बन्धेन तेन धर्मेण अत्यन्ताभावप्रतियोगित्वम् इति अर्थः पर्यवस्यति। एवं अर्थे उक्ते क्वापि दोषः न भवति। यतः अव्यप्यवृत्तिपदार्थस्य एकस्मिन्नधिकरणे वर्तमानत्वम् अवर्तमानत्वं च सम्बन्धमादाय एव वक्तुं शक्यते न धर्ममादय । यथा वृक्षः कपिसंयोगी इत्यत्र संयोगसम्बन्धेन कपिः यत्र वर्तते तत्रैव वृक्षे संयोगेन कपिः नास्ति इति तस्य अत्यन्ताभावः अपि वक्तुं शक्यते परन्तु अग्रावच्छेदेन वृक्षे कपिः वर्तते तदा एव अग्रावच्छेदेन तत्र अभावः वर्तते तस्य इति न सिद्धान्तः अपि तु मूलावच्छेन न वर्तते इति। अतः येन सम्बन्धेन येन धर्मेण यद् यस्य अधिकरणं तत्र तेन सम्बन्धेन तेन धर्मेण

अत्यन्ताभावप्रतियोगित्वम् अनुमानात् प्राक् नैव सिद्धम् इत्यतः सिद्धसाधनमिति दोषो न भवति। एवं तत्र अद्वैतसिद्धौ विचारः यः कृतः तत्र नैयायिकैः निरूप्यमाणस्य अत्यन्ताभावस्वरूपस्य स्वीकारः अत्यन्तम् आवश्यकः। यद्यपि नैयायिकैः उच्यमानरीत्या नित्यत्वं न वदेयुः परन्तु अन्यद् यद् स्वरूपं नैयायिकैः स्वीक्रियते तत्तु अङ्गीक्रियते एव। तर्हि कीदृशं स्वरूपम् अत्यन्ताभावस्य नैयायिकैः स्वीकृतः वर्तते इति विचारः ज्ञायते चेत् अयं विचारः सुस्पष्टम् अवगन्तुं शक्यः। अतः तदिदानीं नैयाकोक्तात्यन्ताभावस्य लक्षणस्वरूपादिकं निरूप्यते।

तत्र च नैयायिकैः अत्यन्ताभावस्य लक्षणम् एवं कृतम्-"त्रैकालिकत्वे सति संसर्गावच्छिन्नप्रतियोगिकाभावत्वम्" इति। अस्य अयमर्थः- यः अभावः त्रैकालिकः नाम नित्यः एवमेव संसर्गावच्छिन्नाप्रतियोगितानिरूपकः सः भवति अत्यन्ताभावः। यथा भूतले घटाभावः। अयं च घटाभावः नित्यः वर्तते एवमेव संयोगसम्बन्धावच्छिन्नप्रतियोगिताकः अपि वर्तते अतः अयमभावः अत्यन्ताभावः भवति। अत्र किञ्चित् दलकृत्यं पश्यामः। यदि लक्षणे त्रैकालिकत्वम् इति दलं न स्यात् तर्हि संसर्गावच्छिन्नप्रतियोगिताकत्वम् इति केवलं लक्षणं स्यात्। तथा सति ध्वंसे अतिव्याप्तिः स्यात्। यतः भूतले घटो ध्वस्तः इत्यत्र यः घटध्वंसः प्रतीयते सः संसर्गावच्छिन्नप्रतियोगिताकः एव वर्तते। अतः तत्र अतिव्याप्तिः। अतः तद्वरणाय त्रैकालिकत्वमिति दलं निवेश्यते। तेन च यद्यपि घटध्वंसे संसर्गावच्छिन्नप्रतियोगिताकत्वं वर्तते परन्तु त्रैकालिकत्वं न वर्तेते इत्यतः तत्र अतिव्याप्तिः न भवति। इदानीं यदि लक्षणे संसर्गावच्छिन्नप्रतियोगिताकाभावत्वं परित्यजामः तर्हि

त्रैकालिकत्वम् इति केवलं लक्षणं स्यात्। यद्येवं लक्षणं स्यात् तर्हि अन्योन्याभावे अतिव्याप्तिः स्यात्। अन्योन्याभावस्यापि त्रैकालिकत्वात्। अतः तद्वारणाय संसर्गावच्छिन्नप्रतियोगिताकत्वम् इति क्रियते। तथा च यद्यपि अन्योन्याभावे त्रैकालिकत्वं वर्तते परन्तु संसर्गावच्छिन्नप्रतियोगिकत्वं न वर्तते इत्यतः न अतिव्याप्तिः। ननु अन्योन्याभावे अपि तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकत्वं वर्तते खलु इति चेत्- सत्यम्। परन्तु अत्र संसर्गावच्छिन्नप्रतियोगिताकत्वं यद् विवक्षितं तद् तादात्म्यभिन्नसंसर्गावच्छिन्नत्वमेवेति न दोषः।

एवं तत्र अत्यन्ताभावस्य लक्षणं निरूप्य इतः परं तत्रैव किञ्चित् अत्यन्ताभावस्य एकत्व-नानात्वविचारः यः कृतः सः विचार्यते। यतः एनमेव विषयमाधारीकृत्य पूर्वोक्ते सिद्धिभागे दोषाः उद्भाविताः। ननु योऽयमत्यन्ताभावः सः एको वा नाना वा इति जिज्ञासायां तत्र तर्कसंग्रहदीपिकाग्रन्थे श्रूयते "प्रतियोगितावच्छेदक-आरोप्य-संसर्गभेदात् एकप्रतियोगिकयोः अत्यन्ताभावान्योन्याभावयोः बहुत्वम्"[2] इति। अनेन अवगम्यते नैयायिकानां मते अत्यन्ताभावः नाना इति। अस्याः दीपिकापङ्क्तेः अयमर्थः- प्रतियोगितावच्छेदकभेदात्, आरोप्यभेदात्, संसर्गभेदात् च अत्यन्ताभावः भिद्यते। एवं भिद्यमानत्वादेव सः नाना इति। अत्र च प्रतियोगितावच्छेदकत्वेन प्रतियोगिनिष्ठः धर्मः विवक्षितः। तत्कृतश्च भेदः। एवमेव आरोप्यपदेन इह प्रतियोगी विवक्षितः। तत्कृतः च भेदः। एवं संबन्धकृतः भेदः तु स्पष्टः।

---

[2] तर्कसंग्रहदीपिका पृ.सं-१७२।

इदानीं प्रत्येकं सविस्तरं पश्यामः। प्रथमः वर्तते प्रतियोगितावच्छेदकधर्मकृतभेदः। तत्रायं दृष्टान्तः भूतले घटो नास्ति, नीलघटो नास्ति इति प्रतीतिद्वयम्। अत्र प्रथमे यः घटात्यन्ताभावः प्रतीयते तत्र अभावीयप्रतियोगितायाः अवच्छेदकम् भवति घटत्वम्। तेन च सः अभावः घटत्ववच्छिन्नप्रतियोगिताकः। द्वितीये तावत् प्रतीयमानः नीलघटात्यन्ताभावः। अत्र च अभावीयप्रतियोगितायाः अवच्छेदकम् भवति नीलघटत्वम्। तथा च अयम् अभावः नीलघटत्वावच्छिन्नप्रतियोगिताकः। अत्र इदानीं यदि प्रतियोगितावच्छेदकभेदेन अत्यन्ताभावस्य भेदः नाङ्गीक्रियते तर्हि घटावच्छिन्नप्रतियोगिताकः नीलघटत्वावच्छिन्नप्रतियोगिताकेन अभावेन न भिद्येत तेन च यत्र भूतले बहवो घटाः वर्तन्ते नीलः घटः न वर्तते तत्र नीलघटो नास्ति इति कथिते सर्वेषाम् अपि घटानाम् अभावः उक्तः स्यात्। इदं च अनुपपन्नम् अतः प्रतियोगितावच्छेदकधर्मभेदेन अत्यन्ताभावः भिद्यते।

द्वितीयः वर्तते आरोप्यकृतः भेदः। पूर्वोक्तरीत्य अत्र आरोप्यः नाम प्रतियोगी। प्रतियोगिकृतः भेदः। यथा भूतले घटः नास्ति, भूतले पटः नास्ति। अत्र प्रथमे घटात्यन्ताभावः एवं द्वितीये पटात्यन्ताभावः प्रतीयते। प्रथमे प्रतियोगी वर्तते घटः द्वितीये पटः। अत्र यदि प्रतियोगिकृतः भेदः अभावे नाङ्गीक्रियेत तर्हि पटप्रतियोगिताकः अभावः घटप्रतियोगिताकेन अभावेन न भिद्यते इत्यतः पटवति प्रदेशे घटो नास्ति इति कथिते पटाभावः अपि तत्र प्रसज्येत। अतः आरोप्यभेदेन नाम प्रतियोगिभेदेन अत्यन्ताभावः भिद्यते।

तृतीयः अन्तिमः च वर्तते सम्बन्धकृतः भेदः। यथा भूतले संयोगेन घटो नास्ति। भूतले समवायेन घटो नास्ति। अत्र प्रथमे प्रतियोगितावच्छेदकः सम्बन्धः संयोगः द्वितीये च प्रतियोगितावच्छेदकः सम्बन्धः समवायः। अत्र यदि सम्बन्धभेदेन अत्यन्ताभावे भेदः यदि नाङ्गीक्रियते तर्हि संयोगसम्बन्धावच्छिन्नप्रतियोगिताकः समवायसम्बन्धावच्छिन्नप्रतियोगिताकः च अत्यन्ताभावः समानः एव स्यात् तेन च संयोगेन घटवति प्रदेशे समवायेन घटो नास्ति इति कृत्वा घटो नास्ति इति प्रतीतिः स्यात्।

अतः एवं प्रतियोगितावच्छेदकधर्मभेदेन, प्रतियोगिभेदेन, प्रतियोगितावच्छेदकसंबन्धभेदेन च अत्यन्ताभावः प्रतीयमानः नाना भवति।

अत्रोक्तमेव सम्बन्धकृतं भेदमादाय तत्र सिद्धौ लक्षणे आक्षेपः प्रदर्शितः आसीत्। एवं च नैयायिकानां यः अभिप्रायः तमङ्गीकृत्यैव अत्र निरूपणं कृतं वर्तते।

पक्षताविमर्शः

सिद्धिकारैः सिषाधयिशाविरहविशिष्टसाधाकमानाभावरूपत्वं पक्षतायाः उक्तम् । अद्वैतसिद्धिकारैः कस्मिन् प्रसङ्गे अयं विचारः आनीतः इति अग्रे विस्तरेण उपपादयामि । आदौ नैयायिकानां पक्षं पश्यामः । मणिकाराः इदं निराकृतवन्तः । पक्षे वर्तमानः धर्मः पक्षता इति कथ्यते । पक्षतायाः स्वरुपविषये सन्ति बह्व्यः विप्रतिपत्तयः । मणिकाराः साध्यसंदेहवादिनां पक्षं निराकर्तुं वदन्ति "[3] तत्र न सन्दिग्धसाध्यधर्मत्वं पक्षत्वम्" इति । पूर्वपक्षिणाम् आशये गधाधरभट्टाचार्यैः त्रिधा व्युत्पत्तिः प्रदर्शिता । इदं त्रितयमपि तैः निराकृतमिति अन्यः विषयः । अधुना तैः उपस्थापितं व्युत्पत्तित्रयं पश्यामः । अत्र आदौ भट्टाचार्याः लिखन्ति " [4]सन्दिग्धेत्यादिग्रन्थस्य सन्दिग्धः साध्यरूपो धर्मो यत्रेति व्युत्पत्त्या विषयतया साध्यीभूतधर्मसन्देहवत्वं तादृशसन्देहपयवसितं पक्षवमित्युतौ तत्र साध्ये धर्मत्वनिवेशनमफलम् इति" अत्र भाट्टाचार्यैः बहुव्रीहिसमासमाश्रित्य विग्रहवाक्यं दर्शितम् । सम् उपसर्गपूर्वक दिह् धातोः सन्देहः अर्थः। क्तप्रत्ययस्य प्रकारताश्रयः अर्थः । साध्यश्च असौ धर्मश्च साध्यधर्मः । तथा च साध्याभिन्नो धर्मः इति सिध्यति । यत्र इत्यत्र यत् शब्दस्य पक्षः अर्थः । सप्तम्याः विशेष्यत्वम् अर्थः । विशेष्यतायाः निरूपकत्वसम्बन्धेन सन्देहे अन्वयः । सन्देहस्य निरूपितत्त्वसम्बन्धेन क्तप्रत्ययार्थैकदेशे प्रकारतायाम् अन्वयः । एवञ्च

[3] पक्षता पृ सं २

[4] पक्षता पृ सं २

यन्निष्ठविशेष्यातानिरूपकसन्देहनिरूपितप्रकारताश्रयाभिन्नः साध्याभिन्नः धर्मः इति विग्रहवाक्यात् प्राप्तः बोधः । विग्रहवाक्यात् यादृशः शाब्दबोधः भवति वृत्तिवाक्यात् तस्य विपरीतः शाब्दबोधः भवति । तस्मात् साध्यनिष्ठप्रकारतानिरूपकसंशयनिरूपितविश्ष्यताश्रयत्वम् अथवा साध्यप्रकारकसंशयविशेष्यत्वम् पक्षत्वम् इति वा शाब्दबोधः भवति । एवं यदि विग्रहवाक्येन शाब्दबोधः कथ्यते तर्हि धर्मत्वपदं व्यर्थं स्यात् । अतः धर्मता पदस्य सार्थक्य संपादनार्थं प्रकारान्तरेण विग्रहः भट्टाचार्यैः प्रदर्श्यते । तथा च [5]धर्मपदसार्थक्याय स्वस्मिन् सन्दिग्धं साध्यधर्मत्वं बहुव्रीहिबलात् साध्यनिरूपितधर्मत्वपर्यवसितं पक्षत्वमित्युक्तौ साध्ये सन्दिग्धं धर्मत्वं यस्य तत्वं पक्षत्वमित्युक्तौ च साध्यनिरूपितधर्मित्वस्य पक्षधर्मत्वस्य वा यत्र अप्रसिद्धिः तत्र वक्ष्यमाणानुपपत्तिप्रयोजकं तत् । अत्र ग्रन्थकारैः पक्षतालक्षणस्य व्युत्पत्तिद्वयं लभ्यते । प्रथमं तावत् सन्दिग्धं साध्यधर्मत्वं यस्य इति । साध्यं धर्मः यस्य इति प्रथमतः बहुव्रीहिः कर्तव्यः । तस्य भावः साध्यधर्मत्वम् । अत्र यत्र इत्यस्य यन्निष्ठकारणता इति अर्थः । धर्मपदस्य आधेयतावान् इति अर्थः ।

अत्र मणिकाराः बहुविधपक्षता लक्षणानि निराकृतवन्तः । तानि अधुना चिन्त्यन्ते।

---

[5] पक्षता पृ स २

“[6] तत्र न तावत्सन्दिग्धसाध्यधर्मत्वं पक्षत्वम्। सन्देहो हि न विशेषणम्। परामर्शपूर्वं लिङ्गदर्शनव्याप्तिस्मरणादिना तस्य नाशात् । नाप्युपलक्षणम् । अव्यावर्तकत्वापत्तेः”

अस्य ग्रन्थभागस्य अयमाशयः – सन्देहरूपपक्षतायाः कारणतावच्छेदकघटकतया कारणत्वं नास्ति। परन्तु स्वातन्त्र्येण कारणत्वम् इति एकं मतं वर्तते । एवमेव तत्र पक्षधर्मनिष्ठायां जनकतायां तादृशपक्षतायाः विशेषणत्वेन रूपेण अवच्छेदकत्वं वा उत उपलक्षणतया अवच्छेदकत्वं वा इति विकल्पः । अत्र न विशेषणतया पक्षतायाः पक्षधर्मनिष्ठायां जनकतायाम् अवच्छेदकत्वम् । अधुना पक्षतायाः स्वातन्त्र्येण कारणत्वमतं निराक्रियते । आदौ साध्यसन्देहः ततः लिङ्गदर्शनं ततः व्याप्तिस्मरणं ततः परामर्शः ततः अनुमितिः इति क्रमः अस्ति इति कल्पयामः। यस्य कारणत्वं वक्तव्यं तस्य अनुमितिप्राक्काले वृत्तित्वं वक्तव्यम्। परन्तु अयथार्थज्ञानस्वरूपस्य सन्देहस्य द्विक्षणावस्थायित्वम् एव लभ्यते । तस्मात् सन्देहः लिङ्गदर्शनात् परं नश्यति । अर्थात् व्याप्तिस्मरणकाले नश्यति । एवमेव आदौ साध्यसन्देहः ततः व्याप्तिस्मरणं ततः लिङ्गदर्शनं ततः परामर्शः ततः अनुमितिः इति । अत्र क्रमे अपि सन्देहस्य व्याप्तिस्मरणानन्तरं लिङ्गदर्शनकाले नाशः भवति । विशेषणविधया कारणत्वं नाम [7]अपेक्षणीयानुमित्यव्यहितप्राक्सत्ताकम् अनुमितिकारणं विशेषणविधया अवच्छेदकत्वं वा इति यावत् इति भट्टाचार्याः कथयन्ति । तस्मात् उभयस्थले अपि

[6]पक्षता पृ स २, १०

[7] पक्षता पृ सं ११

साध्यसन्देहरूपपक्षतायाः अनुमितिप्राक्काले वृत्तित्वं नास्ति इत्यतः पक्षतायाः स्वातन्त्र्येण वा विशेषणविधया वा कारणत्वं नास्ति इति अर्थः । उपलक्षणविधया कारणत्वं नाम [8]अनुमित्यव्यवहितप्राक्काले अविद्यमानं सत् पक्षधर्मतानिष्ठानुमितिकारणतावच्छेदकम् इत्यर्थः । उपलक्षणविधया यदि कारणत्वम् उच्यते तर्हि केवलसिद्धिकालेऽपि अनिमित्यापत्तिः स्यात् । सिद्धिकाले अनुमितेः वारणार्थं पक्षतायाः कारणत्वं स्वीकृतम् । परन्तु उपलक्षणविधया यदि कारणत्वं स्वीक्रियते तर्हि कालान्तरे वर्तमाना या पक्षता तदुपलक्षितत्त्वस्य सिद्धिलीनपरामर्शस्य अपि वर्तते इत्यतः सिद्धिकालेऽपि अनुमित्यापत्तिः स्यात् इति भावः । तस्मात् मणिकारैः साध्यसन्देहस्य पक्षतात्वं न अङ्गीकृतम्। [9]सन्दिग्धसाध्यवत्वं पक्षस्य लक्षणम् । सन्दिग्धश्च तत् साध्यश्च सन्दिग्धसाध्यम् । सन्दिग्धसाध्यम् अस्ति अस्मिन् इति सन्दिग्धसाध्यवान् , तत्वं सन्दिग्धसाध्यवत्वम् । सन्दिग्धत्वं नाम सन्देहविषयत्वम् इति अर्थः । साध्यसन्देहो नाम पर्वतः वह्निमान् धूमात् इत्यत्र पर्वतः वह्निमान् न वा इत्याकारकः । एतादृश सन्देहविषयत्वं वन्हौ अस्ति । तस्मात् वन्हिः सन्दिग्धं साध्यम् इत्यर्थः । एतादृशं साध्यं यत्र अस्ति सः पक्षः इति उच्यते । एवञ्च पर्वतः पक्षः । पक्षे वर्तमानः धर्मः पक्षता। पर्वते साध्यस्य सन्देहः वर्तते इत्यतः सा पक्षता पर्वतः वह्निमान् न वा इत्याकारिका । एवञ्च साध्यसन्देहः पक्षता इति यत् प्राप्तम् इदं प्राचीननैयायिकमतानुसारेण । पक्षता

---

[8] भावबोधिनी ४५

[9] तर्कसङ्ग्रहः पृ सं १०३

अनुमितिं प्रति कारणम् । पक्षतायाः सत्वे अनुमितिः उदेति, तदभावे तदभावः इति अस्ति नियमः। द्वयोः कार्यकारणभावः वक्तव्यः चेत् तयोः मध्ये अन्वयव्यतिरेकसहचारग्रहौ अपेक्षितौ । अन्वय सहचारो नाम तत् सत्वे तत् सत्वम् अर्थात् कारणसत्वे कार्यसत्वम् ।उदाहरणार्थं दण्डस्य सत्वे घटस्य सत्वम् । व्यतिरेकसहचारो नाम तदभावे तदभावः इति । अर्थात् कारणाभावे कार्याभावः। उदाहरणर्थं तन्तोः अभावे पटभावः । अन्वयसहचारं प्रति अन्वयव्यभिचारः प्रतिबन्धकः, व्यतिरेकसहचारं प्रति व्यतिरेकव्यभिचारः प्रतिबन्धकः । अनयोः उदाहरणम् अस्मभिः मङ्गलवादे द्रष्टुं शक्यते ।

तत्र मङ्गलसमाप्त्योः कार्यकारणभावः अस्ति इति प्राचीननैयायिकैः उच्यते । किन्तु पूर्वपक्षिभिः तत्र व्यभिचारः प्रदर्श्यते । बाणभट्टमहोदयेन कादम्बरी ग्रन्थः लिखितः । तत्र ग्रन्थादौ तेन मङ्गलं कृतम् । परन्तु बाणबट्टमहोदयेन ग्रन्थसमाप्तिः न कृता । परन्तु तस्य पुत्रेण ग्रन्थसमाप्तिः कृता । अतः कादम्बरी ग्रन्थे मङ्गलस्य सत्वे अपि समाप्तिः न जाता इत्येव उच्यते । यदि मङ्गलस्य कार्यं समाप्तिः स्यात् तर्हि येन मङ्गलं कृतं तेन एव समाप्तिः कर्तव्या । परन्तु मङ्गलकर्त्रा बाणभट्टेन समाप्तिः न साधिता । अतः कारणस्य सत्वे अपि कार्यं न उत्पन्नम् इत्यतः अन्वयव्यभिचारः । अस्मिन् एव अवसरे व्यतिरेकव्यभिचारः अपि दर्शितः । किरणावली इति नास्तिकग्रन्थः यः उदयनः इति आचार्येण लिखितः । तत्र मङ्गलं नास्ति तथापि समाप्तिः जाता । यदि मङ्गलं समाप्तेः कारणं स्यात् , तर्हि मङ्गलसत्वे एव समाप्तिः स्यात् । परन्तु मङ्गलस्य अभावेऽपि

समाप्तिः जाता । एवञ्च कारणस्य अभावेऽपि कार्यम् उत्पन्नम् इति व्यतिरेकव्यभिचारः दर्शितः । एवञ्च अन्वयसहचारं प्रति अन्वयव्यभिचारः प्रतिबन्धकः । व्यतिरेकसहचारं प्रति व्यतिरेकव्यभिचारः प्रतिबन्धकः इति वर्तते प्रतिबध्यप्रतिबन्धकभावः।

प्रकृते पक्षतायाः अनुमितेः च यः कार्यकारणभावः उक्तः तत्र व्यभिचारः अस्ति । यदि साध्यसन्देहः पक्षता तर्हि व्यतिरेकव्यभिचारः । कुतः इति चेत् [10]श्रूयतां कश्चन गृहस्य मध्ये उपविष्टः वर्तते । तेन घनघर्जनं श्रुतम् इति मन्यताम् । तदानीं सः गगनं मेघवत् इति अनुमितिं प्राप्नोति। किन्तु अनुमितेः उत्पत्तेः प्राक् तस्य कृते साध्यविषयकः सन्देहः न आसीत् । अतः साध्यसन्देहरूपपक्षतायाः अभावेऽपि अनुमितिः उत्पन्ना इत्यतः कारणाभावेऽपि कार्योत्पत्तिरूपव्यतिरेकव्यभिचारः । तस्मात् अनुमितिपक्षतयोः कथं कार्यकारणभावः इति आक्षेपः भवति । तस्मात् सिध्यभावः पक्षाता इति वक्तव्यम् । सिद्देः अभवः सिध्यभावः । साध्यस्य निश्चयाभावः इत्यर्थः । सिध्यभावः पक्षाता इति यदि उच्यते तर्हि व्यतिरेकव्यभिचारः नास्ति । यतो हि गृहस्य मध्ये यः पुरुषः अस्ति तस्य कृते अनुमितेः उत्पत्तेः प्राक् तावत् गगने मेघस्य निश्चयः न आसीत् । तस्मात् अनुमितेः उत्पत्तेः प्राक् सिध्यभावरूपपक्षतायाः सत्वात् एव अनुमितिः उत्पन्ना । अतः कारणस्य सत्वात् एव कार्यम् उत्पन्नं तस्मात् व्यतिरेकव्यभिचारः नास्ति । एवञ्च सिध्यभावः पक्षता इति प्राप्तम् । परन्तु एवं लक्षणं

[10] न्यायबोधिन्याः अनुमानखण्डे अयं विचारः अस्ति ।

कृतं चेदपि व्यतिरेकव्यभिचारः तदवस्थः । कुतः इति चत् नैयायिकानां विषये एवं काचित् उक्तिः अस्ति “ [11]प्रत्यक्षपरिकलितम् अपि अर्थम् अनुमानेन बुभुत्सन्ते तर्करसिकाः” इति । तार्किकाणाम् अयं स्वभावः यत्किञ्चित् प्रत्यक्षेण दृष्टं चेदपि तत् वस्तु अनुमानेन एव ज्ञातुम् इच्छन्ति । उदाहरणार्थं कश्चन नैयायिकः पर्वते प्रत्यक्षेण वन्हिं दृष्टवान् चेदपि पुनः अनुमानेन एव वन्हिं ज्ञातुम् इच्छति। अस्मिन् स्थले पक्षता अनुमित्योः व्यभिचारः इत्यर्थः । लक्षणदृष्ट्या तावत् अव्याप्तिः इति वक्तव्यम् । लक्ष्यस्य एकदेशे लक्षणस्य असत्वम् अव्याप्तिः । प्रकृते यत्र पर्वते साध्यं सिद्धं तत्र सिध्यभावरुपपक्षता नास्ति इति कृत्वा लक्षणसङ्गमनाभावात् अव्याप्तिः इत्यर्थः । अतः पक्षतायाः लक्षणं परिष्करणीयम् । सिषाधयिषाविरहविशष्टसिद्ध्यभावः पक्षता ।अत्र सिषाधयिषाविरहः इति विशेषणम् । सिद्धिः इति विशेष्यम् । सिषाधयिषाविरहविशिष्टा सिद्धिः प्रतबन्धिका । तदभावः कार्योत्पत्तिं प्रति कारणम्। अर्थात् विशिष्टाभावः कारणम् इत्यर्थः । विशिष्टाभावः त्रिधा संपादयितुं शक्यते।

<u>विशेषणाभावप्रयुक्तविशिष्टाभावः।</u>

यत्र विशेषणं नास्ति विशेष्यम् अस्ति तत्र विशेषणाभावप्रयुक्तविशिष्टाभावः अस्ति इत्यर्थः । लौकिकम् उदाहरणम् - दण्डी नास्ति इत्यत्र दण्डः विशेषणम्। देवदत्तः विशेष्यः ।

---

[11] वाचस्पतिमिश्राणाम् इदं वचनम् इति श्रूयते

यदा दण्डः नास्ति देवदत्तः वर्तते तदनीं दण्डी नास्ति इत्येव प्रयोगः । यतोहि तत्र विशेषणाभावप्रयुक्तविशिष्टाभावः अस्ति।

शास्त्रीयम् उदाहरणम् - दाहं प्रति वह्निः कारणम्,चन्द्रकान्तमणिः प्रतिबन्धकः। वह्निना दहोत्पत्ति काले यदा चन्द्रकान्तमणिः वह्नेः समीपे आनीयते, तदानीं प्रतिबन्धकस्य सत्वात् दाहो न भवति । यदा तु चन्द्रकान्तमणिसत्वदशायां सूर्यकान्तमणिःआनीयते तदानीं वह्निना दाहो जायते।यतोहि सूर्यकान्तमणिः तत्र उत्तेजकः इति कथ्यते।उत्तेजकत्वं नाम प्रतिबन्धककालीनकार्योत्पादकत्वम् । तर्हि दाहं प्रति प्रतिबन्धकं किम् इति चेत् सूर्यकान्तमण्यभावविशिष्टः चन्द्रकान्तमणः इति वक्तव्यम् । अत्र सूर्यकान्तमण्यभावः विशेषणं , चन्द्रकान्तमणिः विशेष्यः । यदा सूर्यकान्तमणिः भवति ,चन्द्रकान्तमणिः अपि भवति तदा विशेषणाभावप्रयुक्तविशिष्टाभावः अर्थात् प्रतिबन्धकाभावस्य सत्वात् दाहरूपं कार्यम् उत्पद्यते ।

प्रकृते अनुमाने समन्वयः - सिषाधयिषाविरहविशष्टसिध्यभावः पक्षता । अत्र सिषाधयिषाविरहः इति विशेषणम् । सिद्धिः इति विशेष्यम् । सिषाधयिषाविरहविशिष्टा सिद्धिः प्रतिबन्धिका । तदभावः कार्योत्पत्तिं प्रति कारणम् । अर्थात् विशिष्टाभावः कारणम् इत्यर्थः । पर्वते प्रत्यक्षेण वन्हिं दृष्टवान् चेदपि पुनः अनुमानेन एव वन्हिं ज्ञातुम् इच्छति । अस्मिन् स्थले सिद्धेः सत्वेऽपि अनुत्सया अर्थात् पर्वते वह्निम् अनुमिनुयाम् इति इच्छया प्रवर्तते । अत्र सिषाधयिषा अस्ति सिषाधयिषा विरहः नास्ति । परन्तु सिद्धिः

अस्ति । तर्हि अत्र विशेषणाभावप्रयुक्तविशिष्टाभावः अस्ति , तस्मात् पक्षतारूपकारणस्य सत्वात् अनुमितिः उत्पन्ना इति लभ्यते ।

२.विशेष्याभावप्रयुक्तविशिष्टाभावः

लौकिकम् उदाहरणम् – दण्डी देवदत्तः नास्ति इत्यत्र यदा गृहे दण्डः भवति । परन्तु देवदत्तः न भवति तदा विशेष्यं न भवति परन्तु विशेषणं भवति । तदानीं दण्डी देवदत्तः नास्ति इति प्रयोगः भवितुम् अर्हति । यतोहि अत्र विशेष्याभावप्रयुक्तविशिष्टाभावः अस्ति ।

शास्त्रीयम् उदाहरणम् - दाहं प्रति वह्निः कारणम्, चन्द्रकान्तमणिः प्रतिबन्धकः । वह्निना दहोत्पत्ति काले यदा चन्द्रकान्तमणिः वह्नेः समीपे आनीयते, तदानीं प्रतिबन्धकस्य सत्वात् दाहो न भवति । यदा तु चन्द्रकान्तमणिसत्वदशायां सूर्यकान्तमणिः आनीयते तदानीं वह्निना दाहो जायते । यतोहि सूर्यकान्तमणिः तत्र उत्तेजकः इति कथ्यते।उत्तेजकत्वं नाम प्रतिबन्धककालीनकार्योत्पादकत्वम् । तर्हि दाहं प्रति प्रतिबन्धकं किम् इति चेत् सूर्यकान्तमण्यभावविशिष्टः चन्द्रकान्तमणिः इति वक्तव्यम् । अत्र सूर्यकान्तमण्यभावः विशेषणं , चन्द्रकान्तमणिः विषेष्यः । यदा तु सूर्यकान्तमणिः न भवति, परन्तु चन्द्रकान्तमणिः भवति तदा अपि दाहः भवति । यतो हि अत्र विशेष्याभावप्रयुक्तविशिष्टाभावः अस्ति ।

प्रकृते अनुमाने समन्वयः - सिषाधयिषाविरहविशष्टसिद्ध्यभावः पक्षता । अत्र सिषाधयिषाविरहः इति विशेषणम्। सिद्धिः इति विशेष्यम् । सिषाधयिषाविरहविशिष्टा सिद्धिः प्रतिबन्धिका । तदभावः कार्योत्पत्तिं प्रति कारणम् । अर्थात् विशिष्टाभावः कारणम् इत्यर्थः । यदा तु पर्वते वह्निम् अनुमिनोमि इति इच्छा न भवति, परन्तु पर्वते वन्हेः सिद्धिः भवति । अस्यां दशायाम् अनुमितिः उदेति । यतो हि अत्र सिषाधयिषाविरहविशष्टसिद्ध्यभावरूपं

कारणम् अस्ति । अतः कार्यम् उत्पन्नम् ।

उभयाभावप्रयुक्तविशिष्टाभावः

लौकिकम् उदाहरणम् - दण्डी नास्ति इत्यत्र दण्डः विशेषणम् । देवदत्तः विशेष्यः । यदा तु गृहे देवदत्तः अपि न भवति दण्डः अपि न भवति । तदानीं दण्डी नास्ति इति प्रयोगः भवाति । यतो हि अत्र उभयाभावप्रयुक्तविशिष्टाभावः अस्ति।

शास्त्रीयम् उदाहरणम् - दाहं प्रति वह्निः कारणम्, चन्द्रकान्तमणिः प्रतिबन्धकः । वह्निना दहोत्पत्ति काले यदा चन्द्रकान्तमणिः वह्नेः समीपे आनीयते, तदानीं प्रतिबन्धकस्य सत्वात् दाहो न भवति । यदा तु चन्द्रकान्तमणिसत्वदशायां सूर्यकान्तमणिः आनीयते । तदानीं वह्निना दाहो जायते । यतो हि सूर्यकान्तमणिः तत्र उत्तेजकः इति कथ्यते । उत्तेजकत्वं नाम प्रतिबन्धककालीनकार्योत्पादकत्वम्[12] । तर्हि दाहं प्रति प्रतिबन्धकं किम् इति चेत्

---

[12] तर्कसङ्ग्रहदीपिका पृ सं ८९

सूर्यकान्तमण्यभावविशिष्टः चन्द्रकान्तमणिः इति वक्तव्यम् । अत्र सूर्यकान्तमण्यभावः विशेषणं , चन्द्रकान्तमणिः विषेष्यः । यदा तु सूर्यकान्तमणिः भवति , चन्द्रकान्तमणिः न भवति तदानीं दाहः भवति । यतो हि अत्र उभयाभावप्रयुक्तविशिष्टाभावः अस्ति ।

प्रकृते अनुमाने समन्वयः - सिषाधयिषाविरहविशष्टसिद्ध्यभावः पक्षता । अत्र सिषाधयिषाविरहः इति विशेषणम् । सिद्धिः इति विशेष्यम् । सिषाधयिषाविरहविशिष्टा सिद्धिः प्रतिबन्धिका । तदभावः कार्योत्पत्तिं प्रति कारणम् । अर्थात् विशिष्टाभावः कारणम् इत्यर्थः । यदा पर्वते वह्निम् अनुमिनोमि इति इच्छा भवति । अर्थात् विशेषणम् अस्ति, परन्तु सिद्धिः न भवति । तदा अनुमितिः उदेति, यतो हि अत्र उभयाभावप्रयुक्तविशिष्टाभावः अस्ति । अतः कारणस्य सत्वात् एव कार्यम् अर्थात् अनुमितिः उत्पन्ना ।

एतावता विशिष्टाभावे त्रैविध्यं निरूपितम् ।

एवञ्च [13]सिषाधयिषाविरहविशिष्टसिध्यभावः पक्षतायाः लक्षणम् इति प्राप्तम् । तस्मात् यत्र पर्वते सिद्धिः अस्ति, सिषाधयिषा अपि अस्ति । तत्र सिध्यभावस्य असत्वेऽपि सिषाधयिषाविरहविशिष्टसिध्यभावरूपपक्षतायाः सत्वात् न व्यतिरेकव्यभिचारः । नैयायिकैः पक्षतायाः अनुमितिकारणत्वम् अङ्गीक्रीयते । अयं सिद्धान्तः वेदान्तिभिः अपि

---

[13] तर्कसङ्ग्रहदीपिका पृ सं ८९

अङ्गीक्रीयते । सिषाधयिषाविरहविशिष्टसिध्यभावरूपपक्षताविषये वेदान्तिनाम् अपि सम्मतिः अस्ति इति ज्ञयते ।

अद्वैतसिद्धौ पक्षताया विषये किम् उक्तम् इति आलोचनीयम् । तत्र आदौ विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वम् अस्ति वा न वा इति विचारितम् । अत्र पूर्वपक्षिणः द्वैतिनः अर्थात् न्यायामृतकाराः ।

तत्र मिथ्यात्वे विप्रतिपत्तिः

[14]**"ब्रह्मप्रमातिरिक्ताऽबाध्यत्वे सति सत्वेन प्रतीत्यर्हं चिद्भिन्नं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगी न वा"** इति ।

अत्र द्वैतिनः –

प्रपञ्चः ब्रह्मप्रमातिरिक्ताऽबाध्यत्वे सति सत्वेन प्रतीत्यर्हं चिद्भिन्नं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगी न इति वदन्ति ।

अद्वैतिनः वदन्ति –

प्रपञ्चः ब्रह्मप्रमातिरिक्ताऽबाध्यत्वे सति सत्वेन प्रतीत्यर्हं चिद्भिन्नं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगी इति

---

[14] अद्वैतसिद्धिः पृ सं १५

सामान्यतः वक्तव्यं चेत् प्रपञ्चः मिथ्या न । परन्तु सत्यः एव इति द्वैतिनाम् आशयः । परन्तु अद्वैतिनः वयं तु श्रुतियुक्तिभिः प्रपञ्चस्य मिथ्यात्वं साधयामः ।

तत्र अद्वैतसिद्धेः द्वैतमिथ्यात्वसिद्धिपूर्वकत्वात् द्वैतमिथ्यात्वमेव प्रथममुपपादनीयम्[15] इति अचार्याः मधुसूदनसरस्वतीस्वामिनः प्रतिज्ञां कृतवन्तः ग्रन्थस्य आदौ । इदं द्वैतमिथ्यात्वस्य उपपादनं स्वपक्षसाधनपरपक्षनिराकरणाभ्यां भवति । अर्थात् प स्वकीयपक्षस्य उपपादनं कुर्यात् । अपरस्य पक्षस्य निराकरणं कुर्यात् इत्यर्थः । एवञ्च मिथ्यात्वस्य उपपादनं काञ्चित् कथां आश्रित्य भवति इति ज्ञायते । कथा नाम [16]नानावक्तृकः पूर्वोत्तरपक्षप्रतिपादकवाक्यसन्दर्भः इति नैयायिकाः कथयन्ति । अर्थात् कश्चन पूर्वपक्षप्रतिपादकः, अपरः उत्तरपक्षप्रतिपादकः भवति । परन्तु प्रकृत अद्वैतसिद्धिग्रन्थे कथा नाम [17]पञ्चावयवपरिकरोपेतं वाक्यम् इति कथयन्ति । एतादृशी कथा वादजल्पवितण्डात्मिका । अथवा स्वपक्षसाधनपरपक्षनिराकरणंम् एतदुभयं वादजल्पवितण्डानाम् अन्यतमाम् कथाम् अश्रित्य भवति ।

१.[18]वादो नाम तत्त्वबुभुत्सुकथा

२. [19]जल्पो नाम विजिगीषुकथा

---

15 15 अद्वैतसिद्धिः (बालबोधिनीव्याख्यया युक्ता) ६,७

16 तर्कसङ्ग्रहदीपिका पृ सं १७७

17 अद्वैतसिद्धिः (बालबोधिनीव्याख्यया युक्ता) पृ.सा ९

18 तर्कसङ्ग्रहदीपिका पृ सं १५१ (रामकृष्णाश्रमप्रकाशितम्)

19 तर्कसङ्ग्रहदीपिका पृ सं १५१ (रामकृष्णाश्रमप्रकाशितम्)

३. [20]वितण्डा नाम स्वपक्षस्थापनाहीना परपक्षखण्डनमात्रपर्यवसाना

अत्र वादस्तु समान्यतः गुरुशिष्ययोः सम्भवति । कुत इति चेत् गुरुणा उपदिष्टविषये तदि संशयाः सम्भवन्ति तर्हि शिष्यः गुरुं प्रश्नान् करोति । परन्तु शिष्यस्य मनसि विजिगीषा न भवति । गुरुणा उपदेशे कृते सति तत्वं शिष्येण ज्ञातं चेत् सः समाहितो भवति । जल्पवितण्डयोः विजिगीषुकथारूपत्वम् अर्थात् अत्र जये एव तात्पर्यं भवति ।

एवञ्च कथायां मध्यस्थः विप्रतिपत्तिं प्रदर्शयति । **"ब्रह्मप्रमातिरिक्ताऽबाध्यत्वे सति सत्वेन प्रतीत्यर्हं चिद्भिन्नं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगी न वा"** इति ।

एषा विप्रतिपत्तिः किमर्थं प्रदर्शनीया इति प्रश्ने, विचारार्थं प्रदर्शनीया । एवञ्च विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वात्, आदौ मध्यस्थेन विप्रतिपत्तिः प्रदर्श्यते ।अत्र विकल्पद्वयं वर्तते ।

१.विप्रतिपत्तेः संशयजननद्वारा विचाराङ्गत्वम् ।

२.विप्रतिपत्तेः स्वरूपत एव विचाराङ्गत्वम् ।

एतत् विकल्पद्वयमपि न्यायामृतकाराः न अङ्गीकुर्वन्ति । कुत इति चेत् इदं यत् विप्रतिपत्तप्रदर्शनं वर्तते तत् तार्किकपरम्परानुसारेण । तेषाम् अयमाशयः । तार्किकाः तावत् कथायां मध्यस्थेन आदौ विप्रतिपत्तिः प्रदर्शनीया इति वदन्ति । अतः

---

[20]तर्कसङ्ग्रहदीपिका पृ सं १५१ (रामकृष्णाश्रमप्रकाशितम्)

तार्किकपरम्परायां कथायां विप्रतिपत्तिप्रदर्शनम् आदौ वर्तते ।अतः तार्किकमतरीत्या विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वम् अस्ति । परन्तु न्यायामृतकारास्तावत् वदन्ति वस्तुतः विप्रतिपत्तेः विचाराङ्गत्वं नास्ति । तथापि तार्किक सम्प्रदायानुसारेण केवलं विप्रतिपत्तिः प्रदर्श्यते इति । अतः न्यायामृतकाराः वदन्ति "[21]इदश्च विप्रतिपत्तिप्रदर्शनम् तार्किकरीत्या एव उक्तं नतु वस्तुतः" इत्यादि। तथा च अद्वैतसिद्धौ मधुसूदनसरस्वतीस्वामिभिः विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वं नास्तीति यः पक्षः सः एवम् अनूदितः ।

"[22]यद्यपि विप्रतिपत्तिजन्यसंशयस्य न पक्षतासंपादकतया उपयोगः, सिषाधयिषाविरहसहकृतसाधकमानाभावरूपायाः तस्याः संशयाघटितत्वात् । अन्यथा श्रुत्यात्मनिश्चयवतः अनुमित्सया तदनुमानं न स्यात्, वाद्यादीनाम् निश्चयवत्वेन संशयासम्भवात् आहार्यासंशयस्य अतिप्रसञ्जकत्वाच्च । नापि विप्रतिपत्तेः स्वरुपत एव पक्षप्रतिपक्षप्रिग्रहफलकतया उपयोगः, त्वयेदं साधनीयं, अनेन इदं दूषणीयम् इत्यादि मध्यस्थवाक्यादेव तल्लाभेन विप्रतिपत्ति वैय्यर्थ्यात्"।

अस्मिन् ग्रन्थभागे न्यायामृतकारैः विप्रतिपत्तेः संशयद्वारा स्वरूपतः वा विचाराङ्गत्वम् नास्ति इति निरुपितम् । अस्मिन् सन्दर्भे विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वं नास्ति इति कथनावसरे नैयायिकाभिमतः पक्षताविमर्शः कृतः। अर्थात् नैयायिकैः यादृशपक्षतायाः

---

[21] अद्वैतसिद्धिः (बालबोधिनीव्याख्यया युक्ता)पृ स १०

[22] अद्वैतसिद्धिः (बालबोधिनीव्याख्यया युक्ता)पृ स १०,११,१२,१३

अनुमितिकारणत्वम् अङ्गीक्रियते तादृशी एव पक्षता अत्रापि अङ्गीकृत्य निरूपिता । पूर्वोक्तरीत्या एव विप्रतिपत्तर्नाम् संशयजनिका विरुद्धार्थप्रतिपादकवाक्यद्वयरूपा विवक्षिता । विरुद्धा प्रतिपत्तिः यस्मात् इति व्युत्पत्तेः । विप्रतिपत्तिजन्यसंशयस्य पक्षता सम्पादकतया विचाराङ्गत्वम् अस्ति । तत्र अद्वैतसिद्धौ नैयायिकैः अनङ्गीकृता पक्षता या साध्यसंशयरूपा पक्षता सा न अङ्गीक्रीयते । यतो हि सिषाधयिषाविरहसहकृतसाधकमानाभावरूपायाः संशयाघटितत्वात् पक्षतासम्पादकतया विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वं नास्ति । यदि पक्षता साध्यसंशयरूपा स्यात् तर्हि विप्रतिपत्तिजन्यसंशयस्य पक्षता सम्पादकतया विचाराङ्गत्वं भवतिस्म । परन्तु पक्षतायाः स्वरूपं संशयघटिततया न अङ्गीक्रीयते इत्यतः पक्षतासम्पादकतया विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वं नास्ति ।

यदि पक्षतायाः साध्यसंशयरूपत्वम् उच्यते तर्हि दोषः भवति । “ [23]आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः” इति श्रुत्या कस्य चित् पुरुषस्य आत्मनिश्चयः जातः । श्रुतेः श्रवणेन आनुभविकः निश्चयः न भवति । परन्तु शाब्दबोधात्मकः निश्चयः जातः । तस्य पुरुषस्य निश्चयस्य सत्वात् संशयः एव नास्ति । परन्तु सः श्रवणं निर्विद्य मननं कर्तुं प्रवर्तते । मननं नाम श्रृतस्य अर्थस्य युक्त्या चिन्तनम्। इदं मननम् अनुमानस्वरूपम् । परन्तु अनुमाने प्रवर्तनात् प्राक् साध्यसंशयः अपेक्षितः

[23] बृहदारण्यकोपनिषत् २/४/१५

। अत्र तु पुरुषस्य आत्मनिश्चयः वर्तते । एवञ्च आत्मनिश्चयकाले यत् अनुमानं आत्मानम् अनुमिनुयाम् इति सा न स्यात् । यतो हि ततः प्राक् सन्देहस्य अभावात् ।

अतः सिषाधयिषाविरहसहकृतसाधकमानाभावरूपायाः पक्षतायाः स्वरूपम् अङ्गीक्रीयते । तथा सति प्रकृते समन्वयः भवति इत्यतः दोषः नास्ति । तस्मात् नैयायिकैः यादृषी पक्षता तादृशी एव अत्रापि अङ्गीकृता । इयम् पक्षता पूर्वपक्षिभिः केवलम् अङ्गीकृतम् इति न परन्तु सिद्धान्तिभिः अपि अङ्गीकृतम् अस्ति ।

[24]**“तथापि विप्रतिपत्तिजन्यस्शयस्यानुमित्यनङ्गेऽपि व्युदसनीयतया विचाराङ्गत्वमस्त्येव”**

सिद्धान्तिभिः संशयघटितपक्षतायाः अनङ्गीकारादेव [25]**विप्रतिपत्तिजन्यस्शयस्य अनुमित्यनङ्गत्वम्** इति उक्तम् ।

नैयायिकोक्ताः केचन प्रमेयांशाः सिद्धिकारैः अङ्गीकृताः वर्तन्ते, नैयायिकोक्ताः केचन प्रमेयांशाः सिद्धिकारैः न अङ्गीकृताः वर्तन्ते । अङ्गीकृतेषु प्रमेयेषु अयम् अन्यतमः प्रमेयांशः ।

---

[24] अद्वैतसिद्धिः पृ सं १३

[25] अद्वैतसिद्धिः (बालबोधिनीव्याख्यया युक्ता)पृ स १३

स्वरूपयोग्यत्वविमर्शः

संशयजनकत्वं कस्य इति प्रश्नः उदेति । अत्र नैयायिकानां आशयः सिद्धिकारैः अङ्गीकृतः इति ज्ञायते । अधुना नैयायिकाः संशयजनकत्वं कस्य इति वदन्ति इति पश्यामः । नैयायिकानां मध्ये मतद्वयं वर्तते –

1. प्राचीननैयायिकमतम्
2. नवीननैयायिकमतम् इति

प्रकृतोपयुक्तं प्राचीनानाम् आशयं पश्यामः । अत्र सूत्रकाराः कथयन्ति –

[26]"समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः" इति।

सूत्रार्थः – संशयस्य उत्पत्तिः पञ्चभिः प्रकारैः भवति। ते प्रकाराः सूत्रकारैः एवं उक्ताः –

1. साधारणधर्मज्ञानम्
2. असाधरणधर्मज्ञानम्
3. विप्रतिपत्तिवाक्यम्
4. उपलब्धेः अव्यवस्था
5. अनुपलब्धेः अव्यवस्था

---

[26] न्या सू १\१\२३

उदाहरणार्थम् – स्थाणुर्वा पुरुषो वा इति संशयं स्वीकुर्मः । अत्र एकस्मिन् धर्मिणि विरुद्धनानाधर्मप्रकारकः संशयः भवति । अत्र इदन्त्वावच्छिन्ने स्थाणुत्वपुरुषत्वप्रकारकः संशयः भवति । अयं संशयः कथम् उत्पन्नः इति चेत् अत्र द्रष्टुः पुरुषस्य स्थाणुपुरुषोभयसाधारणधर्मज्ञानं भवति । अत्र उभयसाधारणः धर्मः नाम उच्चैस्तरत्वम् अथवा ऋकोडरादिमत्वम् । एवञ्च एतादृशस्य साधारणधर्मस्य ज्ञानात् भवति संशयः । तदुक्तं मुक्तावलीकारैः –

[27]"साधारणादिधर्मस्य ज्ञानं संशयकारणम्" इति ।

अत्र प्रकृते आवश्यकः विषयः कः इत्युक्ते प्राचीनैः नैयायिकैः विप्रतिपत्तिवाक्यस्य संशयजनकत्वम् अङ्गीक्रीयते । तेषां मते संशयः शाब्दः । शाब्दबोधं प्रति शब्दज्ञानस्य कारणत्वम् उच्यते । अतः विप्रतिपत्तिवाक्यस्य शब्दरूपत्वात् शाब्दबोधात्मकसंशयं प्रति विप्रतिपत्तिवाक्यस्य कारणत्वम् अस्ति । अतः सिद्धिकाराः कथयन्ति यदि वादिनोः निश्चयः कोटिद्वयेऽपि भवति । तदा यदि विप्रतिपत्तिवाक्याद् संशयः न जायते, तर्हि तादृशकोटिद्वयस्य संशयजनने स्वरूपयोग्यत्वं अस्ति । स्वरूपयोग्यत्वं नाम कारणतावच्छेदकधर्मवत्वम् इति अर्थः । अत्र कारणतावच्छेदकधर्मः भवति विप्रतिपत्तिवाक्यद्वये वर्तमानं शब्दत्वम् । तादृशधर्मवत्वं विप्रतिपत्तिवाक्येषु वर्तते इति

---

[27] कारिकावली श्लो सं १३०

विप्रतिपत्तिवाक्ये स्वरूपयोग्यत्वम् आयातम् । तदुक्तं सिद्धिकारैः[28] “तादृशसंशयं प्रति विप्रतिपत्तेः क्वचित् निश्चयादिना प्रतिबन्धात् अजनकत्वेऽपि स्वरूपयोग्यत्वात्” इति ।

नैयायिकैः अपि स्वरूपयोग्यस्य कारणत्वम् अङ्गीकृतं वर्तते । घटं प्रति दण्डः कारणम् इति उच्यते । परन्तु सर्वैः दण्डैः घटः क्रीयते वा इति चेत् नैव । यतो हि अरण्ये यः दण्डः वर्तते, तस्य कथं प्रकृतघटकारणत्वम् इति । अत्र उच्यते अरण्यस्थ दण्डस्य प्रकृतघटं प्रति साक्षात् कारणत्वं नास्ति चेदपि कारणतावच्छेदकधर्मः यत् दण्डत्वं तद्वत्वात् सः दण्डः अपि कारणम् एव भवति । एवञ्च स्वरूपयोग्यस्यापि कारणत्वं अस्ति इति नैयायिकैः अङ्गीकृतः पक्षः सिद्धिकारैः अङ्गीकृतः इति ज्ञायते ।

---

[28] अद्वैतसिद्धिः पृ सं ५

सन्दिग्धानैकान्तिकत्वनिरूपणम्

अद्वैतसिद्धिग्रन्थे आदौ विप्रतिपत्तिः दर्शिता । कथायाम् अयं नियमः वर्तते यत् आदौ विप्रतिपत्तिः दर्शनीया इति । सा विप्रतिपत्तिः द्विधा भवितुम् अर्हति । सामान्यविप्रतिपत्तिः, विशेषविप्रतिपत्तिः इति । सामान्यविप्रतिपत्तिः नाम विप्रतिपत्तिलक्ष्यतावच्छेदकत्वेन अभिमतधर्माक्रान्तानां यावतां धर्मिणां लक्ष्यत्वेन निर्दिश्य तस्मिन् सामान्ये धर्मिणि विप्रतिपत्तिप्रदर्शनम् । विशेषविप्रतिपत्तिः नाम विशिष्य एकं धर्मिणं लक्ष्यत्वेन निर्दिष्य विप्रतिपत्तेः प्रदर्शनम् ।

प्रकृते ग्रन्थसन्दर्भे उभयथा अपि विप्रतिपत्तिः दर्शिता वर्तते । “विमतं मिथ्या न वा” इति सामान्यविप्रतिपत्तिः । “वियत् मिथ्या न वा”, “पृथिवी मिथ्या न वा” इत्यादिः विशेषविप्रतिपत्तिः । यदा विशिष्यविप्रतिपत्तिः प्रदर्ष्यते तदा अनुमानम् एवं भवति “वियत् मिथ्या दृश्यत्वात्” इति । एवं यदि विशिष्यान्मानं क्रियते , तर्हि घटादिषु सन्दिग्धानैकान्तिकत्वदोषः भवति । यथा व्यभिचारनिश्चयः व्याप्तिज्ञानप्रतिबन्धद्वारा अनुमितिं प्रतिबध्नाति तद्वत् व्यभिचारसन्देहः अपि व्याप्तिज्ञानप्रतिबन्धद्वारा अनुमितिं प्रतिबध्नाति । व्यभिचारसन्देहः एव सन्दिग्धानैकान्तिकत्वदोषः इति कथ्यते ।

नैयायिकैः अपि सन्दिग्धानैकान्तिकत्वं दोषत्वेन परिगण्यते । एवञ्च नैयायिकैः यः सन्दिग्धानैकान्तिकत्वदोषः स्वीकृतः सः वेदान्तिभिः अपि स्वीक्रियते । एतदभिप्रायेण

सिद्धिकाराः कथयन्ति । [29]"एवं वियदादेः प्रत्येकं पक्षत्वेऽपि न घटादौ सन्दिग्धानैकान्तिकता । पक्षसमत्वात् घटादेः । तथा हि पक्षे साध्यसन्देहस्य अनुगुणत्वात् पक्षभिन्न एव तस्य दूषणत्वं वाच्यम् । प्रकृते वियत् पक्षकानुमाने केनचित् घटान्तर्भाविण सन्दिग्धानैकान्तिकता दोषः दर्शितः। घटादिषु दोषं दर्श्यमानः सः वदति यत्र हेतोः निश्चयवति साध्यस्य सन्देहः वर्तते । तत्र एव सन्दिग्धानैकान्तिकता दोषः इति । परन्तु अद्वैतसिद्धिकाराः इदं न अङ्गीकुर्वन्ति । यत्र हेतोः निश्चयवति साध्यस्य सन्देहः वर्तते तत्र यदि सन्दिग्धानैकान्तिकता दोषः इति उच्यते तर्हि अनुमानमात्रस्य उच्छेदापत्तिः भवति । यतो हि सर्वत्र सदनुमानेषु आदौ साध्यसन्देहः भवत्येव। उदाहरणार्थं पर्वतः वह्निमान् धुमात् इति सदनुमानम् । आदौ पक्षधर्मता बलात् पक्षे हेतोः निश्चयः भवत्येव । परन्तु साध्यस्य सन्देहः केवलं भवति । कुतः इति चेत् साध्येन सह सन्निकर्षाभावात् । अतः इदं ज्ञायते यत् यदि साध्यसन्देहवति पूर्वोक्तरीत्या सन्दिग्धानैकान्तिकता दोषः तर्हि अनुमितेः प्राक् सर्वत्र सदनुमानेषु पक्षे साध्यस्य निश्चयः न भवति इत्यतः अनुमानमात्रस्य उच्छेदप्रसङ्गः तदवस्थः स्यात् । परन्तु अनुमितेः प्राक् पक्षे साध्यस्य सन्देहः अनुमितेः उत्पत्तौ अनुकूलः एव भवति । कथम् इति चेत् पक्षता संपादकतया इति उच्यते । यतोहि प्राचीनानां मते साध्यसन्देहः एव पक्षता । तर्हि अत्र एकः प्रश्नः उदेति यत् पूर्वोक्तरीत्या पक्षे साध्यसन्देहे सति सः पक्षता संपादकतया अनुमितेः उत्पतौ अनुकूलः भवतु, परन्तु प्रकृते विशेषेण एव अनुमानप्रयोगस्य प्रदर्श्यमानत्वात् घटस्तु न

---

[29] अद्वैतसिद्धिः पृ सं २३

पक्षः । अतः तत्र साध्यस्य सन्देहे अनुकूलः कथं भवति इति । अतः सिद्धिकारैः उक्तं घटः वियत् मिथ्या इति प्रतिज्ञायां न विषयः चेदपि घटः पक्षसमः इति उच्यते । पक्षे पक्षसमे वा यदि साध्यसन्देहः तर्हि सः सन्देहः अनुमितौ अनुकूलः एव भवति । अद्वैतसिद्धिकारैः यः अयः सिद्धान्तः अङ्गीकृतः सः नैयायिकानाम् अपि सम्मतः । तदुक्तं दीधितौ[30]" न हि पक्षे पक्षसमे वा व्यभिचारः" इति । अत्र दीधितिकाराणाम् अयमाशयः- यत्र साध्यसन्देहः भवति सः पक्षः भवति, एवमेव प्रकृतपक्षतावच्छेदकधर्मानाक्रान्तोऽपि साध्यसन्देहवान् चेत् भवति सः पक्षसमः । अतः पक्षे पक्षसमे वा यदि व्यभिचारसन्देहः भवति तर्हि सः अनुमितिप्रतिबन्धकः न भवति।

तार्किकाणां मतेऽपि अयम् अभिप्रायः ईश्वरानुमाने दर्शितः। तत्र क्षितिः सकर्त्रिका कार्यत्वात् इति अनुमानम् । अत्र तार्किकैः जलादौ सन्दिग्धानैकान्तिकत्वदोषः न प्रदर्शितः । यतो हि जलादिषु अपि कार्यत्वेन हेतुना सकर्तृकत्वस्य साधनम् इष्टमेव । अतः जलादीनां पक्षसमत्वम् एव तार्किकाणाम् इष्टम् इति ज्ञायते । तर्हि सन्दिग्धानैकान्तिकत्वं कुत्र दोषत्वेन उक्तः इति प्रश्नः उदेति । तत्र तार्किकाणां मतं किञ्चित् उपपादनीयम् । यत्र साध्याभावस्य निश्चयः वर्तते तत्र यदि हेतोः सन्देहः तर्हि तत्र सन्दिग्धानैकान्तिकत्वम् इति हेतौ दोषः आयाति । उदाहरणार्थं इन्द्रः अमृतपः साक्षाद्देवत्वात् इति अनुमाने श्री रामचन्द्रे सन्दिग्धानैकान्तिकत्वं दर्शयितुं शक्यते । कथम् इति चेत् अमृतपात्वाभावः रामे निश्चितम् । परन्तु तत्र साक्षाद्देवत्वं सन्दिग्धम् । अतः

[30] दीधितिः पृ सं १९०५

साध्याभावस्य निश्चयवति हेतोः सन्देहस्य सत्वात् साक्षाद्देवत्वम् इति हेतुः दोषग्रस्तः इति उच्यते । एवञ्च प्रकृते विततपक्षके अनुमाने न दोषः। यतो हि घटादीनां प्रकृते पक्षसमत्वं वर्तते। एवमेव घटादिषु हेतोः निश्चयः वर्तते इत्यतः हेतुसन्देहो नास्ति । दृश्यत्वम् इति हेतोः घटादिषु निश्चयः एव वर्तते । घटादीनां प्रत्यक्षेण ग्रहः भवितुम् अर्हति । अतः तत्र हेतोः सन्देहः न भवितुम् अर्हति । तस्मात् प्रकृते अनुमाने न दोषः इति ।

नैयायिकैः सर्वदा साध्याभाववति एव सर्वत्र हेतोः सन्देहे सन्दिग्धानैकान्तिकता दोषः अङ्गीक्रियते इति नास्ति । परन्तु अनुकूलतर्काभावदशायां यत्र हेतोः निश्चयवति साध्यस्य सन्देहः तत्रापि हेतौ सन्दिग्धानैकान्तिकता दोषः अङ्गीक्रियते । नैयायिकानाम् आशयः ब्रह्मानन्दीये एवम् उक्तं [31]“नवीनतार्किकैः तु व्याप्तिग्राहकतर्काभावे सति साध्याभाववत्वेन सन्दिग्धे धर्मिणि हेतुनिश्चयोऽपि व्यभिचारसंशयहेतुतया दोष एव” इति । अयं अभिप्रायः मणिकारैः स्वयम् उपपादितः अस्ति इति ब्रह्मानन्दीये उक्तम् । तथा च ब्रह्मानन्दीकाराः वदन्ति “अत एव वन्हिः अद्दिष्ठातीन्द्रियधर्मसमयी दाहजनकत्वात् आत्मवत् इत्यादि शक्त्यादिसाधकानुमानेषु मणावप्रयोजकत्वमुक्तम्” इति ।

अत्र अयमभिप्रायः मणिकाराणां – अत्र सन्दर्भस्तु शक्तेः साधनम् । इदम् अनुमानं शक्तिसाधकत्वेन उपन्यस्तं वर्तते । अत्र वन्हिः पक्षः, अद्दिष्ठातीन्द्रियधर्मसमवायित्वं

---

[31] लघुचन्द्रिका पृ सं ४२

साध्यं, दाहजनकत्वं हेतुः । कार्यसामान्यं प्रति अदृष्टवदात्मसंयोगस्य हेतुत्वात् आत्मनि दाहानुकूलत्वम् अयातम् । अदृष्टं तावत् आत्मनि केवलं वर्तते इत्यतः अद्विष्ठत्वम् आयातम् । एवञ्च अद्विष्ठः यः अतीन्द्रियः धर्मः नाम अदृष्टं, तादृशधर्मसमवायित्वम् आत्मनि वर्तते इति आत्मनि साध्यहेत्वोः समन्वयः । एवञ्च यथा आत्मनः दाहजनकत्वात् अद्विष्ठातीन्द्रियधर्मसमवायित्वं , तुल्यया रीत्या वन्हेः अपि दाहजनकत्वात् अद्विष्ठातीन्द्रियधर्मसमवायित्वं वक्तव्यम् । तस्मात् वन्हिः अद्विष्ठातीन्द्रियधर्मसमवायी इति सिध्यति । स च अद्विष्ठातीन्द्रियधर्मः शक्तिः इति अनेन अनुमानेन सिध्यति । अत्र अप्रयोजकशङ्का भवति । वन्हौ हेतुः अस्तु, साध्यं मास्तु इति । अर्थात् दाहजनकत्वम् अस्तु परन्तु अद्विष्ठातीन्द्रियधर्मसमवायित्वं मास्तु इति । अत्र यदि अप्रयोजकशङ्कावरणीया तर्हि अनुकूलः तर्कः वक्तव्यः । तर्के उक्ते एव अप्रयोजकशङ्कावरणं सम्भवति । परन्तु मणिकाराः कथयन्ति अत्र अप्रयोजकशङ्कावरणं कर्तुम् अनुकूलः तर्कः नास्ति इति । अतः अप्रयोजकशङ्कावारणं कर्तुं न शक्यते । अप्रयोजकशङ्कायां सत्यां व्याप्तिज्ञानस्य प्रतिबन्धः भवति । व्याप्तिज्ञानाभावे तु अनेन अनुमानेन अनुमितिः नैव उदेति । अतः अनेन अनुमानेन शक्तिः साधयितुं न शक्यते ।

अनेन मणिग्रन्थेन इदं ज्ञायते यत् यत्र हेतोः निश्चयवति पक्षे साध्याभावसन्देहः भवति, तत्र अप्रजोजकशङ्कावारणार्थं यदि अनुकूलः तर्कः न भवति, तर्हि तत्र सन्दिधानैकान्तिकतादोषः भवति । यदि प्रकृते अप्रयोजकशङ्कायां सत्याम् अपि व्याप्तिग्रहप्रतिबन्धकत्वं न उच्यते, तर्हि प्रकृते अनुमाने व्याप्तिपक्षधर्मतयोः सम्भवेन

अनुमितिः स्यात् । तथा सति मणिकारैः या अप्रयोजकशङ्का उद्भाविता सा व्यर्था स्यात् । तदुक्तं दीधितौ [32]"तत्र व्यभिचारसंशयस्य अदूषणत्वे व्याप्तिपक्षधर्मतानिश्चयसम्भवेन अप्रयोजकत्वोक्तेः असङ्गतेः तस्य दूषणत्वम् आवश्यकम्" इति । अतः प्रकृते तावत् नव्यनैयायिकमतानुसारेण वियत्पक्षकमिथ्यात्वानुमाने दोषः स्यात् इति प्रश्नः उदेति । परन्तु अग्रे सिद्धिकाराः एव अग्रे प्रकृतानुमानोपयोगि तर्कान् प्रदर्शयन्ति इत्यतः न दोषः। एवञ्च अनेन महता प्रबन्धेन इदं सिद्धं यत् सिद्धिकाराः तार्किकमतानुसारेण एव प्रकृते उपपादनं कृतवन्तः इति ।

[32] लघुचन्द्रिका पृ सं ४२

“ध्वंसप्रागभावयोः अधिकरणे अत्यन्ताभावः न अङ्गीक्रियते”

ध्वंसप्रागभावयोः अधिकरणे अत्यंताभावः नाङ्गीक्रियते इति प्राचीननैयायिकानां मतम् । परन्तु नव्यनैयायिकास्तु ध्वंसप्रागभावयोः अधिकरणे अत्यंताभावः इति वदन्ति । अधुना प्रसिद्धत्रिरङ्गिस्थानानुरोधेन प्राचीनमतं पश्यामः । आमः घटः पाके निक्षिप्तः । पाकानन्तरं घटगतं श्यामरूपं नष्टम् । रक्तरूपं उत्पन्नम् । ततः परं रक्तरूपस्य नाशानन्तरं श्यामरूपमुत्पन्नमिति मन्यामहे । अधुना मध्ये पूर्वतनस्य श्यामवर्णस्य ध्वंसः वर्तते अग्रिमश्यामवर्णस्य प्रागभावश्च वर्तते । तस्मात् प्राचीनमतानुसारं तत्र अत्यन्ताभावः न प्रतीयते । अतः तत्र अत्यन्ताभावस्य प्रतीतिः न प्रतीयेत । परन्तु मध्यरक्तता दशायां श्यामरूपं नास्ति इति प्रतीतिः भवत्येव इति सर्वानुभवसिद्धम् । इह घटो भविष्यति इति प्रागभावस्य आकारः। घटः ध्वस्तः इति ध्वंसस्य आकारः । घटो नास्ति इति अत्यन्ताभावस्य आकारः। घटः पटो न इति अत्यन्ताभावस्य आकारः। प्रकृते तु मध्यश्यामता दशायां तु रक्तरूपं प्रचीननैयायिकैः रक्तरूपं नास्ति इति प्रतीतिः कथम् अङ्गीक्रियते इति प्रश्नः उदेति ।

तत्र नैयायिकैः उच्यते - [33]श्यामघटे रक्तो नास्ति, रक्तघटे श्यामः नास्ति इति धीश्च प्रागभावं ध्वंसं च अवगाहते न तु तदत्यन्ताभावम्, तयोः विरोधात् इति ।

---

[33] मुक्तावली पृ सं ७४

अस्य अयं अभिप्रायः यत् मध्यश्यामता दशायां घटो नास्ति इति प्रतीतिं प्राचीननैयायिकाः अपि अङ्गीकुर्वन्ति । परन्तु एते वदन्ति मध्यरक्तता दशायां नास्ति इति या प्रतीतिः सा ध्वंसं वा प्रागभावं वा अवगाहते । उक्तनियमानुसारं अत्यन्ताभावस्य ध्वंसप्रागभावाभ्यां सह विरोधः वर्तते । तस्मात् प्राचीनमते न कोपि दोषः इति ज्ञायते । परन्तु अत्यन्ताभावस्य ध्वंसप्रागभावाभ्यां सह विरोधे प्रमाणं नास्ति इति नवीनाः वदन्ति । तदुक्तं विश्वनाथपञ्चाननाचार्यैः “[34] तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदेन अपि अत्यन्ताभावो वर्तते इत्याहुः” अनुभवानुसारेण मध्यरक्तता दशायां तु अत्यन्ताभावः एव प्रतीयते । अतः नास्ति इति प्रतीत्या अत्यन्ताभावः एव विषयीक्रियते । अत्र प्राचीननैयायिकान् उद्दिश्य नवीनाः आक्षिपन्ति । पञ्चरङ्गिस्थले तावत् आदौ घटे रक्तं रूपम् उत्पन्नं ततः श्यामरूपं ततः रक्तरूपं ततः श्यामरूपं ततः रक्तरूपम् उत्पन्नम् । अत्र मध्यरक्तता दशायां प्रथमरक्तरूपस्य ध्वंसः वर्तते । एवमेव अग्रिमरक्तरूपस्य प्रागभावः च वर्तते । अतः प्राचीननैयायिकमतानुसारं तत्रापि रक्तरूपध्वंसप्रागभावावगाहि रक्तरूपं नास्ति इति प्रती्तिः स्यादेव इति आक्षेपः भवति। तत्र प्राचीनाः एवं समाधानं वदन्ति यत्र सामान्यधर्मावच्छिन्नप्रतियोगिताकात्यन्ताभावः तत्र एव नास्ति इति प्रतीतिः । यथा यत्र रक्तत्वावच्छिन्नप्रतियोगिताकाभावः तत्र एव रक्तं नास्ति इति प्रतीतिः रक्तरूपात्यन्ताभावं अवगाहते । परन्तु यत्र केवलं रक्तनिष्ठप्रतियोगितानिरूपकः अभावः वर्तते तत्र रक्तं नास्ति इति प्रतीतिः रक्तध्वंसं रक्तप्रागभावञ्च अवगाहते ।

[34] मुक्तावली पृ सं ७४

रक्तत्वावच्छिन्नप्रतियोगिताकाभावस्य अव्याप्यवृत्तित्वम् उच्यते । अर्थात् अव्याप्यवृत्तित्वं नाम स्वात्यन्ताभावसमानाधिकरणत्वम् । तस्मात् मध्यरक्ततादशायां पूर्वापररक्तिमध्वंसप्रागभावयोः सत्वात् तत्र केवलं रक्तनिष्ठप्रतियोगिताकाभावः रक्तं नास्ति इति प्रतीत्या विषयी क्रियते । अतः एव रक्तनिष्ठप्रतियोगिताकाभावः इत्यनेन रक्तध्वंसप्रागभावयोः अन्तर्भावात् रक्तं नास्ति इति प्रतीत्या रक्तध्वंसप्रागभावौ विषयीक्रियेते । अतः एतन्मते मध्यरक्तता दशायां रक्तं नास्ति इति प्रतीतिः उपपद्यते । यत्र श्यामवर्णः वर्तते , तत्र रक्तं नास्ति इति प्रतीत्या रक्तत्वावच्छिन्नप्रतियोगिताकः रक्तस्य अत्यन्ताभावः एव विषयीक्रियते इति । अयं अभिप्रायः दिनकरीग्रन्थे आचार्यैः पूर्वपक्षलेखनावसरे प्रकतितः ।

तदुक्तं दिनकर्य्यां "[35]न च रक्तत्वावच्छिन्नप्रतियोगिताकत्वं ध्वंसप्रागभावयोः अव्याप्यवृत्ति, तेन अन्तरा श्यामे रक्तं रूपं नास्ति इति प्रत्ययः, तदा ध्वंसप्रागभावयोः सामान्यावच्छिन्नप्रतियोगिताकत्वस्वीकारात्, न तु पूर्वापररक्तिमध्वंसप्रागभाववति रक्ते। तत्र तदनभ्युपगमादिति वाच्यम् इति।

अत्र नवीननैयायिकाः वदन्ति – अस्मिन् पक्षे गौरवदोषः वर्तते इति । अत्र विनिगमना विरहः वर्तते । यतो हि यस्मिन् काले रक्तरूपध्वंसप्रागभावयोः उत्पत्तिः जाता तस्मिन् एव काले यदा वायुसंयोगध्वंसः उत्पद्यते तदा रक्तरूपं नास्ति इति प्रतीत्या

[35] दिनकरी पृ सं ७४

रक्तरूपध्वंसप्रागभावयोः स्वीकारः कर्तव्यः अथवा वायुसंयोगध्वंसः स्वीकर्तव्यः वा इत्यत्र विनिगमनाविरहः वर्तते । तदुक्तं दिनकर्यां “[36] विनिगमना विरहेण पदार्थान्तरध्वंसप्रागभावयोः अपि तत्स्वीकारप्रसङ्गेन गौरवात्, तदपेक्षया अत्यन्ताभ्वस्य अन्तरा श्यामादौ सम्बन्धत्वकल्पनेन एव लाघवात् इति अन्यत्र विस्तरः इति ”

अत्र प्रश्नः उत्पद्यते यत् वायुसंयोगध्वंसः कथं रूपं नास्ति इति प्रतीतिविषयः इति । अत्र उच्यते एककालवृत्तित्वेन रूपेण संभवति। अत्र एकम् उदाहरणम् उच्यते। एकः राजा वर्तते, सः कश्चित् पुरुषं साहाय्यत्वेन स्वीकर्तुम् इच्छति। परन्तु तत् काले तत्र द्वौ सेवकौ स्तः । तयोः कार्यकरणयोग्यतां अपरिगणय्य केवलं तत्समये तत्र वर्तते इति मात्रं परिगणय्य यदि प्रथमं पुरुषं राजा आह्वयति, तर्हि द्वितीयपुरुषे अपि तत्कालवृत्तित्वस्य समानत्वात् प्रथमः एव कुतः आह्वातव्यः द्वितीयः अपि आह्वातुं शक्यः इति विनिगमनाविरहः लभ्यते । तद्वत् प्रकृते रक्तत्वावच्छिन्नप्रतिगोगिताकात्यन्ताभावस्य ग्रन्थकारैः कालिकाव्याप्यवृत्तित्वं कथितम् । तस्मात् कालं अधिकरणत्वेन स्वीकर्तव्यम् । स्वं नाम रक्तत्वावच्छिन्नप्रतिगोगिताकात्यन्ताभावः , स्वात्यन्ताभावः नाम रक्तत्वावच्छिन्नप्रतिगोगिताकात्यन्ताभावाभावः रक्तरूपदेशावच्छेदेन काले वर्तते, तस्य त् रक्तरूपध्वंसप्रागभावयोः काले तदधिकरणं कालः, तस्य रक्तत्वावच्छिन्नप्रतिगोगिताकात्यन्ताभावाभावस्य प्रतियोगिनः रक्तत्वावच्छिन्नप्रतिगोगिताकात्यन्ताभावस्य रक्तरूपध्वंसप्रागभावदेशावच्छेदेन काले

---

[36]दिनकरी पृ सं ७४

वृत्तित्वं वर्तते । अतः स्वात्यन्ताभावसामानाधिकरण्यरूपं अव्याप्यवृत्तित्वं रक्तत्वावच्छिन्नप्रतियोगिताकाभावे आयातम् ।

तदुक्तं [37]रामरुद्र्यां "अव्याप्यवृत्तीति । कालिकाव्याप्यवृत्तीत्यर्थः । पदार्थान्तरध्वंसेति । रक्तरूपध्वंसोत्पत्तिकालोत्पत्तिकतत्समानाधिकरणवायुसंयोगध्वंसेन इत्यर्थः" ।

तस्मात् नवीननैयायिकैः प्राचीनमते विनिगमनाविरहरूपः दोषः दर्शितः । अतः नविनोक्तरीत्य ध्वंसप्रागभावयोः अधिकरणे अत्यन्ताभावः न अङ्गीक्रियते इत्यत्र प्रमाणं नास्ति इत्येव लभ्यते । एवञ्च रक्तरूपं नास्ति इति प्रतीतेः रक्तत्वावच्छिन्नप्रतिगोगिताकात्यन्ताभावः एव विषयः । मध्यरक्ततादशायां तु रक्तत्वावच्छिन्नप्रतिगोगिताकात्यन्ताभावस्य एव अभावात् सा प्रतीतिः एव न भवति । परन्तु मध्यश्यामता दशायान्तु रक्तत्वावच्छिन्नप्रतिगोगिताकात्यन्ताभावस्य सत्वात् सा प्रतीतिः भवितुम् अर्हति । अत्र नवीननैयायिकैः प्राचीनमतं निराकृत्य तयोः विरोधे मानाभावः उक्तः अयं अभिप्रायः अद्वैतसिद्धिकारैः स्वीकृतः इति स्पष्टतया अवगम्यते । तदुक्तं सिद्धिकारैः -

[38]"न च संयोगिनि समवायिनि वा देशे तदत्यन्ताभावासम्भवः, सम्भवे तु उपादानत्वाद्यनुपपत्तिरिति वाच्यम्; काले सह सम्भववत् देशे अपि सहसम्भवाविरोधात्,

---

[37] रामरुद्री पृ सं ७४

[38] अद्वैतसिद्धिः पृ सं १४८

प्रागभावसत्वेन उपादानत्वाविरोधाच्च ॥ न चात्यन्ताभावाधिकरणे प्रागभावस्याप्यनुपपत्तिरिति वाच्यम्; काले व्यभिचारात् ॥ न च काले प्रागभावात्यन्ताभावयोः सामानाधिकरण्यमिदानीं घटात्यन्ताभाव इदानीं घटप्रागभाव इति प्रतीतिबलादङ्गीकृतम्, देशे तु तदुभयसामानाधिकरण्ये न किञ्चिदपि प्रमाणमिति वाच्यम् । मिथ्यात्वानुमितेः श्रुत्यादेश्च प्रमाणत्वात्" इति

सिद्धिकाराः वस्तुतः मिथ्यात्वलक्षणनिरूपणावसरे एनं नियमं स्वीकृत्य स्वसिद्धान्तं प्रतिपादितवन्तः । प्रकृते अहं सर्वमिदं सन्दर्भसहिततया नैयायिकप्रमेयस्य प्रकृतोपयोगित्वविमर्शं करोमि ।

विमतं मिथ्या दृश्यत्वात् शुक्तिरूप्यवत् इति रीत्या ग्रन्थकाराः जगतः मिथ्यात्वं साधयितुं प्रवृत्ताः । तदानीं साध्यभूतं मिथ्यात्वं पञ्चधा निरूपितम् । तत्र चतुर्थं मिथ्यात्वलक्षणं तावत् [39]स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं इति । अधुना समन्वयः क्रियते । यथा शुक्तिरूप्यस्य दृश्यत्वात् स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं तुल्यया रीत्या विमतस्यापि दृश्यत्वात् स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं वक्तव्यं , तस्मात् घटादिकं सकलं जगत् मिथ्या इति सिध्यति । परन्तु अत्र अनुमाने बाधदोषं पूर्वपक्षिणः आक्षिपन्ति । कथम् इति चेत् – संयोगेन घटस्य अधिकरणे भूतले संयोगसम्बन्धेन तस्य अत्यन्ताभावः भवितुं न अर्हति । अतः स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं घटादिषु नास्ति

इत्यतः बाधः दोषः। एवमेव समवायेन घटस्य अधिकरणे कपाले तस्य समवायेन अत्यन्ताभावः भवितुं कथं शक्यते । न भवितुं अर्हति । तस्मात् बाधदोषः तदवस्थः इति ज्ञायते । यदि समवायेन घटस्य अधिकरणे कपाले समवायसम्बन्धेन तस्य अत्यन्ताभावः अङ्गीक्रियते तर्हि घटं प्रति कपालस्य उपादानत्वं न स्यात् । परन्तु घटं प्रति कपालस्य उपादानत्वं भवत्येव । तस्मात् प्रतियोगिनः अधिकरणे तस्य अत्यन्ताभावस्य अङ्गीकारे अयं दोषस्तु भवत्येव । एवं पृष्टवतः पूर्वपक्षिणः मनसि अनुमाने बाधदोषः वर्तते इति ज्ञायते ।

तत्र सिद्धान्तिनः वदन्ति – काले अभावप्रतियोगिनोः कालिकसम्बन्धेन सह सम्भवः अर्थात् एकाधिकरणवृत्तित्वं सम्भवति । सर्वाधारः कालः इति प्रतीतिबलादेकाधिकरणवृत्तित्वं सम्भवति । यथा कालस्य सर्वाधारत्वं तद्वत् दिशः अपि सर्वाधारत्वं सम्भवति । तस्मात् पूर्वोक्तरीत्या समवायेन घटस्य अधिकरणे कपाले समवायेन घटात्यन्ताभावस्य सत्वे न कोपि विरोधः इति । तस्मात् बाधः अनुमाने नास्ति इति ज्ञायते । घटात्यन्ताभावस्य अधिकरणस्य कपालस्य घटोपादानत्वे घटात्यन्ताभाववतः तन्तोः अपि घटोपादानत्वप्रसङ्गः अतः कपालस्य कथं घटोपादानत्वमिति प्रश्नः उदेति । अत्र सिद्धिकाराः वदन्ति , यत्र तत्कार्यस्य प्रागभावः भवति तत् एव तस्य कार्यस्य उपादानं भवति इति । ध्वंसप्रागभावयोः स्वप्रतियोगिसमवायिकारणवृत्तित्वं स्वरूपसम्बन्धेन भवति इति प्रसिद्धः नियमः । तथा च प्रकृते घटप्रागभावः स्वरूपसम्बन्धेन स्वप्रतियोगिसमवायिकारणे कपाले भवति ।

तस्मात् घटाधिकरणे कपाले घटात्यन्ताभावस्य सत्वे अपि तत्र कपाले घटस्य प्रागभावस्य सत्वात् सः कपालघटोपादानं भवत्येव । तस्मात् सिद्धान्तिनां पक्षे न कोपि दोषः इति प्राप्यते।

अत्र पूर्वपक्षिणः पुनः आक्षिपन्ति – ध्वंसप्रागभावाधिकरणे अत्यन्ताभावः न अङ्गीक्रियते। तस्मात् सिद्धान्तिभिः तावत् घटात्यन्ताभावाधिकरणे कपाले घटप्रागभावं अङ्गीकृत्य कपालस्य घटोपादानत्वं कथ्यते । परन्तु पूर्वोक्तनियमानुसारेण तयोः विरोधात् अत्यन्ताभावाधिकरणे प्रागभावः भवितुं न अर्हति । तस्मात् प्रूर्वोक्तरीत्य् घटात्यन्ताभावस्य अधिकरणस्य कपालस्य घटोपादानत्वे घटात्यन्ताभाववतः तन्तोः अपि घटोपादानत्वप्रसङ्गः अतः कपालस्य कथं घटोपादानत्वमिति प्रश्नः तदवस्थः ।

अत्र सिद्धिकाराः उत्तरं कथयन्ति । काले व्यभिचारः भवति इत्यतः पूर्वोक्तः नियमः न अङ्गीक्रियते । काले कथं व्यभिचारः इति चेत् – प्रतियोग्यभावयोः यथा काले विरोधाभावात् एकाधिकरणवृत्तित्वं सम्भवति, तद्वत् काले अत्यन्ताभावेन सह प्रतियोगिनः इव प्रागभावस्य सत्वे किमपि बाधकं न भवति । अतः अत्यन्ताभावेन सह प्रागभावस्य विरोधः इति यदि उच्यते तर्हि काले व्यभिचारः भवति । तस्मात् पूर्वपक्षिणां युक्तौ कापि युक्तिः नास्ति इति ज्ञायते । पुनः पूर्वपक्षी शङ्कते काले कालिकाविशेषणतया प्रागभावात्यन्ताभावयोः सामानाधिकरण्यं प्रकृतमिथ्यात्वानुपयोगितया सिद्धमपि दैशिकविशेषणतया तदुभयसामानाधिकरण्ये प्रमाणं नास्ति इत्यतः मिथ्यात्वं न सिध्यति इति ।

अत्र सिद्धिकाराः कथयन्ति – अस्मिन् विषये मिथ्यात्वानुमितिः श्रुतायः च प्रमाणीभूताः। तथा च श्रुतिः –“[40]नेह नानास्ति किञ्चन”। एवञ्च तार्किकाणां अयं नियमः सिद्धिकारैः स्वीकृतः इति ज्ञायते ।

[40] बृहदारण्यकोपनोषत् ४/४/१९

उपाधिविचारः

जगतः मिथ्यात्वम् अद्वैतसिद्धिकारैः बहुभिः हेतुभिः दर्शितम् । तेषां हेतूनां दुष्टत्वं दर्शितं न्यायामृतकारैः। ये दृश्यत्वादयः हेतवः ते सोपाधिकाः इति न्यायामृतकारैः उक्तम् । तस्मात् दृश्यत्वादयः हेतवः मिथ्यात्वं साधयितुं न शक्नुवन्ति । नैयायिकैः अयं क्रमः आश्रीयते । यतो हि निग्रहस्थानेषु हेत्वाभासः अपि अन्यतमः। निग्रहस्थानानि वादि निग्रहार्थम् उपयुज्यन्ते । [41]वादिनः अपजयहेतुः निग्रहस्थानम् इति ग्रन्थेषु श्रूयते । निग्रहस्थानानि बहूनि सन्ति। तानि –

[42] प्रतिज्ञाहानिः, प्रतिज्ञान्तरं, प्रतिज्ञाविरोधः, प्रतिज्ञासन्यासः, हेत्वन्तरं, अर्थान्तरं, निरर्थकं, अविज्ञातार्थं, अपार्थकं, न्यूनं, अधिकं, पुनरुक्तं, अननुभाषणं, अज्ञानं, अप्रतिभा, विक्षेपः, मतानुज्ञा, पर्यनुयोज्योपेक्षणं, निरनुयोज्यानुयोगः, अपसिद्धान्तः, हेत्वाभासश्च इति।

वदिना यदि अनुमानप्रकारेण स्वकीयः सिद्धान्तः उच्यते, तदा प्रतिवादिना तेषु अनुमानषु हेत्वाभासः प्रदर्ष्यते । एवञ्च प्रकृते सिद्धान्तिना उक्तेषु अनुमानेषु पूर्वपक्षिभिः उपाधिदोषाः प्रदर्शिताः ।

जगतः मिथ्यात्वं साधयितुं चत्वारः हेतवः दर्शिताः ।

---

[41] तर्कसङ्ग्रहदीपिका पृ स १७८

[42] तर्कसङ्ग्रहदीपिका पृ स १८०

१. दृश्यत्वम्

तथा च अनुमानं विमतं मिथ्या द्रुश्यत्वात्।

२. जडत्वम्

तथा च अनुमानं विमतं मिथ्या जडत्वात्।

३. परिच्छिन्नत्वम्

तथा च अनुमानं विमतं मिथ्या परिच्छिन्नत्वात् ।

४. अंशित्वम्

तथा च अनुमानं विमतं मिथ्या अंशित्वात् ।

एवं हेतून् निरूप्य एतेषु हेतुषु सोपाधिकत्वं उच्यते ।

पूर्वपक्षिभिः प्रदर्शितोपाधिद्वयम्

1. **स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वं,**

2. **स्वबाधकाबाध्यप्रति निषेध्यत्वेन विषयत्वम्**

इति उपाधिद्वयं प्रदर्षितम् । यस्मात् कारणतः सिद्धान्तिनां हेतवः दुष्टः इति पूर्वपक्षिणाम् अभिप्रायः अतः तत्र दोषाः दर्षिताः । ततः अधुना प्रसङ्गात् सद्धेतु असद्धेतोः च विषये किञ्चित् चिन्त्यते । हेतवः द्विधाः, सद्धेतवः असद्धेतवः च इति । येन हेतुना पक्षे साध्यं

साधिते सति प्रमात्मिका अनुमितिः जायते सः सद्धेतुः इति उच्यते । त्रयः सद्धेतवः वर्तन्ते -

- **अन्वयव्यतिरेकि**

अन्वयव्याप्तिमत्वे सति व्यतिरेकव्याप्तिमत्वं अन्वयव्यतिरेकिलिङ्गस्य लक्षणम्

उदाहरणार्थम् – पर्वतः वह्निमान् धूमात् महानसवत् इति ।

- **केवलान्वयि**

व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्वं केवलान्वयिनः लक्षणम्।

उदाहरणम् – इदं वाच्यं ज्ञेयत्वात् घटवत् इति

- **केवलव्यतिरेकि च इति**

अन्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्वं केवलव्यतिरेकिणः लक्षणम् ।

उदाहरणम् – पृथिवी इतरेभ्यः भिध्यते गन्धवत्वात् जलवत् इति


एवञ्च एते त्रयः सद्धेतवः इति प्रसिद्धाः ।

असद्धेतवः पञ्च सन्ति। तानि -

- सव्यभिचारः
- विरुद्धः

- सत्प्रतिपक्षः
- असद्धः
- बाधितः इति

अधुना पञ्चहेत्वाभासाः के इति चित्ररूपेण पश्यामः ।




तर्कसङ्ग्रहादि ग्रन्थेषु पञ्चानाम् अपि हेत्वाभासानां विभागः दर्शितः वर्तते।तत्रापि द्वयोः हेत्वाभासयोः अर्थात् सव्यभिचारस्य असिद्धस्य च अवान्तरविभागः अपि वर्तते । तत्र प्रथमतः सव्यभिचारं सोदाहरणं पश्यामः ।

सव्यभिचारः त्रिविधः –

1. साधारणः ,

2. असाधारणः ,

3. अनुपसंहारि च



साधारणः – साध्याभाववद्वृत्तित्वं साधारणस्य लक्षणम्। उदाहरणम् – पर्वतः वह्निमान् प्रमेयत्वात् इति।


असाधारणः – सर्वसपक्षविपक्षव्यावृत्तत्वे सति पक्षमात्रवृत्तित्वम् असाधारणस्य लक्षणम्। उदाहरणम् – शब्दः नित्यः शब्दत्वात् इति।

अनुपसंहारी – [43]अन्वयव्यतिरेकदृष्टान्तरहितः अनुपसंहारी । उदाहरणम् – सर्वं अनित्यं प्रमेयत्वात् इति।

विरुद्धः – [44]साध्याभावव्याप्यः हेतुः विरुद्धः । उदाहरणम् – शब्दः नित्यः कार्यत्वात् घटवत्।

सत्प्रतिपक्षः – [45]यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते सः विरुद्धः । उदाहरणम् – शब्दः नित्यः श्रावणत्वात्, शब्दः अनित्यः कार्यत्वात् घटवत् ।

असिद्धः त्रिविधः – आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धः च इति ।



इदानीम् एकैकस्य उदाहरणं पश्यामः।

[43] तर्कसङ्ग्रः पृ स ११४

[44] तर्कसङ्ग्रः पृ स ११७

[45] तर्कसङ्ग्रः पृ स ११९

अश्रयासिद्धः – [46]पक्षतावच्छेदकाभाववान् पक्षः आश्रयासिद्धः इति उच्यते । उदाहरणम् – गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत् ।

स्वरूपासिद्धिः – हेत्वभाववान् पक्षः स्वरूपासिद्धः इति उच्यते । उदाहरणम् – शब्दः गुणः चाक्षुषत्वात् ।

व्याप्यत्वासिद्धः – सोपाधिकः हेतुः व्याप्यत्वासिद्धः इति उच्यते । एतस्य विषये अधुना विस्तरेण चिन्तनीयम् । यतो हि अद्वैतसिद्धिकाराः नैयायिकैः उक्तं प्रकारम् अनुसृत्य यत् पूर्वपक्षिभिः हेतुषु उपाधिदोषाः प्रदर्शिताः तत् निराकृतवन्तः । न्यायग्रन्थेषु अस्य विषये विस्तरेण उपपादनं वर्तते । तत् अधुना संक्षेपेण उपपादयामि । वस्तुतः उपाधिः हेतुषु व्यभिचारदोशान् उद्भावयति । [47]उपाधिः चतुर्विधः वर्तते ।

१. केवलसाध्यव्यापकः

२. पक्षधर्मावच्छिन्नसाध्यव्यापकः

३. उदासीनधर्मावच्छिन्नसाध्यव्यापकः

४. साधनावच्छिन्नसाध्यव्यापकः इति

केवलसाध्यव्यापकः –

---

[46] न्यायबोधिनी पृ स ११८

[47] तर्कसङ्ग्रहदीपिका पृ स १२२

केवलेन साध्येन सह व्यापकीभूतः यः उपाधिः सः केवलसाध्यव्यापकः उपाधिः भवति । उदाहरणम् – पर्वतः धूमवान् वह्निमत्वात् इति। अत्र पर्वतः पक्षः , धूमः साध्यं , वन्हिः इति हेतुः । अत्र उपाधिः आर्द्रेन्धनसंयोगः । साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधेः लक्षणम् । [48]साध्यव्यापकत्वं नाम साध्याधिकरणवृत्ति-अत्यन्ताभावाप्रतियोगित्वम् । साधनाधिकरणवृत्ति-अत्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वं नाम । प्रकृतोदाहरणे समन्वयं करोमि । साध्यं नाम धूमः तदधिकरणं नाम महानसः, तत्वृत्ति अत्यन्ताभावो नाम नहि आर्द्रेन्धनसंयोस्य अत्यन्ताभावः, परन्तु गजात्यन्ताभावः, तत्प्रतियोगि गजः, प्रतियोगित्वं गजे, तदप्रतियोगि आर्द्रेन्धनसंयोगः, तदप्रतियोगित्वं आर्द्रेन्धनसंयोगे, एवञ्च साध्याधिकरणात्यन्ताभावाप्रतियोगित्वं आर्द्रेन्धनसंयोगे आयातम् । एवमव साधनं वन्हिः , तदधिकरणम् अयोगोलकं, तद्वृत्ति अत्यन्ताभावो नाम आर्द्रेन्धनसंयोस्य अत्यन्ताभावः, तत्प्रतियोगि आर्द्रेन्धनसंयोगः तत्प्रतियोगोत्वम् आर्द्रेन्धनसंयोगे इत्यतः साधनाव्यापकत्वम् आर्द्रेन्धनसंयोगे आयातम् । तस्मात् सः उपाधिः । पूर्वोक्तप्रकारेण उपाधिः हेतुषु व्यभिचारदोशान् उद्भावयति । तत् कथम् इति प्रदर्श्यते । यः यत्साध्यव्यापकव्यभिचारी सः तत् व्यभिचारी इति नियमः वर्तते । तस्मात् प्रकृते वन्हिः धूमव्यापकार्द्रेन्धनसंयोगव्यभिचारी अतः वन्हिः धूमव्यभिचारी । अतः अत्र अनुमानप्रयोगः

---

[48] तर्कसङ्ग्रः पृ सं १२०

“[49] **वन्हिः धूमव्यभिचारी धूमव्यापकार्द्रेन्धनसंयोगव्यभिचरितत्वात्”** इति ।

अत्र वन्हेः धूमव्यापकार्द्रेन्धनसंयोगव्यभिचरितत्वं कथम् इति चेत् वन्हेः आर्द्रेन्धनसंयोगाभाववति वृत्तित्वम् । तस्मात् वन्हिः आर्द्रेन्धनसंयोगव्यभिचारी इति ज्ञायते । एवञ्च अनेन अनुमानेन इदं सिद्धं भवति यत् वन्हिः धूमव्यभिचारी इति । हेत्वाभाससामान्यलक्षणं किम् इति चेत् “अनुमितितत्करणान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वं इति । हेत्वाभाससामान्यलक्षणम् । प्रकृते अनुमितिः नाम पर्वतः धूमवान् इत्याकारकं, अनुमितितत्करणं नाम पूर्वपक्षव्याप्तिः तच्च धूमाभाववदवृत्तिवन्हिः इत्याकारकम् । तत्प्रतिबन्धकं यथार्थज्ञानं नाम तद्वत्ताबुद्धिं प्रति तदभाववत्ताज्ञानं प्रतिबन्धकम् इति मुद्रया धूमाभाववदवृत्तिवन्हिः इत्याकारकबुद्धिं प्रति धूमाभाववद् वृत्तिवन्हिः इति ज्ञानं प्रतिबन्धकम् । अनुमितिप्रतिबन्धकयथार्थज्ञानविषयः धूमाभाववद्वृत्तिवन्हिः इत्याकारकम् । अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं धूमाभाववद्वृत्तिवन्हौ । तस्मात् धूमाभाववद्वृत्तिवन्हिः इति दोषः । सः दोषः एकज्ञानविषयप्रकृतहेतुतावच्छेदकवत्वसंबन्धेन हेतौ वर्तते । एकं ज्ञानं नाम धूमाभाववद्वृत्तिवन्हिः वह्निश्च इत्याकारकं समूहालम्बनात्मकम् एकं ज्ञानम् । एकज्ञानविषयः यः हेतुः नाम वन्हिः , हेतुनिष्ठा हेतुता , एकज्ञानविषयप्रकृतहेतुतावच्छेदकं वह्नित्वम् , तद्वत्वसंबन्धेन इत्युक्ते

[49] न्यायबोधिनी पृ स १२१

एकज्ञानविषयप्रकृतहेतुतावच्छेदकवत्वसंबन्धेन धूमाभाववद्वृत्तिवन्हिः इति दोषः वन्हौ वर्तते । तस्मात् वन्हिः दुष्टः हेतुः।

२. पक्षधर्मावच्छिन्नसाध्यव्यापकः

अयं द्वितीयः उपाधिः । उदाहरणम् – वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् घटवत् इति । तथा घतस्य प्रत्यक्षस्पर्शाश्रयत्वात् प्रत्यक्षत्वं तुल्ययारीत्या वायोः अपि प्रत्यक्षस्पर्शाश्रयत्वात् प्रत्यक्षत्वं वक्तव्यम् । तस्मात् वायुः प्रत्यक्षः । अत्र वायुः पक्षः, प्रत्यक्षत्वं साध्यं , प्रत्यक्षस्पर्शाश्रयत्वं हेतुः, उद्भूतरूपवत्वम् उपाधिः । साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधेः लक्षणम् । [50]साध्यव्यापकत्वं नाम साध्याधिकरणवृत्ति-अत्यन्ताभावाप्रतियोगित्वम् । साधनाधिकरणवृत्ति-अत्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वं नाम । प्रकृतोदाहरणे समन्वयं करोमि । साध्यं नाम प्रत्यक्षत्वं, तदधिकरणं नाम घटः, तत्वृत्ति अत्यन्ताभावो नाम नहि उद्भूतरूपस्य अत्यन्ताभावः । परन्तु गजात्यन्ताभावः, तत्प्रतियोगि गजः, प्रतियोगित्वं गजे, तदप्रतियोगि उद्भूतरूपं , तदप्रतियोगित्वं उद्भूतरूपे । एवञ्च साध्याधिकरणात्यन्ताभावाप्रतियोगित्वं उद्भूतरूपे आयातम् । एवमेव साधनं प्रत्यक्षस्पर्शाश्रयत्वं , तदधिकरणं वायुः, तद्वृत्ति अत्यन्ताभावो नाम उद्भूतरपस्य अत्यन्ताभावः, तत्प्रतियोगि उद्भूतरूपं, तत्प्रतियोगोत्वम् उद्भूतरूपे इत्यतः साधनाव्यापकत्वम् उद्भूतरूपे आयातम् । तस्मात् सः उपाधिः । परन्तु रूपे

[50] तर्कसङ्ग्रः पृ सं १२०

प्रत्यक्षत्वस्य सत्वेपि उद्भूतरूपं नास्ति इत्यतः साध्यव्यापकत्वं नास्ति खलु इति प्रश्नः उदेति । अतः तत्र दोषस्य वारणार्थं पक्षधर्मावच्छिन्नसाध्यव्यापकः उपाधिः वक्तव्यः । तथा च प्रकृते पक्षधर्मः द्रव्यत्वम् । तस्मात् द्रव्यत्वे सति प्रत्यक्षत्वं यत्र तत्र उपाधिः इति समन्वयः कर्तव्यः । तस्मात् प्रकृते रूपे प्रत्यक्षस्य सत्वेऽपि द्रव्यत्वे सति प्रत्यक्षत्वं नास्ति । अतः दोषः नास्ति । एवमपि आत्मनि द्रव्यत्वे सति प्रत्यक्षत्वं वर्तते, परन्तु तत्र उपाधिः नास्ति अतः पुनः दोषः भवति । अतः प्रत्यक्षत्वे बहिरिन्द्रियजन्यत्वविशेषणं दत्तम् । तस्मात् यत्र द्रव्यत्वे सति बहिरिन्द्रियजन्यप्रत्यक्षत्वं तत्र उद्भूतरूपम् इति लभ्यते । इदानीं दोषः नास्ति । यतो हि आत्मनि द्रव्यत्वे सति प्रत्यक्षत्वस्य सत्वेऽपि द्रव्यत्वे सति बहिरिन्द्रियजन्यप्रत्यक्षत्वं नास्ति । तस्मात् अयं पक्षधर्मावच्छिन्नसाध्यव्यापकः उपाधिः ।

साधनावच्छिन्नसाध्यव्यापकः उपाधिः

उदाहरणम् – ध्वंसः विनाशी जन्यत्वात् इति ।

अत्र ध्वंसः इति पक्षः , विनाशः इति साध्यं, जन्यत्वम् इति हेतुः । अत्र भावत्वम् उपाधिः । साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधेः लक्षणम् । [51]साध्यव्यापकत्वं नाम साध्याधिकरणवृत्ति-अत्यन्ताभावाप्रतियोगित्वम् । साधनाधिकरणवृत्ति-अत्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वं नाम। प्रकृतोदाहरणे समन्वयं करोमि । साध्यं

[51] तर्कसङ्ग्रः पृ सं १२०

नाम विनाशः, तदधिकरणं नाम घटः, तत्वृत्ति अत्यन्ताभावो नाम नहि भावत्वस्य अत्यन्ताभावः परन्तु गजात्यन्ताभावः, तत्प्रतियोगि गजः, प्रतियोगित्वं गजे, तदप्रतियोगि भावत्वं , तदप्रतियोगित्वं भावत्वे , एवञ्च साध्याधिकरणात्यन्ताभावाप्रतियोगित्वं भावत्वे आयातम् । एवमेव साधनं जन्यत्वं , तदधिकरणं ध्वंसः, तद्वृत्ति अत्यन्ताभावो नाम भावत्वस्य अत्यन्ताभावः, तत्प्रतियोगि भावत्वं, तत्प्रतियोगोत्वं भावत्वे इत्यतः साधनाव्यापकत्वम् भावत्वे आयातम् । तस्मात् सः उपाधिः। परन्तु प्रागभावे विनाशस्य सत्वेऽपि भावत्वं नास्ति इत्यतः साध्यव्यापकत्वं नास्ति इति दोषः । अतः प्रकृते जन्यत्वावच्छिन्नविनाशव्यापकं भावत्वम् उपाधित्वेन विवक्षितम् इति उच्यते । तस्मात् प्रकृते प्रागभावे विनाशस्य सत्वेऽपि जन्यत्वविशिष्टविनाशः नास्ति अतः न दोषः । इत्थम् अयं साधनावच्छिन्नसाध्यव्यापकः उपाधिः ।

उदासीनधर्मावच्छिन्नसाध्यव्यापकः उपाधिः

[52]ध्वंसः विनाशी प्रमेयत्वात् इति उदाहरणम् । अत्र ध्वंसः पक्षः, विनाशः साध्यं, प्रमेयत्वम् इति हेतुः, भावत्वम् उपाधिः । साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधेः लक्षणम् । [53]साध्यव्यापकत्वं नाम साध्याधिकरणवृत्ति-अत्यन्ताभावाप्रतियोगित्वम् । साधनाधिकरणवृत्ति-अत्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वं नाम । प्रकृतोदाहरणे समन्वयं करोमि। साध्यं नाम विनाशः, तदधिकरणं नाम घटः, तत्वृत्ति अत्यन्ताभावो

---

[52] तर्कसङ्ग्रहदीपिका पृ सं १२३

[53] तर्कसङ्ग्रहः पृ सं १२०

नाम नहि भावत्वस्य अत्यन्ताभावः, परन्तु गजात्यन्ताभावः, तत्प्रतियोगि गजः, प्रतियोगित्वं गजे, तदप्रतियोगि भावत्वं, तदप्रतियोगित्वं भावत्वे, एवञ्च साध्याधिकरणात्यन्ताभावाप्रतियोगित्वं भावत्वे आयातम् । एवमेव साधनं प्रमेयत्वं, तदधिकरणं ध्वंसः, तद्वृत्ति अत्यन्ताभावो नाम भावत्वस्य अत्यन्ताभावः, तत्प्रतियोगि भावत्वं, तत्प्रतियोगोत्वं भावत्वे इत्यतः साधनाव्यापकत्वम् भावत्वे आयातम्। तस्मात् सः उपाधिः। परन्तु प्रागभावे विनाशस्य सत्वेऽपि भावत्वं नास्ति इत्यतः साध्यव्यापकत्वं नास्ति इति दोषः । अतः प्रकृते उदासीनधर्मावच्छिन्नसाध्यव्यापकः उपाधिः वक्तव्यः । प्रकृते जन्यत्वावच्छिन्नविनाशव्यापकं भावत्वम् उपाधित्वेन विवक्षितम् इति उच्यते । तस्मात् प्रकृते प्रागभावे विनाशस्य सत्वेऽपि जन्यत्वविशिष्टविनाशः नास्ति अतः न दोषः ।

तस्मात् अयं उदासीनधर्मावच्छिन्नसाध्यव्यापकः उपाधिः।

एतावता तर्कशास्त्रोक्तरीत्या उपाधीनां विस्तरेण उपपादनण् कृतम् ।

इदानिं पूर्वोक्तेषु अद्वैतसिद्धिपूर्वपक्षिभिः उक्तेषु उपाधिषु समन्वयः कर्तव्यः । तत्र प्रथमः उपाधिः स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वम् इति । प्रपञ्चः मिथ्या दृश्यत्वात् इति अनुमानं स्वीकुर्मः । अत्र उपाधौ पूर्वोक्तरीत्या उपाधिलक्षणसमन्वयः कर्तव्यः । अत्र प्रपञ्चः इति पक्षः, मिथ्यात्वम् इति साध्यं, दृश्यत्वम् इति हेतुः । साध्यव्यापकत्वे सति

साधनाव्यापकत्वम् उपाधेः लक्षणम्। [54]साध्यव्यापकत्वं नाम साध्याधिकरणवृत्ति-अत्यन्ताभावाप्रतियोगित्वम् । साधनाधिकरणवृत्ति-अत्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वं नाम । प्रकृतोदाहरणे समन्वयं करोमि । यत्र मिथ्यात्वं तत्र स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वम् अस्ति । स्वं शुक्तिरूप्यं, स्वबाधकाभिमतं ज्ञानं नाम नेदं रजतम् अथवा इयं शुक्तिः इति ज्ञानम् । स्वबाधकाभिमतेन अबाध्यः दोषः नाम काचकामलादिः दोषः । तादृशदोषप्रयुक्तभानं नाम तादृशदोषजन्यं ज्ञानम् इत्यर्थः । तच्च इदं रजतम् इत्याकारकम् । तादृशज्ञानविषयः रजतम् । तादृशज्ञानविषयत्वं रजते । एवञ्च स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानविषयत्वं शुक्तिरूप्ये वर्तते इति समन्वयः । तस्मात् उदाहरणान्तर्भावेण उपाधौ साध्यव्यापकत्वम् आयातम् । पक्षान्तर्भावेण साधनाव्यापकत्वम् अस्ति वा इति चिन्तनीयम् । पक्षे प्रपञ्चे दृश्यत्वम् अस्ति । परन्तु उपाधिः नास्ति । स्वं प्रपञ्चः , स्वबाधकत्वेन अभिमतं ज्ञानं नाम ब्रह्मसाक्षात्कारः, तेन अबाध्यः दोषः इति कोपि नास्ति । यतोहि सर्वं ब्रह्मसाक्षात्कारेण बाधितं भवति । अतः तेन अबाध्यः इति दोषः एव कोपि नास्ति । अतः स्वपदेन शुक्तिरूप्यं, स्वबाधकाभिमतं ज्ञानं नाम नेदं रजतम् अथवा इयं शुक्तिः इति ज्ञानम् । स्वबाधकाभिमतेन अबाध्यः दोषः नाम काचकामलादिः दोषः। तादृशदोषप्रयुक्तभानं नाम तादृशदोषजन्यं ज्ञानम् इत्यर्थः । तच्च इदं रजतम् इत्याकारकम् । तादृशज्ञानविषयः रजतम् । तादृशज्ञानविषयत्वं रजते । एवञ्च प्रपञ्चे उपाधिः नास्ति इत्यतः साधनाव्यापकत्वम्

---

[54] तर्कसङ्ग्रः पृ सं १२०

आयातम् इति ज्ञायते । पूर्वपक्षिणा माध्वेन शुक्तिरूप्यादेः अलीकत्वस्वीकारात् तत्बाधकं न स्वीक्रियते । अतः उपाधौ अभिमतपदम् उपात्तम् । स्वबाधकत्वेन सिद्धान्त्यभिमतमित्यर्थः । अद्वैतसिद्धिकारैः तु शुक्तिरूप्यादेः मिथ्यात्वम् अङ्गीक्रियते । अतः सिद्धान्तिनं प्रति अयम् उपाधिः वक्तुं शक्यते । अस्य उपाधेः दृश्यत्वादषु सर्वेषु हतुषु दोषोद्भावकत्वम् अस्ति ।

द्वितीयः उपाधिः –

स्वबाधकाबाध्यबाधकं प्रति निषेध्यत्वेन विषयत्वम् इति।

अस्य उपाधेः सिद्धान्तिनां जगत् मिथ्या दृश्यत्वात् शुक्तिरूप्यवत् इति अनुमाने समन्वयं करोमि । अत्र प्रपञ्चः इति पक्षः, मिथ्यात्वम् इति साध्यं, दृश्यत्वम् इति हेतुः । साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधेः लक्षणम्। [55]साध्यव्यापकत्वं नाम साध्याधिकरणवृत्ति-अत्यन्ताभावाप्रतियोगित्वम् । साधनाधिकरणवृत्ति-अत्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वं नाम । प्रकृतोदाहरणे समन्वयं करोमि । यत्र मिथ्यात्वं तत्र स्वबाधकाबाध्यबाधकं प्रति निषेध्यत्वेन विषयत्वम् अस्ति इति वक्तव्यम् । दृष्टान्तान्तर्भाविण साध्यव्यापकत्वम् उच्यते । शुक्तिरूप्ये मिथ्यात्वम् अस्ति । उपाधिः अपि अस्ति । स्वं शुक्तिरूप्यं , स्वबाधकं इयं शुक्तिः इति ज्ञानं, स्वबाधकेन अबाध्यं बाधकं नाम नेदं रजतम् इति ज्ञानम्, यतोहि इयं शुक्तिः इति ज्ञानेने नेदं रजतम् इति

[55] तर्कसङ्ग्रः पृ सं १२०

ज्ञानं न बाध्यते। एवञ्च स्वबाधकाबाध्यबाधकं प्रति निशेध्यत्वेन विषयत्वं शुक्तिरूप्यस्य वर्तते । तस्मात् उपाधिः शुक्तिरूप्ये अस्ति । तस्मात् साध्योपाध्योः दृष्टान्ते सत्वात् तदन्तर्भाविण उपाधौ साध्यव्यापकत्वम् आयातम् ।

पक्षान्तर्भाविण साधनाव्यापकत्वं वर्तते । पक्षे जगति दृश्यत्वरूपः हेतुः अस्ति । परन्तु उपाधिः नास्ति । कुतः इति चेत् स्वं जगत्, स्वबाधकं ब्रह्मसाक्षात्कारः, तेन अबाध्यं बाधकं यदि स्वम् एव तर्हि तत्र निषेध्यत्वेन विषयत्वं जगतः नास्ति। तस्मात् स्वपदेन शुक्तिरूप्यमेव ग्राह्यं न तु जगत्, तस्मात् पक्षे उपाधिः नास्ति इति कृत्वा पक्षान्तर्भाविण साधनाव्यापकत्वम् आयातम् । तस्मात् स्वबाधकाबाध्यबाधकं प्रति निषेध्यत्वेन विषयत्वम् इत्यस्य उपाधित्वं सङ्गच्छते ।

इदानीम् उदयनाचार्यैः उक्तप्रकारेण उपाधौ विशेषणानि उच्यन्ते।

तत्र विशेषणत्रयं दत्तम् –

१. उपाधौ विपक्षव्यावृत्तत्वम् अपेक्षितम्

२. उपाधौ समव्याप्तत्वम् अपेक्षितम्।

३. उपाधौ व्यतिरेकव्याप्तिमत्वम् अपेक्षितम्।

अधुना पर्वतः धूमवान् वह्निमत्वात् इत्यस्मिन् उदाहरणे समन्वयं करोमि । अत्र आर्द्रेन्धनसंयोगः उपाधिः । धूमाभाववति ह्रदे आर्द्रेन्धनसंयोगः नास्ति इत्यतः आर्द्रेन्धनसंयोगे विपक्षावृत्तित्वम् अस्ति । यस्मात् आर्द्रेन्धनसंयोगे विपक्षावृत्तित्वम् अस्ति

। अतः एव तत्र समव्याप्तत्वम् अपि अस्ति । समव्याप्तत्वं नाम साध्यव्यापकत्वे सति साध्यव्याप्यत्वम् । अर्थात् साध्याधिकरणवृत्ति अत्यन्ताभावाप्रतियोगित्वे सति साध्याभाववदवृत्तित्वम् । प्रकृते साध्यं धूमः, तदधिकरणं महानसादिः, तत्वृत्ति अत्यन्ताभावो नाम न हि आर्ध्रेन्धनसंयोगस्य अत्यन्ताभावः, परन्तु गजात्यन्ताभावः, तत्प्रतियोगि गजः, तत्प्रतियोगित्वं गजे, तदप्रतियोगि आर्ध्रेन्धनसंयोगः, तदप्रतियोगित्वम् आर्ध्रेन्धनसंयोगे, एवञ्च साध्यव्यापकत्वम् आर्ध्रेन्धनसंयोगे आयातम् । एवमेव साध्यव्याप्यत्वम् अपि अस्ति इति दर्शनीयम् । साध्यं धूमः, साध्याभावो नाम धूमाभावः, साध्याभाववान् ह्रदः, तद्वृत्तिः मीनशैवालादिः, तद्वृत्तित्वं मीनशैवालादिषु, तदवृत्तिः आर्ध्रेन्धनसंयोगः, तदवृत्तित्वम् आर्ध्रेन्धनसंयोगे । अतः आर्द्रेन्धनसंयोगे साध्यव्याप्यत्वम् आयातम् । तस्मात् साध्यव्याप्यते सति व्यापकत्वम् आर्ध्रेन्धनसंयोगे अस्ति इत्यतः आर्ध्रेन्धनसंयोगे समव्याप्तिरस्ति इत्यर्थः । तार्किकशोरोमणि-उदयनाचार्यैः एवं किमर्थम् उक्तम् इति चिन्तनीयम् । वस्तुतः पक्षेतरत्वस्य उपाधित्ववारणार्थम् उदतनाचार्यैः एवमुक्तम् । पक्षेतरत्वस्य उपाधित्वे कः दोषः इति चेत् तस्य उपाधित्वे सद्धेतोः दुष्टत्वापत्तिः । तथा सति अनुमानमात्रस्य उच्छेदापत्तिः स्यात् । पक्षेतरत्वस्य उपाधित्वं कथम् इति उपपादयामि ।

पर्वतः वह्निमान् धूमात् इत्यत्र पक्षेतरत्वम् उपाधिः । अत्र पर्वतः इति पक्षः , वन्हिः इति साध्यः, पक्षेतरत्वम् इति उपाधिः । साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधेः

लक्षणम् । [56]साध्यव्यापकत्वं नाम साध्याधिकरणवृत्ति-अत्यन्ताभावाप्रतियोगित्वम् । साधनाधिकरणवृत्ति-अत्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वं नाम । प्रकृतोदाहरणे समन्वयं करोमि । साध्यं नाम वन्हिः, तदधिकरणं नाम महानसः, तत्वृत्ति अत्यन्ताभावो नाम नहि पक्षेतरत्वस्य अत्यन्ताभावः, परन्तु गजात्यन्ताभावः । यतोः पक्षेतरत्वं नाम पक्षभिन्नत्वम् इत्यर्थः । पक्षभिन्नत्वं तावत् महानसे तु अस्त्येव । अतः तत्प्रतियोगि गजः, प्रतियोगित्वं गजे, तदप्रतियोगि पक्षेतरत्वं , तदप्रतियोगित्वं पक्षेतरत्वे , एवञ्च साध्याधिकरणात्यन्ताभावाप्रतियोगित्वं पक्षेतरत्वे आयातम् ।

एवमेव साधनं धूमः , तदधिकरणं पर्वतः, तद्वृत्ति अत्यन्ताभावो नाम पक्षेतरत्वस्य अत्यन्ताभावः। यतो हि पर्वतः पक्षः इत्यतः तत्र पक्षेतरत्वं भवितुं न अर्हति । स्वस्मिन् स्वभेदः नास्ति इति नियमः वर्तते । अतः तत्प्रतियोगि पक्षेतरत्वं, तत्प्रतियोगोत्वं पक्षेतरत्वे इत्यतः साधनाव्यापकत्वम् पक्षेतरत्वे आयातम् । तस्मात् सः उपाधिः। तथा च पक्षेतरत्वस्य उपाधित्वं प्राप्तम् इत्यतः सदनुमानेषु सर्वत्र अस्य उपाधित्वेन प्रदर्शनं कर्तुं शक्यते इत्यतः महान् दोषः एव आपद्येत । तस्मात् अचार्यैः उपाधौ विपक्षव्यावृत्तत्वे सति समव्याप्तत्वविशेषणं दत्तम् । एवञ्च इदानीं दोषः न भवति । यतो हि पक्षेतरत्वे विपक्षव्यावृत्तत्वं नास्ति । कथम् इति चेत् वन्हेः अभाववति ह्रदे पक्षेतरत्वं अस्ति । अतः पक्षेतरत्वे विपक्षव्यावृत्तत्वं नास्ति । यस्मात् पक्षेतरत्वे विपक्षव्यावृत्तत्वं नास्ति ,

[56] तर्कसङ्ग्रः पृ सं १२०

तस्मात् कारणात् तत्र समव्याप्तत्वम् अपि नास्ति । समव्याप्तत्वं नाम साध्यव्यापकत्वे सति साध्यव्याप्यत्वम् । अर्थात् साध्याधिकरणवृत्ति अत्यन्ताभावाप्रतियोगित्वे सति साध्याभाववदवृत्तित्वम् । प्रकृते साध्यं वन्हिः, तदधिकरणं महानसादिः, तत्वृत्ति अत्यन्ताभावो नाम न हि पक्षेतरत्वस्य अत्यन्ताभावः , यतो हि महानसादिः पक्षभिन्नः इत्यतः तत्र पक्षेतरत्वम् अस्त्येव । अतः तत्र वर्तमानः अत्यन्ताभावः गजात्यन्ताभावः, तत्प्रतियोगि गजः, तत्प्रतियोगित्वं गजे , तदप्रतियोगि पक्षेतरत्वं , तदप्रतियोगित्वम् पक्षेतरत्वे, एवञ्च साध्यव्यापकत्वम् पक्षेतरत्वे आयातम् । एवमेव साध्यव्याप्यत्वम् अपि अस्ति इति दर्शनीयम् । साध्यं वन्हिः, साध्याभावो नाम वन्हेः अभावः, साध्याभाववान् ह्रदः, तद्वृत्ति पक्षेतरत्वं, तद्वृत्तित्वं पक्षेतरत्वे । एवञ्च पक्षेतरत्वे साध्यव्यापकत्वस्य सत्वेपि साध्यव्याप्यत्वं नास्तीत्यतः साध्यसमव्याप्यत्वं नास्ति इति ज्ञायते । अतः पक्षेतरत्वस्य उपाधित्वव्यावर्तनाय उदयनाचार्यैः उच्यते उपाधिः विपक्षव्यावृत्तः साध्यसमव्याप्तः च भवेत् इति । इदानीं पक्षेतरत्वे विपक्षव्यावृत्तत्वे सति साध्यसमव्याप्तत्वं नास्तीत्यतः उपाधित्वम् एव नास्ति। अतः सः कुत्रापि उपाधित्वेन उद्भावयितुं न शक्यते। एवञ्च अनेन इदं स्पष्टतया ज्ञायते यत् अद्वैतसिद्धौ उद्भावितः अयं पूर्वपक्षः न्यायमतम् अनुसृत्य वर्तते। व्यतिरेकव्याप्तिमत्वम् अपि अपेक्षितम् इति अद्वैतसिद्धिकारैः प्रदर्शितम् । अत्र एकः नियमः स्मर्तव्यः “ययोः व्याप्यवृत्तिव्यतिरेकिणोः अन्वयव्याप्तिः तयोः एव व्यतिरेकव्याप्तिः” इति । व्यतिरेकव्याप्तेः लक्षणं तु “तदभावव्यापकीभूताभावप्रतियोगित्वम्” इति । वस्तुतः साध्यस्य उपाधेः च मध्ये व्यतिरेकव्याप्तिमत्वम् अपेक्षितम् इति अभिप्रायः । यदा उपाधेः

विपक्षव्यावृत्तत्वम् अपेक्षितम् इति उक्तम्, तावता एव उपाधौ साध्यसमव्याप्तत्वं, व्यतिरेकव्याप्तिमत्वं च लभ्यते एव । इदानीम् उपाधौ पर्वतः धूमवान् वह्निमत्वात् इत्यत्र व्यतिरेकव्याप्तिलक्षणस्य समन्वयं करोमि । तत् नाम धूमः तदभावो नाम धूमाभावः, तदभावव्यापकीभूताभावो नाम आर्द्रेन्धनसंयोगस्य अभावः , यतो हि यत्र धूमाभावः वर्तते तत्र आर्द्रेन्धनसंयोगस्य अपि अभावः भवत्येव । तस्मात् आर्द्रेन्धनसंयोगे धूमाभावव्यापकीभूताभावप्रतियोगत्वम् आयातम् । अतः धूमार्द्रेन्धनसंयोगयोः व्यतिरेकव्याप्तिः अस्ति इति ।

पूर्वोक्तनियमघटकीभूतधर्मिणि विशेषणद्वयं वर्तते । व्याप्यवृत्तित्वं व्यतिरेकित्वश्च इति । तयोः सार्थक्यं चिन्तनीयम् । यदि केवलं ययोः अन्वये व्याप्तिः तयोः व्यतिरेकव्याप्तिः इति यदि नियमः, तर्हि केवलान्वयिस्थले अस्य नियमस्य व्यभिचारः। कुतः इति चेत् इदं वाच्यं ज्ञेयत्वात् इत्यत्र वाच्यत्वज्ञेयत्वयोः अन्वयव्याप्तिः अस्ति, परन्तु तयोः व्यतिरेकव्याप्तिः नास्ति । अतः नियमः एवम् परिष्क्रियते ययोः व्यतिरेकिणोः अन्वयव्याप्तिः तयोः व्यतिरेकव्याप्तिः इति । एवं परिष्कारे कृते सति न दोषः यतो हि वाच्यत्वज्ञेयत्वयोः व्यतिरेकित्वं नास्ति । एवं नियमे कृतेऽपि वृक्षः कपिसंयोगी एतत् वृक्षत्वात् इत्यत्र दोषः भवति । यतो हि कपिसंयोगाभावएतत्वृक्षत्वयोः अयं नियमः न अन्वेति । यतो हि कपिसंयोगाभवएतद्वृक्षत्वयोः व्यतिरेकित्वं वर्तते । परन्तु व्यतिरेकव्याप्तिः नास्ति । अर्थात् एतत् वृक्षत्वे तदभावव्यापकीभूताभावप्रतियोगित्वं नास्ति । तत् कपिसंयोगः तदभावो नाम कपिसंयोगाभावः तदभावव्यापकीभूताभावो नाम

एतत् वृक्षत्वाभावो न भवति । यतो ह् कपिसंयोगाभावः केवलान्वयी । सः कपिसंयोगवति वृक्षेऽपि अस्ति । परन्तु एतत्वृक्षत्वाभावः एतत् वृक्षे नास्ति । तस्मात् कपिसंयोगाभावव्यापकत्वं एतत्वृक्षत्वाभावे नास्ति । अतः अनयोः व्यतिरेकित्वे सति अन्वयव्याप्तिमत्वस्य सत्वेऽपि व्यतिरेकव्याप्तिः नास्ति । तस्मात् नियमस्य अत्र व्यभिचारः भवति । अतः नियमः परिष्क्रियते “ [57]ययोः व्याप्यवृत्तिव्यतिरेकिणोः अन्वयव्याप्तिः तयोः व्यतिर्रेकव्याप्तिः” इति । इदानीं दोषः नास्ति । यतो हि कपिसंयिगस्य व्याप्यवृत्तित्वं नास्ति । अतः न कोऽपि दोषः। परन्तु पक्षेतरत्वे व्यतिरेकव्याप्तिमत्वं नास्ति । यतो हि तदभावव्यापकीभूताभावप्रतियोगित्वं व्यतिरेकव्याप्तिः नाम। पर्वतः वह्निमान् धूमात् इत्यत्र पश्यामः। तत् वन्हिः, तदभावो नाम वन्हेः अभावः, तदभावव्यापकीभूताभावः नाम पक्षेतरत्वाभावः न भवति। कुत इति चेत् वन्हेः अभावः ह्रदे अस्ति, परन्तु तत्र पक्षेतरत्वम् एव अस्ति न तु पक्षेतरत्वाभावः। अतः पक्षेतरत्वे तदभावव्यापकीभूताभावप्रतियोगित्वरूपा व्यतिरेकव्याप्तिमत्वं नास्ति। अतः उदयनाचार्यैः पक्षेतरत्वव्यावर्तनाय एव उपाधिः एतादृशः भवेत् इति नियमनम् कृतम्। एतादृशन्यायमतानुसारेण एव अद्वैतसिद्धौ पूर्वपक्षः उत्थापितः।

तथा च सिद्धिकाराः एवं लिखन्ति

[57] अद्वैतसिद्धिः बालबोधिनिव्याख्यानं पृ सं २६४

"ननु [58]दृश्यत्वादिहेतवः सोपाधिकाः। तथा हि – स्वबाधकाभमताबाध्यदोषप्रयुक्तभानत्वं, स्वबाधकाबाध्यबाधकं प्रति निषेध्यत्वेन विषयत्वं वा विपक्षाद्व्यावृत्तं समव्याप्तम्, अत एव व्यतिरेकव्याप्तिमदुपाधिः- इति चेत्?" ।

अधुना ग्रन्थे पूर्वपक्षिभिः प्रदर्शिते उपाधिद्वये एतेषां विशेषणानां समन्वयं पश्यामः।

प्रथमः उपाधिः - " स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वम्" इति। मिथ्यात्वाभाववति ब्रह्मणि स्वबाधकाभिमताबाध्यदोषप्रयुक्तभावत्वं नास्ति । यतो हि पूर्वोक्तप्रकारेण स्व पदेन ब्रह्म स्वीक्रियत चेत् तत् बाधकत्वेन अभिमतं ज्ञानं किमपि नास्त्येव । अतः उपाधिः तत्र नास्ति इत्यतः प्रकृतोपाधौ विपक्षाद्व्यावृत्तत्वम् आयातम् । यस्मात् विपक्षात् व्यावृत्तत्वम् अस्ति तस्मात् एव समव्याप्तत्वम् अपि अस्ति इति ज्ञायते । समव्याप्तत्वं नाम साध्यव्यापकत्वे सति साध्यव्याप्यत्वम् । अर्थात् साध्याधिकरणवृत्ति अत्यन्ताभावाप्रतियोगित्वे सति साध्याभाववदवृत्तित्वम् । साध्यं मिथ्या साध्याधिकरणं शुक्तिरूप्यं तद्वृत्यत्यन्ताभावो नाम नहि स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वात्यन्ताभावः यतो हि शुक्तिरूप्ये स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वम् वर्तते । तस्मात् उदासीनपदार्थात्यन्ताभावः तत् प्रतियोगि उदासीनः पदार्थः । तत् प्रतियोगित्वम् उदासीनपदार्थे तदप्रतियोगि स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वं, तदप्रतियोगित्वं स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वे । एवञ्च साध्यव्यापकत्वम् उपाधौ आयातम् ।

---

[58] अद्वैतसिद्धिः बालबोधिनिव्याख्यानसहितं प्रु सं २६३

साध्यं मिथ्यात्वं ,साध्याभावो नाम मिथ्यात्वाभावः, साध्याभाववान् ब्रह्म , तत् वृत्तित्वाभावः दृश्यत्वे वर्तते इति साध्यव्याप्यत्वस्य उपाधौ समन्वयः जातः । एवञ्च साध्यसमव्याप्यत्वं उपाधौ अस्ति इति ज्ञायते। उपाधौ व्यतिरेकव्याप्तिमत्वम् अपि अस्ति इति लभ्यते । अर्थात् साध्याभावव्यापकीभूताभावप्रतियोगित्वम् उपाधौ अस्ति । यत्र मिथ्यात्वाभावः अस्ति ब्रह्मणि तत्र स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वाभावः अस्ति। तस्मात् उपाधौ साध्याभावव्यापकीभूताभावप्रतियोगित्वम् अस्ति। इत्थम् उदयनाचार्यैः उक्तप्रकारेण अत्र पूर्वपक्षः प्रदर्शितः। ततः परं सिद्धिकारैः सिद्धान्तः उक्तः – "[59]ब्रह्म**ज्ञानमात्रबाध्ये देहात्मैक्ये मिथ्याभूत साध्याव्यापकत्वात्, पर्वतावयव**वृत्त्यन्य**त्वादवत् साधनवत्पक्षमात्रव्यावर्तकविशेषणवत्वेन पक्षेतरतुल्यत्वाच्च"।**

अत्र सिद्धिकारैः सिद्धान्तकथनावसरे पूर्वपक्षिभिः प्रदर्शितोपाधिद्वयस्य पक्षेतरत्वतुल्यत्वम् उक्तम्। ततः प्राक् उपाधौ साध्याव्यापकत्वम् अस्ति इति उक्तम्। कथम् इति चेत् देहात्मैक्यस्य मिथ्यात्वम् अस्ति। परन्तु तत्र उपाधिः नास्ति। यतो हि देहात्मैक्यं ब्रह्मज्ञानेन केवलं बाध्यते। तस्मात् स्व पदेन देहात्मैक्यं स्वीक्रियते चेत् स्वबाधकाभिमतं ब्रह्मसाक्षात्कारः, तेन अबाध्यः दोषः नास्ति इत्यतः देहात्मैक्यान्तभावेण साध्यव्यापकत्वं नास्ति इति उक्तम् । एवमेव द्वितीयोपाधौ अपि साध्यव्यापकत्वं नास्ति। देहात्मैक्ये मिथ्यात्वम् अस्ति। परन्तु द्वितीयोपाधिः नास्ति। स्वं देहात्मैक्यं, स्वबाधकं

---

[59] अद्वैतसिद्धिः बालबोधिनिव्याख्यानसहितं पृ सं २६४ ,२६५

ब्रह्मसाक्षात्कारः, परन्तु तेन अबाध्यं बाधकं किमपि नास्ति । अतः द्वितीयोपाधिः अपि साध्यव्यापकः न भवति। एवञ्च पूर्वपक्षिभिः प्रदर्शितोपाधिद्वयेऽपि लक्षणसमन्वयः नभवतीत्यतः तयोः उपाधित्वं नास्ति। अतः दृश्यत्वादि हतुभिः मिथ्यात्वं साधयितुं शक्यते इति आशयः।

अपरः अपि दोषः उद्भाव्यते । अयं उपाधिः पूर्वपक्षिभिः उद्भावितः सः पर्वतावयववृत्त्यन्यत्ववत् पक्षेतरतुल्यः । अत्र किञ्चित् उच्यते – उपाधौ साध्यसमव्याप्यत्वम् आवश्यकं येन पक्षेतरत्वस्य उपाधित्वं वारयितुं शक्यते । तस्मिन् साध्यसमव्याप्यत्वाभावात् इति । परन्तु इदं प्राचीनमतानुसारेण, नवीननैयायिकैः तावत् उपधौ साध्यसमव्याप्यत्वं देयम् इति न उच्यते । तर्हि पक्षेतरत्वस्य सर्वत्र उपाधित्वसंभवेन अनुमानमारोच्छेदापत्तिः इति न वक्तव्यम् । यतो हि नैयायिकैः उच्यते पक्षेतरत्वस्य कथायाम् उपाधित्वेन उद्भावनं न कर्तव्यम् इति।

तदुक्तं मुक्तावल्याम् –

“[60]**पक्षेतरस्तु सन्दिग्धोपाधिरपि नोद्भावनीयः, कथकसम्प्रदायानुरोदात्”**

अतः इदं ज्ञायते सम्प्रदायानुसारेण पक्षेतरत्वस्य उपाधित्वेन उद्भावनं न कर्तव्यम् इति । यथा पर्वतावयववृत्ति अन्यत्वस्य पक्षेतरत्वतुल्यत्वम् एवमेव प्रकृतोपाधेः अपि । पर्वतः वह्निमान् धूमाद् इत्यत्र पर्वतावयववृत्त्यन्यत्वस्य उपाधित्वं सम्भवति । यत्र वन्हिः

---

[60] मुक्तावली पृ स ४६५

महानसादिषु तत्र पर्वतावयववृत्त्यन्वत्वम् अस्ति । यतो हि महानसः पर्वतावयवे नास्ति । अतः महानसः पर्वतावयववृत्त्यन्यः। अतः उपाधौ साध्यव्यापकत्वम् आयातम् । यत्र धमः पर्वते तत्र पर्वतावयववृत्त्यन्यत्वं नास्ति । यतो हि पर्वतः स्वावयवे समवायेन वर्तते एव । अतः साध्यव्यापकत्वे सति साधनाव्यापकत्वात् पर्वतावयववृत्त्यन्यत्वम् उपाधिः ।

अस्य उपाधेः पक्षेतरत्वतुल्यत्वं कथम् इति चेत् – पक्षेतरत्वम् इति अनुक्त्वा केवलम् इतरत्वम् इति मात्रं यदि उच्यते तर्हि इतरत्वस्य उपाधित्वं न स्यात्। यतो हि यत्र वन्हिः महानसादिषु तत्र इतरत्वम् अस्ति, अतः साध्यव्यापकत्वं लभ्यते। परन्तु यत्र धूमः पर्वते तत्र यत्किञ्चित् निरूपित इतरत्वस्य सत्वात् उपाधौ साधनव्यापकत्वम् अपि स्यात् । अतः इदं वारयितुम् इतरत्वे पक्षविशेषणं दत्तम्। एवञ्चेत् उपाधौ साधनाव्यापकत्वं लभते। अतः पक्षेतरत्वे पक्षमात्रव्यावर्तकविशेषणवत्वम् अस्ति। एवमेव पर्वतावयववृत्त्यन्यत्वम् इत्यत्रापि अन्यत्वम् इति मात्रोक्तं चेत् साधनव्यापकत्वमेव लभ्यते। अतः पर्वतावयववृत्तित्वविशेषणं दत्तम्। अतः अत्रापि पक्षेतरत्ववत् पर्वतावयववृत्त्यन्यत्वेऽपि पक्षमात्रव्यावर्तकविशेषणवत्वम् अस्ति। परन्तु पक्षमात्रव्यावर्तकविशेषणवत्वं नास्ति, परन्तु साधनवत् पक्षमात्रव्यावर्तकविशेषणवत्वम् अस्ति। कुत इति चेत् पर्वतावयववृत्तिः यथा पर्वतः तद्वत् तदीयरूपमपि। अतः तद्व्यावर्तकत्वम् अपि अस्ति खलु इत्यतः पक्षमात्रव्यावर्तकत्वं नास्ति। अतः साधनवत्पक्षमात्रव्यावर्तकत्वं वक्तव्यम्। इदानीं पर्वतावयववृत्तिरूपे साधनं नास्ति इत्यतः साधनवत्पक्षमात्रव्यावर्तकत्वं पर्वतावयववृत्त्यन्यत्वे वर्तते इत्यतः न कोऽपि दोषः। ।

तुल्यया रीत्या प्रकृते उपाधिद्वयेऽपि पक्षमात्रव्यावर्तकविशेषणवत्वम् अस्ति। कथम् इति चेत् दोषप्रयुक्तभानत्वम् इति मात्रोक्तौ तत्र साध्यव्यापकत्वं लभ्यते।

एवमेव साधनव्यापकत्वम् अपि लभ्यते। यतो हि दोषप्रयुक्तभानत्वरूपोपाधिः पक्षेऽपि अस्ति। अतः साधनव्यापकत्वम् आयातम् इति उक्तम्। स्वबाधकाभिमताबाध्यत्वविशेषणे दत्ते तु पूर्वोक्तरीत्या स्वपदेन जगत् स्वीकर्तुम् एव न शक्यते इत्यतः साधनवत्पक्षमात्रव्यावर्तकविशेषणवत्वम् प्रकृतोपाधौ आयातम्। एवमेव द्वितीयोपाधौ अपि चिन्तनीयम्। तत्रापि यदि निषेध्यत्वेन विषयत्वम् इति मात्रं यदि उच्यते तर्हि पक्षेऽपि निषेध्यत्वेन विषयत्वम् अस्ति। अतः स्वबाधकाबाध्यबाधकं प्रति इति विशेषणं दत्तम्। तस्मात् द्वितीयोपाधौ अपि साधनवत्पक्षमात्रव्यावर्तकविशेषणवत्वम् अस्ति। अतः पूर्वपक्षिभिः दर्शितोपाधिद्वयस्यापि पक्षेतरतुल्यत्वम् अस्ति इति प्राप्तम्। यस्मात् कारणात् एतदुपाधिद्वयस्य अपि पक्षेतरत्वतल्यतं आयातं तस्मात् वादकथायां न उद्भावनीयम् इति लभ्यते। अतः पूर्वपक्षिभिः प्रदर्शितोपाधिद्वयस्य हेतुषु दुष्टत्वापादकत्वं नास्ति । तस्मात् दृष्यत्वादि हेतुभिः प्रपञ्चे मथ्यात्वं साधयितुं शक्यते। वस्तुतः अत्रापि अद्वैतसिद्धिकारैः नैयायिकमतम् अनुसृत्य एव पूर्वपक्षः सिद्धान्तः अपि प्रदर्शितः ।

“[61] **न च बाधोन्नीतत्वात् सोऽप्युपाधिः, बाधस्याग्रे निरसिष्यमाणत्वात्। अपि च यद्यतिरेकस्य साध्यव्यतिरेकसाधकत्वं तस्यैव साध्यव्यापकत्वम् । इतरांशे**

---

[61] अद्वैतसिद्धिः बालबोधिनिव्याख्यानसहितं पृ सं २६६,२६७

अनुकूलतर्काप्रसरात् । तथा च ‘ क्षित्यादिकम्, न कर्तृजन्यम्, शरीराजन्यत्वाद्दित्यत्र यथा शरीरविशेषणवैय्यर्थ्यात् न शरीरजन्यत्वं कर्तृजन्यत्वव्यापकम् । ‘एवं वियदादिकं न मिथ्या, स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वरहितत्वात् ’ इति साध्यव्यतिरेकसाधने स्वबाधकाभिमताबाध्यभागस्य वैयर्थ्यात्स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वं न मिथ्यात्वव्यापकम्। दोषप्रयुक्तभानत्वं तु भवति साध्यव्यापकम्, तच्च साधनव्यापकमपीति नोपाधिः। दृश्यत्वादना एव मिथ्यात्ववत् तस्यापि साधनात्।

अत्र ग्रन्थभागे न्यायमतम् अनसृत्य एव सिद्धिकारैः उपपादनं कृतम् । अत्र पूर्वपक्षिभिः एकः प्रश्नः क्रीयते – बाधोन्नीतपक्षेतरत्वस्य तावत् उपाधित्वं संभवत्येव । इदं तार्किकैः अपि अङ्गिक्रीयते। तथा हि बाधनिश्चयः नाम पक्षे साध्याभावस्य निश्चयः। यदि पक्षे साध्याभावस्य निश्चयः वर्तते तर्हि पक्षे उपाधिः अपि नास्ति इति कृत्वा उपाधौ साध्यव्यापकत्वम् आयाति। यदि पक्षे साध्यनिश्चयः नास्ति । तर्हि उपाधौ साध्यव्यापकत्वनिश्चयः कर्तुं न शक्यते। अतः सः सन्दिग्धोपाधिः इति उच्यते । सन्दिग्धस्य तस्य उपाधित्वं नास्ति। परन्तु बाधोन्नीतस्य पक्षेतरत्वस्य उपाधित्वे बाधकं नास्ति। अतः इदम् आधारीकृत्य पूर्वपक्षिणः कथयन्ति। पक्षे मिथ्यात्वस्य अभावः तावत् निश्चितम्। अतः पूर्वपक्षिभिः प्रदर्शितोपाधिद्वयं तावत् बाधोन्नीतम् । तस्मात् यथा बाधोन्नीतपक्षेतरत्वस्य उपाधित्वं स्वीक्रियते तद्वत् पूर्वपक्षिभिः प्रदर्शितोपाधिद्वयम् अपि अनुमाने उपाधित्वेन प्रदर्शयितुं शक्यते इति आशयः । अतः एनं पूर्वपक्षं सिद्धान्तिनः निराकुर्वन्ति । यतो हि यदि पक्षे साध्याभावस्य निश्चयः स्यात् तर्हि अयम् उपाधिः

बाधोन्नीतः इति वक्तुं शक्यते । परन्तु जगति मिथ्यात्वाभावः तावत् अग्रे निराक्रियते । तस्मात् अयम् बाधोन्नीतः उपाधिः न । परन्तु अत्र उपाधौ साध्यसंदेहः वर्तते इत्यतः सन्दिग्धोपाधिरयम् । तस्मात् पूर्वोक्तप्रकारेण कथायां न उद्भावनीयः । एवञ्च सर्वोऽपि अयं तार्किकमततीत्या वर्तते ।

तदुक्तं दिनकर्यां

"[62]**यत्तु पूर्वोक्तस्थापनानुमाने शरीरजन्यत्वमुपाधिः। तस्य घटादौ साध्यव्यापकत्वात्, अङ्कुरादौ साधनाव्यापकत्वाच्च। न च अङ्कुरादौ सकर्तृकत्वरूपसाध्यसन्देहेन उपाधेः साध्यव्यापकत्वसंशयान्नोपाधित्वनिश्चयः इति वाच्यम्। तथा पि सन्दिग्धोपाधित्वस्य दुर्वारत्वात् । न च उपाधिसन्देहाहितः व्यभिचारसन्देह एव, स च न प्रतिबन्धक इति वाच्यम् । पक्षतत्समयोर्व्यभिचारसंश्यस्याऽपि प्रतिबन्धकत्वात् । अत एव "अनुकूलतर्कविरहदशायं पक्षेतरत्वं सन्दिग्धोपाधिः" इत्यभिधानं ग्रन्थकृतां सङ्गच्छते इति**" ।

एकः नियमः वर्तते **"यद्व्यतिरेकस्य साध्यव्यतिरेकसाधकत्वं तस्य एव साध्यव्यापकत्वम्''** इति । पर्वतः धूमवान् वह्निमत्वात् इत्यत्र पश्यामः । अत्र आर्द्रेन्धनसंयोगः उपाधिः । आर्द्रेन्धनसंयोगाभावस्य धूमाभावसाधकत्वम् अस्ति । ह्रदः धूमाभाववन् आर्द्रेन्धनसंयोगाभावात् इति । एवमेव क्षित्यादिकं कर्तृजन्यं कार्यत्वात्

[62] दिनकरी पृ सं २८ , २९

इत्यत्र शरीरजन्यत्वम् उपाधिः । साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधेः लक्षणम् । [63]साध्यव्यापकत्वं नाम साध्याधिकरणवृत्ति-अत्यन्ताभावाप्रतियोगित्वम् । साधनाधिकरणवृत्ति-अत्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वं नाम। प्रकृतोदाहरणे समन्वयं करोमि । साध्यं नाम कर्तृजन्यत्वं , तदधिकरणं नाम घटः, तत्वृत्ति अत्यन्ताभावो नाम नहि शरीरजन्यत्वस्य अत्यन्ताभावः, परन्तु गजात्यन्ताभावः। यतोः हि घटे शरीरजन्यत्वम् अस्ति इत्यर्थः। अतः तत्प्रतियोगि गजः, प्रतियोगित्वं गजे, तदप्रतियोगि शरीरजन्यत्वं , तदप्रतियोगित्वं शरीरजन्यत्वे , एवञ्च साध्याधिकरणात्यन्ताभावाप्रतियोगित्वं शरीरजन्यत्वे आयातम् ।

एवमेव साधनं कार्यत्वं , तदधिकरणं क्षित्यादिः , तद्वृत्ति अत्यन्ताभावो नाम शरीरजन्यत्वस्य अत्यन्ताभावः। अतः तत्प्रतियोगि शरीरजन्यत्वं, तत्प्रतियोगीत्वं शरीरजन्यत्वे इत्यतः साधनाव्यापकत्वम् शरीरजन्यत्वे आयातम्। तस्मात् सः उपाधिः । अतः अत्रापि उपाध्यभावेण साध्याभावः साधनीयः । तथा च क्षित्यङ्कुरादिकं कर्तृजन्यत्वाभाववत् शरीरजन्यत्वाभावात् इति अनुमानं वक्तव्यम् । हेतुघटकदलानां व्यभिचारवारकतया सार्थक्यं वक्तव्यम् । प्रकृते अजन्यत्वहेतुना एव साध्याभावसाधनसम्भवे तत्र शरीरपदं न अपेक्षितम् इत्यर्थः। यत्र अजन्यत्वं तत्र कर्तृजन्यत्वाभावः इति व्याप्तिः वर्तते। अतः शरीरपदं न अपेक्षितम् इति उच्यते । अतः

[63] तर्कसङ्ग्रहः पृ सं १२०

अयं हेतुः व्यर्थविशेषणघटितः अस्ति । तस्मात् अयं हेतुः व्याप्यत्वासिद्धः इति उच्यते । अस्य हेतोः साध्यसाधकत्वं नास्त्येव इति । अतः पूर्वोक्तनियमं पश्यामः चेत् ज्ञायते उपाध्यभावस्य साध्याभावसाधकत्वं नास्ति इत्यतः उपाधौ साध्यव्यापकत्वं नास्ति । शरीरजन्यत्वस्य साध्यव्यापकत्वाभावादेव तेन हेतौ व्यभिचारदोषोद्भावनं कर्तुं न शक्यते । अतः अनुमानं न दुष्टम् ।

एवमेव प्रकृतेऽपि योजनीयम् । पूर्वपक्षिभिः उपाधिद्वयं दर्शितं, तत्र उभयत्रापि साध्यव्यापकत्वं वक्तव्यं चेत् उपाध्यभावेन साध्याभावः साधनीयः । तत् शक्यते वा इति द्रष्टव्यम् । तथा च अनुमानं – वियदादिकं न मिथ्या स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वरहितत्वात् इति । परन्तु अत्र चिन्तनीयं केवलेन दोषप्रयुक्तभानत्वराहित्येन हेतुना एव मिथ्यात्वाभावसाधनसंभवे हेतौ स्वबाधकाभिमताबाध्यत्वविशेषणं व्यर्थम् । अतः व्यर्थविशेषणघटितत्वात् अयं साध्यसाधकः न भवति । तस्मात् पूर्वोक्त नियमानुसारेण अस्य उपाधेः साध्यव्यापकत्वम् एव नास्ति इति ज्ञायते । एवमेव द्वितीयोपाधेः अपि साध्यव्यापकत्वं नास्ति इति ज्ञायते । इत्थं समग्रः अयम् उपाधिविचारः सिद्धिकारैः प्रस्तुतः सः नैयायिकमतानुसारेण एव वर्तते इति ज्ञायते।

संस्कारनिरूपणम्

अद्वैतसिद्धौ तृतीयं मिथ्यात्वम् एवं उक्तं [64]“ज्ञाननिवर्यत्वं मिथ्यात्वम्” इति । एवं यदि उच्यते तर्हि उत्तरज्ञानेन निवर्तमाने पूर्वज्ञाने अतिव्यापिः । यतो हि ज्ञाननिवर्त्यत्वं पूर्वज्ञानेऽपि अस्ति । एवमेव मुद्गरपातेन निवर्त्ये घटे अव्याप्तिः च भवति । यतो हि तादृशघटादिषु ज्ञाननिवर्त्यत्वस्य अभावात् । अतः तत्परिहारार्थं ज्ञानत्वेन ज्ञाननिवर्त्यत्वं इह विवक्षणीयम् । तथा सति उत्तरज्ञानेन निवर्त्ये पूर्वज्ञाने न अतिव्यापिः । यतो हि तत्र ज्ञानत्वेन ज्ञाननिवर्त्यत्वं नास्ति । परन्तु आत्मवृत्तिविशेशगुणत्वेन ज्ञाननिवर्त्यत्वम् अस्ति । परन्तु अधिष्ठानतत्त्वसाक्षात्कारेण निवर्त्ये शुक्तिरूप्यादौ साध्यविकलता अस्ति एव इति प्रश्नः उदेति । अतः अस्य सङ्ग्रहार्थं ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वं विवक्षणीयम् । अयं ज्ञानत्वव्याप्यधर्मः इत्यतः शुक्तिरूप्यादौ समन्वयः भवति । परन्तु अत्र पूर्वपक्षिणः आक्षिपन्ति – ज्ञानत्वव्याप्य धर्मः स्मृतित्वं , तेन धर्मेण निवर्त्ये संस्कारे अतिव्यापिः स्यादेव खलु इति । अत्र सिद्धिकारैः समाधानम् उच्यते – अस्माभिः स्मृतेः संस्कारनाशकत्वं न अङ्गीक्रियते इति । यतो हि सिद्धिकाराः कथयन्ति , पुनः पुनः स्मृतिः जायते चेत् संस्कारः नष्टः इति न वक्तव्यम् । परन्तु संस्कारः दृढः जातः इति वक्तव्यम् इति ।

तदुक्तं सिद्धिकारैः –

---

[64] अद्वैतसिद्धि पृ सं १२३

[65]“स्मृतित्वेन स्मृतेः संस्कारनाशकत्वे मानाभावात् । स्मृतौ जातायां संस्कारः दृढो भवति इति अनुभवसिद्धम्” इति

अनेन वचनेन इदं ज्ञायते यत् सिद्धिकाराः स्मृतेः संस्कारनाशकत्वं न अङ्गीकुर्वन्ति इति । वस्तुतः अयं नवीननैयायिकानां सम्मतः पक्षः ।

अस्मिन् विषये नैयायिकानां मतद्वयं वर्तते । केचन संस्कारस्य नित्यत्ववादिनः । अन्ये केचन संस्कारस्य अनित्यत्ववादिनः । नवीननैयायिकैः संस्कारस्य नित्यत्वम् उच्यते । अतः अनुभवत्वावच्छिन्नानुभवनिष्ठकारणतानिरूपितकार्यताश्रयत्वं स्मृतेः लक्षणम् इति । तथा हि संस्कारमात्रजन्यं ज्ञानं स्मृतिः[66] तार्किकाः कथयन्ति । संस्कारेतराजन्यत्वे सति संस्कारजन्यत्वे सति ज्ञानत्वं स्मृतेः लक्षणम् । अत्र मात्रदलस्य इतरयोगव्यवच्छेदः अर्थः। तथा च संस्कारप्रतियोगिकभेदवन्निष्ठजनकतानिरूपितजन्यताश्रयत्वाभाववत्वे सति संस्कारनिष्ठजनकतानिरूपितजन्यतावत्वे सति ज्ञानत्वम् इति निष्कृष्टं लक्षणम् ।संस्कारनिष्ठजनकतानिरूपितजन्यताश्रयत्वे सति ज्ञानत्वं स्मृतेः लक्षणम्। अस्य अयमर्थः संस्कारेण केवलं यत् ज्ञानं जायते तत् ज्ञानं स्मृतिः इति। अत्र किञ्चित् चिन्त्यते । स्मृतेः लक्षणे दलत्रयं वर्तते। तत्र ज्ञानत्वमात्रोक्तौ अनुभवे अतिव्याप्तिः। अतः संस्कारमात्रजन्यत्वदलं देयम्। तथा च अनुभवे ज्ञानत्वस्य सत्वेऽपि संस्कारमात्रजन्यत्वे सति ज्ञानत्वं नास्ति इत्यतः नातिव्याप्तिः । यदि संस्कारेतराजन्यत्वदलं न दीयते तर्हि

---

[65] अद्वैतसिद्धिः १२७

[66] तर्कसंग्रहः पृ स ६१

प्रत्यभिज्ञायाम् अतिव्याप्तिः । प्रत्यभिज्ञायाम् तत्तांशः इदमंशः च इति अंशद्वयं वर्तते। तत्र तत्तांशे ज्ञानस्य संस्कारजन्यत्वं वर्तते । इदमंशे ज्ञानस्य इन्द्रियजन्यत्वं वर्तते । तस्मात् प्रत्यभिज्ञायाम् अपि संस्कारजन्यत्वे सति ज्ञानत्वस्य सत्वात् अतिव्याप्तिः । अतः लक्षणे संस्कारेतराजन्यत्वदलं निवेशनीयम् । तथा सति प्रत्यभिज्ञायां संस्कारजन्यत्वे सति ज्ञानत्वस्य सत्वेपि संस्कारेतराजन्यत्वे सति संस्कारजन्यत्वे सति ज्ञानत्वं नास्ति इत्यतः नातिव्याप्तिः । अत्र स्मृत्युत्पत्तिप्रक्रिया का इत्युक्ते आदौ अनुभवः परम् अनुभूतविषयाणां संस्कारः । ततः परं स्मृतिः इति प्रक्रिया वर्तते। अत्र स्मृतेः उत्पत्तिव्यापारत्वेन संस्कारः वर्तते । संस्कारस्य किं लक्षणम् इति चेत् अनुभवजन्यत्वे सति स्मृतिहेतुत्वम् इति। पूर्वोक्तस्मृत्युत्पत्तिप्रक्रियानुसारेण संस्कारे लक्षणसमन्वयः । संस्कारलक्षणे स्मृतिहेतत्त्वमात्रोक्तौ अनुभवे अतिव्याप्तिः । अनुभवेऽपि स्मृतिहेतुत्वस्य सत्वात् । अतः अनुभवजन्यत्वम् इति दलं देयम्। तथा च लक्षणं भवति अनुभवजन्यत्वे सति स्मृतिहेतुत्वम् इति । इदानीम् अनुभवे नातिव्याप्तिः । यतो हि अनुभवे स्मृतिहेतुत्वस्य सत्वेऽपि अनुभवजन्यत्वे सति स्मृतिहेतुत्वं नास्ति । अनुभवजन्यत्वं मात्रं यदि उच्यते तर्हि अनुभवध्वंसे अतिव्याप्तिः । ध्वंसं प्रति प्रतियोगिनः कारणत्वात् अनुभवध्वंसे अनुभवजन्यत्वम् अस्ति अतः अतिव्याप्तिः । अतः तद्वारणार्थं स्मृतिहेतुत्वम् इति दलं देयम् । एवञ्च अनुभवध्वंसे अनुभवजन्यत्वस्य सत्वेऽपि अनुभवजन्यत्वे सति स्मृतिहेतुत्वं नास्ति । अतः नातिव्याप्तिः। विशिष्टबुद्धिं प्रति विशेषणज्ञानं कारणम् । दण्डी पुरुषः इति ज्ञानं तावत् दण्डप्रकारकपुरुषविशेष्यकं ज्ञानम् । यः पुरुषः विशेषणीभूतं दण्डं न जानाति,

तस्मिन् दण्डी पुरुषः इति विशिष्टबुद्धिः न उदेति। यतो हि विशिष्टबुद्धिं प्रति विशेषणज्ञानं कारणम् इति नियमानुसारेण दण्डी पुरषः इति ज्ञानोत्पत्यर्थं विशेषणीभूतस्य दण्डस्य ज्ञानम् आवश्यकम्। एवञ्च दण्डस्य दर्शनानन्तरं एकस्य पुरुषस्य दण्डी पुरुषः इति ज्ञानं जातम्। इदं ज्ञानम् अनुभवात्मकम् इति ज्ञातव्यम्। परं अस्य अनुभवस्य संस्कारः भवति। परं तेन स्मृतिः जायते। अतः अस्य अनुभवस्य स्मृति हतुत्वम् अपि अस्ति। अतः एतादृशे अनुभवे संस्कारलक्षणस्य अतिव्याप्तिः। अतः संस्कारलक्षणे परिष्कारः कर्तव्यः। अनुभवनिष्ठजनकतायाम् अनुभवत्वावच्छिन्नत्वं निवेशनीयम्। तथा च संस्कारस्य लक्षणं भवति अनुभवनिष्ठानुभवत्वावच्छिन्नजनकतानिरूपितजन्यताश्रयत्वे सति स्मृतिहेतुत्वम् इति। इदानीम् पूर्वक्तस्थले नातिव्याप्तिः। यतो हि पूर्वोक्ते दण्डी पुरुषः इति अनुभवे ज्ञानत्वावच्छिन्नानुभवनिष्ठजनकतानिरूपितजन्यताश्रयत्वे सति स्मृतिहेतुत्वस्य सत्वेऽपि अनुभवनिष्ठानुभवत्वावच्छिन्नजनकतानिरूपितजन्यताश्रयत्वे सति स्मृतिहेतुत्वं नास्ति अतः अतिव्याप्तिः नास्ति। कुत इति चेत् [67]दण्डप्रकारकबुद्धित्वावच्छिन्नकार्यतानिरूपितदण्डज्ञानिष्ठा या कारणता, तस्याः न दण्डानुभवत्वम् अवच्छेदकम्, दण्डानुभवादिव दण्डस्मरणादपि दण्डप्रकारकबुद्धेः उत्पत्तेः। अतः दण्डप्रकारकबुद्धित्वावच्छिन्नं प्रति अनुभवस्मरणसाधारणदण्डज्ञानत्वेन एव दण्डज्ञानस्य कारणतायाः स्वीकरणीयत्वेन दण्डज्ञानत्वस्य एव तदवच्छेदकत्वात्। तथा च अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यवस्योक्तप्रत्यक्षे अभावात् नातिव्याप्तिः।

---

[67] न्यायबोधिनी पृ स ७२

परिष्कृतं लक्षणं संस्कारे समन्वेति । अनुभवेन एव संस्कारः उत्पद्यते इत्यतः संस्कारं प्रति अनुभवस्य अनुभवत्वेन एव कारणत्वम् अस्ति । अतः अनुभवनिष्ठानुभवत्वावच्छिन्नजनकतानिरूपितजन्यताश्रयत्वे सति स्मृतिहेतुत्वम् इति लक्षणं भावनायां वर्तते इत्यतः लक्षणसमन्वयः । एवं परिष्कारे कृते सति अत्र लक्षणे स्मृतिहेतुत्वदलं व्यर्थं खलु इति वैय्यर्थ्य शङ्का उदेति । स्मृतिहतुत्वदलं तावत् अनुभवध्वंसे अतिव्याप्तिवारणाय उपात्तम् । परन्तु ध्वंसं प्रति प्रतियोगिनः कारणत्वं प्रतियोगित्वेन रूपेण इति ज्ञातव्यम् । घटध्वंसं प्रति घटस्य कारणत्वं घटत्वेन रूपेण नास्ति । परन्तु प्रतियोगित्वेन रूपेण । अतः अनुभवनिष्ठानुभवत्वावच्छिन्नजनकतानिरूपितजन्यताश्रयत्वं अनुभवध्वंसे नास्ति । परन्तु अनुभवनिष्ठप्रतियोगित्वावच्छिन्नजनकतानिरूपितजन्यताश्रयत्वं अनुभवध्वंसे अस्ति । अतः स्मृतिहेतुत्वदलं विना केवलम् अनुभवनिष्ठानुभवत्वावच्छिन्नजनकतानिरूपितजन्यताश्रयत्वम् इति मात्रं लक्षणं कुर्मः चेत् अनुभवध्वंसे अतिव्याप्तिः वारयितुं शक्यते । अतः संस्कारलक्षणे स्मृतिहेतुत्वदलं मास्तु इति आशङ्का । एवं प्राप्ते न्यायबोधिनीकाराः वदन्ति- “ [68]**स्मृतौ अतिव्याप्तिवारणाय एव तदुपादानात्**” इति । अत्र न्यायबोधिनीकारैः नवीनमतम् आश्रित्य समाधानम् उच्यते । प्राचीननैयायिकमते तु स्मृतिं प्रति अनुभवस्य ज्ञानत्वेन कारणत्वम् उच्यते । परन्तु नवीननैयायिकमते तु स्मृतिं प्रति अनुभवस्य अनुभवत्वेन एव कारणत्वम् उच्यते ।

---

[68] न्यायबोधिनी पृ स ७४

एतादृशः अभिप्रायभेदः मतद्वये कुतः उत्पन्नः इति अहं विस्तरेण उपपादयामि। स्मृतिं प्रति ज्ञानत्वावच्छिन्नस्य कारणत्ववादिनाम् अयम् आशयः - प्रथमतः अनुभवः जायते , अनुभवेन तत्समानविषयकसंस्कारः भवति । संस्कारेण तत्समानविषयिणी स्मृतिः जायते। एतन्मते स्मृत्या संस्कारनाशः उच्यते । तस्मात् द्वितीयस्मृतिकाले अनुभवेन उत्पन्नस्य संस्कारस्य पूर्वमेव नष्टत्वात् प्रथमस्मरणानन्तरं पुनः तद्विषयकं स्मरणं न स्यात् । अतः एतैः तु प्रथमस्मरणानन्तरं पुनः तेन एव स्मरणेन संस्कारस्य उत्पत्तिं कथयन्ति । तथा च प्रथमस्मरणेन उत्पन्नसंस्कारेण पुनः तत्समानविषयकस्मरणं भवितुम् अर्हति । एवञ्च एतैः उत्तरोत्तरस्मृत्या पूर्वपूर्वसंस्काराणां नाशः उच्यते । एवमेव उत्पन्नाः स्मृतयः पुनः तत्समानविषयकसंस्कारान् उत्पादयन्ति । तथा च प्रथमस्मृतौ अनुभवनिष्ठज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वं वर्तते । एवमेव द्वितीयस्मृतौ अपि प्रथमस्मृतिनिष्ठज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वं वर्तते इति सर्वत्र लक्षणसमन्वयः।

अनुभवः – संस्कारः – स्मृतिः – संस्कारः – स्मृतिः ....

अयमाशयः – अनुभवेन संस्कारः उत्पद्यते । सः संस्कारः अग्रिमस्मरणपर्यन्तं आत्मनि समवायेन तिष्ठति । अग्रिमस्मृत्युद्बोधके प्राप्ते संस्कारेण स्मृतिः उत्पद्यते। स्मृतेः ज्ञानरूपत्वात् द्विक्षणावस्थायित्वम् । अतः स्वस्य द्वितीये क्षणे स्वसमानविषयकसंस्कारम् उत्पादयति । एवमेव अग्रे अनुवर्तते । यदि अनुभवत्वावच्छिन्नं स्मृतिं प्रति कारणं तर्हि अनुभवस्य स्मृतिकाले असत्वात् स्मूतेः अनुत्पत्तिप्रसङ्गः । तत्र यद्यपि अनुभवेन

उत्पन्नसंस्कारेण स्मृत्युत्पत्तिः सम्पाद्यते तर्हि द्वितीयादि स्मृतिकाले अनुभवेन उत्पन्नस्य संस्कारस्य अभावात् अनुभवत्वावच्छिन्नस्य स्वेन उत्पन्नसंस्कारद्वारा कारणत्वसम्पादनाभावात् द्वितीयादि स्मरणानुपपत्तिः । तस्मात् स्मृतिं प्रति ज्ञानत्वावच्छिन्नं कारणम् इति वक्तव्यम् ।

स्मृतिं प्रति अनुभवत्वावच्छिन्नं कारणम् इति नवीननैयायिकाः वदन्ति । न हि स्मृतिं प्रति ज्ञानत्वावच्छिन्नस्य कारणत्वं भवितुम् अर्हति । यदि स्मृतिं प्रति ज्ञानत्वावच्छिन्नं कारणम् इति उच्यते तर्हि अनेकाः संस्काराः कल्पनीयाः भवन्ति । पुनश्च मुक्तावल्यां अन्या युक्तिः नवीनमतानुसारं दत्तम् "[69]**यत्र समूहालम्बनोत्तरं घटपटादीनां क्रमेण स्मरणमजनिष्ट, सकलविषयकस्मरणन्तु नाभूत्, तत्र फलस्य संस्कारनाशकत्वाभावात् कालस्य, रोगस्य, चरमफलस्य वा सर्वत्र संस्कारनाशकत्वं वाच्यम्। तथा च न क्रमिकस्मरणानुपपत्तिः।**

स्मृतिः क्षणद्वयं केवलं तिष्ठति ।

यतो हि तार्किकाः कथयन्ति -

योग्यविभुविशेषगुणानां स्वोत्तरवर्तियोग्यविभुविशेषगुणनाश्यत्वम्[70] इति।

---

[69] मुक्तावली पृ सं ३५७

[70] मुक्तावली पृ सं ६८

योग्याः ये विभुविशेषगुणाः तेषां स्वोत्तरं वर्तमानैः योग्यविभुविशेषगुणैः नाश्यन्ते। तस्मात् आत्मनि आकाशे च वर्तमाननां विशेषगुणानां द्विक्षणावस्थायित्वम् उच्यते। स्वोत्पादकः एव स्वेन स्वस्य द्वितीयक्षणे नाश्यते ।

मुक्तावलीकाराः कथयन्ति -

"[71]द्रव्यारम्भश्चतुर्षुस्यादथाकाशशरीरिणाम् ।

अव्याप्यवृत्तिः क्षणिको विशेषगुणयोगतः।" इति

अनेन श्लोकेन आकाशात्मनोः साधर्म्यं वर्तते इति । क्षणिकविशेषगुणवत्वम् इति आकाशे आत्मनि च वर्तते। अत्र क्षणिकत्वं विशेषगुणवत्वं चेति साधर्म्यद्वयं वर्तते इति उच्यते । क्षणिकत्वं नाम तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम् इति अर्थः । तच्च लक्षणं ज्ञाने शब्दे च वर्तते इति समन्वयः । परन्तु तृतीयक्षणे यदि किञ्चित् रूपं नश्यति तर्हि तादृशे रूपे क्षणिकत्वम् आयाति । परं तादृशक्षणिकगुणवत्वस्य घटे अपि सत्वात् साधर्म्यस्य अव्याप्ति सम्भवति । तस्मात् साधर्म्यं परिष्क्रियते चतुःक्षणवृत्तिजन्यावृत्तिजातिम्द्विशेषगुणवत्वम् इति । इदं लक्षणं शब्दे ज्ञाने च समन्वेति इत्यतः आकाशात्मनोः साधर्म्यं सिध्यति । एवञ्च ज्ञानस्य द्विक्षणावस्थायित्वं सिद्धं भवति । ज्ञानम् आत्मनः गुणः । अतः अपि पूर्वोक्तनियमानुसारेण द्विक्षणावस्थायित्वम् ।

---

[71] मुक्तावली श्लो सं २७

सर्वव्यवहारहेतुः गुणो बुद्धिर्ज्ञानम् । स द्विविधः स्मृतिरनुभवश्च[72] इति तर्कसङ्ग्रहकारैः उच्यते। मुक्तावलीकारैः अपि

"[73]विभुर्बुध्यादिगुणवान् बुद्धिस्तु द्विविधा मता ।

अनुभूतिस्मृतिश्च स्यादनुभूतिश्चतुर्विधा ।।" इति

अस्मिन् श्लोके बुद्धेः द्वैविध्यं दर्शितम् । ज्ञानस्य द्विक्षणावस्थायित्वादेव अनुभवस्मृत्योः अपि द्विक्षणावस्थायित्वं सिध्यति । आदौ चक्षुरिन्द्रियस्य घटेन सह सन्निकर्षे जाते अयं घटः इति अनुभवः जायते । ततः घटविषयकः संस्कारः जायते । ततः उद्बोधके प्राप्ते सति स्मृतिः जायते इति प्रक्रिया वर्तते । अत्र संस्कारः किमर्थम् अङ्गीकर्तव्यः इति प्रश्नः उदेति । तत्र उच्यते यदि संस्कारः नाङ्गीक्रियते तर्हि अनुभवानन्तरं स्मरणमेव नस्यात् । यतो हि अनुभवस्य द्विक्षणावस्थायित्वात् तृतीये क्षणे नश्यति । अतः अनुभवरूपस्य कारणस्य अभावादेव अग्रे स्मृतिः न उत्पद्यते इति स्यात् । अतः अपूर्ववत् संस्कारः मध्ये आवश्यकः । अपूर्ववत् इति किमर्थम् उक्तम् इति किञ्चित् उपपादयामि । आशुतरविनाशी यागः । तस्य स्वर्गपर्यन्तम् अवस्थानं न सम्भवति । स्वर्गस्तु मरणानन्तरं लभ्यते । परन्तु यागस्य स्वर्गपूर्वक्षणवृत्तित्वं न सम्भवति । अतः यागस्य स्वर्गकारणत्वं न स्यात् । तस्मात् मध्ये अपूर्वं कल्पनीयं भवति । यागस्य समाप्तेः परं स्वर्गकारणत्वस्य निर्वाहार्थं मध्यवर्ति अपूर्वं कल्प्यते । कार्यनियतपूर्ववर्तित्वं कारणस्य

---

[72] तर्कसंग्रहः पृ स ६०

[73] मुक्तावली श्लो सं ५३

लक्षणम् । कार्याधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वे सति पूर्ववृत्तित्वं कारणस्य लक्षणम् । अतः मुक्तावलीकाराः वदन्ति “ [74]अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता । कारणत्वं भवेत् ” इति । एवमेव “[75]कार्यनियतपूर्ववृत्तिकारणम् ” इति तर्कसङ्ग्रहकाराः अपि वदन्ति । आहत्य सर्वेषाम् अयमाशयः यत् कार्यस्य पूर्वाक्षणे कार्याधिकरणे कारणेन भवितव्यम् इति । परन्तु स्वर्गाव्यहितप्राक्षणे प्राक्क्षणे यागः न भवतीत्यतः अपूर्वं कल्पितम् । अस्य अयम् अर्थः यत् अपूर्वद्वारा यागः स्वर्गाव्यवहितप्राक्षणे भवति इति । तद्वत् प्रकृते अपि अनुभवेन स्मृतौ जननीयायां मध्यवर्तित्वेन संस्कारः कल्पनीयः भवति । अत्र केचन संस्कारस्य नित्यत्वं कथयन्ति केचन अनित्यत्वं कथयन्ति । कुतः एवम् इति विचार्यते । ये तावत् संस्कारस्य स्मृत्या नाशं नाङ्गीकुर्वन्ति ते तु अनुभवत्वेन अनुभवस्य स्मृतिं प्रति कारणत्वं वदन्ति । तथा च अनुभवत्वावच्छिन्न अनुभवनिष्ठ कार्यतानिरूपितकारणताश्रयत्वं स्मृतेः लक्षणम् इति । यदा एकवारं अयं घटः इति अनुभवः उत्पन्नः तदा आत्मनि तद्विषयकः संस्कारः उत्पद्यते । ततः उद्बोदके प्राप्ते सति तेन स्मृतिः उदेति । परन्तु तया स्मृत्या संस्कारस्य नाशः न भवति । यदि स्मृत्या संस्कारस्य नाशः स्यात् तर्हि अनन्ताः संस्काराः कल्पनीयाः भवन्ति । तदुक्तं मुक्तावल्यां “ [76]अनन्तसंस्कारतन्नाशकल्पनापेक्षया चरमस्मरणस्य एव संस्कारनाशकत्वकल्पनेन व्यभिचारसंशयाभावात् ” इति । एवञ्च सिद्धिकारैः लाघवानुरोधेन लोकानुभवानुरोधेन च

[74] मुक्तावली श्लो सं १६

[75] तर्कसंग्रहः पृ स ६९

[76]मुक्तावली पृ सं ३२७

नैयायिकानां मतं स्वीकृत्य स्वकीयसिद्धान्तानुसारेण मिथ्यात्वम् उपपादितं वर्तते । वतुतः एवम् उपपादने सन्ति बहूनिकारणानि । अतः सिद्धिकाराः अस्मिन् विषये न्यायमतं स्वीकृतवन्तः ।

v

ग्रन्थाधमर्ण्यम्

क्र. सं	ग्रन्थः	सम्पादकः/लेखकः	प्रकाशनम्	स्थानम्	वर्षम्
१	पञ्चदशी	स्वामी आदिदेवानन्दः	श्रीरामकृष्णाश्रमः	मैसूरु	२०११
२	अद्वैत	अनन्तशर्मा भुवनगिरि	वेदान्तभारती	मैसूरु	२०११
३	वेदान्तसारः	सदानन्दः/ स्वामी हर्षानन्दः	श्रीरामकृष्णाश्रमः	मैसूरु	२००२
४	अद्वैत मे प्रमुखसिद्धान्तो का पारम्परिक विश्लेषण	तारादत्त	नाग पब्लिशन्स्	दिल्ली	२००२
५	वेदान्तपरिभाषा	दर्शनशास्त्री/ धर्मराजाध्वरीन्द्रः	कैलासाश्रमः	वाराणसी	१९८३
६	न्यायसिद्धान्तमुक्तावली (दिनकरीव्यख्यासहितम्)	श्री पं. हरिरामशुक्लः न्यायाचार्यः	चौखम्भा प्रकाशन	वाराणसी	२०११
७	विवेकसौरभम्	स्वामी हर्षानन्दः पुरी	श्रीरामकृष्ण मठः	बेङ्गलूरु	२०१२
८	कारिकाकरः	तिलक मोहन् राव्	वेदविज्ञानगुरुकुलम्	चन्नेनहल्ली	२०१२
९	तर्कसङ्ग्रहः	अन्नंभट्टः	चौखम्भा संस्कृत सीरीस् आफीस्	वाराणसी	२०१४
१०	उपनिषत् (शाङ्करभाष्यम्)	शङ्कराचार्याः/ सुब्रह्मण्यशास्त्री	दक्षिणामूर्तिमठप्रकाशन	वाराणसी	२००४

१२	मन्त्रमञ्जरी	डा . पादेकल्लु विष्णु भट्टः	मित्तूरु पुरोहिततिम्मय्यभट्ट संप्रतिष्ठानम्	इड्किदु	२००७
१३	लघुचन्द्रिकाप्रकाशः	वेदब्रह्मश्री के नारायणभट्टः	शङ्कराद्वैतशोधकेन्द्रम्	श्रुङ्गेरी	२००१
१४	अद्वैतसिद्धिः	डा . सितांशुशेखरः बागचिः	रत्ना पब्लिकेशन्	वाराणसी	२०१८
१५	यजुरारण्यकम्	ए. एन्. गङ्गाधरशास्त्री	श्री विद्यागणपति प्रकाशनम्	त्यागराज नगरम्	२००५
१६	न्यायामृताद्वैतसिद्धी (हिन्दी व्याख्यासहितम्)	स्वामी योगानन्दः (हिन्दी व्याख्याकारः)	चौखम्बा विद्याभवन	वाराणसी	२००२
१७	पक्षता	गङ्गेशोपाध्यायाः	केन्द्रीयसंस्कृतविद्यापीठम्	तिरुपतिः	१९८५
१८	ब्रह्मसूत्रशांकरभाष्यम् (भाष्यरत्नप्रभया भामत्या न्यायनिर्णयेन च सहितम्)	आचार्यजगदिशशास्त्रिणः	मोतीलाल बनारसीदास	वाराणसी	२०१८

उपसंहारः

महताप्रयासेन अयं शोधप्रबन्धः समापितः । एतादृशशोधप्रबन्धलेखनेन अद्वैतसिद्धेः न्यायग्रन्थानां च विस्तरेण अध्ययनं कर्तुं महान् अवकाशः प्राप्तः । अद्वैतसिद्धेः गाम्भीर्यं महत् वर्तते इत्यपि ज्ञातम् । न्यायप्रमेयस्य सिद्धिग्रन्थस्य च विमर्शः अत्र शोधग्रन्थे कृतः । अद्वैतसिद्धौ तार्किकप्रमेयविमर्शः इति अयं शोधप्रबन्धः गुरूणां मार्गदर्शकानां च मार्गदर्शनेन लिखितः । प्रायः सिद्धेः प्रथमे अध्याये ये मुख्याः तार्किकप्रमेयाः सिद्धिकारैः स्वीकृताः खण्डिता च ते विमृष्टाः वर्तन्ते । **अयं शोधप्रबन्धः सिद्धौ ये प्रवेशं प्राप्तुम् इच्छन्ति तेभ्यः सहकरोति । सर्वै सर्वदा सर्वे न्यायाविषयाः विस्तरेण स्मर्तुं शक्यते इति नास्ति । अत्र मया नैयायिकानां सिद्धान्ताः सुलभतया अवगन्तुं सरलभाशया पूर्णः प्रमेयांशः उपपादितः । मधुसूदनसरस्वतीस्वामिभिः बहुत्र तार्किकाणां सिद्धान्ताः अङ्गीकृत्य निरूपिताः वर्तन्ते । यथा पक्षता स्वरूपविमर्शः । अत्र मणिकारादितार्किकैः यादृशस्वरूपं अङ्गीकृतं तादृशम् एव स्वरूपं सिद्धिकारैः अपि उपपादितम् । एवमेव ध्वंसप्रागभावयोः अधिकरणे अत्यन्ताभावः न अङ्गीक्रियते इति प्राचीनानां मतं वर्तते । इदं प्राचीनानां मतं अङ्गीकृत्य सिद्धिकारैः उपपादनं कृतं वर्तते। परन्तु क्वचित् तार्किकाणां सिद्धान्ताः निराकृताः । यथा परमात्मनः वेदैक्यगम्यत्वं इति सिद्धिकारैः व्यासाचार्याणाम् आशयानुसारेण उक्तं वर्तते । परन्तु नैयायिकानाम् कृते इदं सम्मतं नास्ति । यतो हि नैयायिकैः अनुमानप्रमाणगम्यत्वं परमात्मनः उक्तं वर्तते। एवञ्च**

नैयायिकानाम् अयमाशयः सिद्धिकारैः खण्डितम् इति ज्ञायते। प्रथमे अध्याये शोधर्थं अपेक्षितः विषयः निरूपितः । द्वितीये अध्याये सिद्धिकारैः यत्र तार्किकाः खण्डिताः ते विषयाः निरूपिताः । तृतीये अध्याये सिद्धिकारैः तार्किकाणां सिद्धान्ताः ये अङ्गीकृताः ते निरूपिताः ।

अत्र एकः विशेषः मया वक्तव्यः अस्ति। सिद्धिकारैः क्वचित् तार्किकाणां मतं अनेन निराकृतं भवति इति उक्त्वा निराकृतं वर्तते। तद्यथा ख्यातिनिरूपणावसरे आचार्याः अन्यथाख्यातिखण्डनम् इति उक्तवन्तः । एवमेव आकाशस्य अवृत्तित्वं नाङ्गीक्रियते इत्यपि उक्तवन्तः । एवमेव सिद्धिकाराः स्वयं । अतः तेषां विमर्शः अवश्यं कर्तव्यः। तार्किकाः स्वस्य परमतत्वानुसारं अन्यत् सर्वं सिद्धान्तं योजयन्ति। अतः कदाचित् तार्किकदृष्ट्या सः सिद्धान्तः सम्यक् भवेत्। परन्तु वेदान्तदृष्ट्या विचार्यमाणे तु कदाचित् तार्किकप्रमेयः निराकर्तव्यः भवेत्। अत्र मया आदौ अद्वैतिनां सिद्धान्तः उपपाद्यते। ग्रन्थे ग्रन्थकारैः येन अभिप्रायेण कश्चन प्रमेयः भागः उपपादितः सः भागः व्याख्यानादीनां गुरूणां च सहाय्येन स्वाभिप्रायं अपि योजयित्वा मया उपपादितः। ततः परं तस्य प्रमेयस्य विषये नैयायिकानां कः अभिप्रायः इति प्रामाणिकान् न्यायग्रन्थान् आधारीकृत्य विचारः उपपादितः। तन्मध्ये अथवा विचारान्ते उभयोः मतयोः प्रमेययोः साधकबाधकादिकं आकलय्यः विमर्शः कृतः । सिद्धेः व्याख्यानस्य अपि अनेन व्याजेन अध्ययनं कृतम् । आचार्याः पाठकालेऽपि शोधविचारान् उक्तवन्तः । ते अपि अत्र संयोजिताः ।